ISSN— 2320–5911

# प्रज्ञालोकः

(रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य संस्कृताध्ययनविभागस्य शोधपत्रिका)

## प्रथमः अङ्कः

उपदेष्टा

स्वामी आत्मप्रियानन्दः

सम्पादकमण्डली

राकेशदाशः

वेङ्कटरमणभट्टः

गोपीकृष्णन् रघुः

नागराजभट्टः

श्रीजित् टि.जि.

संस्कृतविभागः

रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयः

वेलुरमठम्

प्रज्ञालोकः
(संस्कृताध्ययनविभागस्य शोधपत्रिका)
Prajñāloka
(Research Journal of Department of Sanskrit Studies)

ISSN— 2320–5911

सम्पादकमण्डली—
राकेशदाशः वेङ्कटरमणभट्टः
गोपीकृष्णन् रघुः
नागराजभट्टः
श्रीजित् टि.जि.
Board of Editors—
Rakesh Das
Venkataramana Bhat
Gopikrishnan Reghu
Nagaraja Bhat
Srigeeth T G

प्रकाशकः— स्वामी दुर्गानन्दः
कुलसचिवः
रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य
वेलुरमठस्थस्य, हावडामण्डले, पश्चिमवङ्गेषु
Publisher— Swami Durgananda
Registrar
Ramakrishna Mission Vivekananda University
Belur Math, Howrah, West Bengal

©प्रकाशकस्य
©Publisher

प्रकाशनवर्षम्— २०१३
Year of Publishing— 2013

मूल्यम्— ₹ ५०
Price— ₹ 50

Powered by LaTeX 2ε

# सूचीपत्रम्


| क्रमः | निबन्धः निबन्धकारश्च | पुटम् |
|---|---|---|
| १. | निवेदनम् | 1 |
| २. | Foreword<br>Swami Atmapriyananda | 2 |
| ३. | प्रमाणविषये पूर्वमीमांसा-विशिष्टाद्वैतसिद्धान्तयोः विमर्शः<br>का.ई.देवनाथन् | 5 |
| ४. | औपनिषदसिद्धान्ते बिम्बप्रतिबिम्बावच्छेदवादविचारः<br>अद्वैतवेदान्तानुसारं जीवात्मस्वरूपम्<br>गणपतिभट्टः | 31 |
| ५. | नेह नानास्ति किञ्चन— माध्वी दृष्टिः<br>ए.वि.नागसम्पिगे | 34 |
| ६. | जीवतत्त्वविषये समस्याः— अधिविज्ञानं साध्यतापर्यवेक्षणम्<br>एन्.उषा देवी | 37 |
| ७. | कामाद्यन्तःकरणधर्माणां केचन सदृशासदृशस्वभावविशेषाः<br>महेश्वरन् के.एस्. | 47 |
| ८. | अद्वैतवेदान्तरीत्या सृष्टिस्वरूपविचारः<br>श्रीजित् टि.जि. | 50 |
| ९. | धर्मराजाध्वरीन्द्रमतानुसारम् आगमप्रमाणविचारः<br>दिनेश रसाळः | 58 |
| १०. | श्रीरामकृष्णप्रतिपादिततत्त्वे द्वैताद्वैतविशिष्टाद्वैतमतानां समन्वयः<br>राकेशदाशः | 62 |
| ११. | योगसूत्रोक्तः एकतत्त्वाभ्यासः— एकः विमर्शः<br>(योगसूत्राणां साम्प्रदायिकव्याख्यानां परिशीलनेन कृतमध्ययनम्)<br>म.जयरामः | 67 |
| १२. | प्रक्रियाक्रमः पाणिनीयव्याकरणञ्च<br>गोपीकृष्णन् रघुः | 73 |

१३. ज्यौतिषशास्त्रे रोगचिन्तनम् 78
दिनकर मराठे

१४. षोडशसंस्कारेषु पूर्वसंस्कारविचारः 84
जयकृष्णन् नम्पूतिरि एन्. डि.

१५. वेदमन्त्राणां काव्यात्मना पुरुषार्थतत्त्वोपदेशः 95
वेङ्कटरमणो भट्टः

१६. गणेशस्तोत्राणां रसग्रहणम् 101
पराग जोशी

१७. काव्यं किं प्रकृतेरनुकरणम् 108
(प्राच्यपाश्चात्त्ययोर्दृक्कोणतः)
शुभ्रजित् सेनः

१८. वेदभाष्यभूमिकासु सायणकृतासु मीमांसाविचारावतरणस्यावश्यकता 116
सौमित्रः अधिकारी

१९. शिक्षणे सम्प्रेषणस्य प्रभावः 129
(संस्कृतदृष्टिकोणतः)
शिवरामभट्टः

२०. Contemporary Relevance Of *ADVAITA VEDĀNTA* 133
Sateesha K S

२१. Phrase Structure Analysis in Sanskrit 137
(With Reference to the First Verse of किरातार्जुनीयम्
and Issues Emerging Thereof)
Dipesh Katira

२२. Rebellion : Aristotle and *Kauṭilya* 155
Shampa Paul

# निवेदनम्

ज्ञानं हि विलक्षणः पदार्थः। तस्य शेवधिः संस्कृतवाङ्मयं भारतीयानाम्। तच्च वेद-शास्त्र-पुराण-काव्य-प्रभृतिलक्षणम्। तदुपपादिका भवति अभ्युदयस्य निःश्रेयसस्य वा प्रतिपत्तिः। तस्मादनिवार्यकर्तव्यो हि तथाविधज्ञानसम्पदो वाङ्मयस्य योगक्षेमविधिः। स च प्राधान्येन अनूचानाध्ययनाध्यापनतन्त्रो भवति। तादृशः पुनः ज्ञानवाङ्मयस्य अभिवर्धनंशोधलक्षणैः विचारैः लेखसन्दर्भैश्च उपपद्यते। शोधशब्दस्तु उभयार्थवृत्तिः। प्रथमतः, तस्य शुद्धिकरणवचनतया, पूर्वग्रन्थेभ्यः प्रतिपन्नचराणां विषयाणां स्पष्टावबोधद्वारा तत्तद्व्यक्तिदेशकालादिसमन्वयौचित्येन सपरिष्कारं पर्यालोचनमर्थः। द्वितीयतः, तस्य आविष्कारवचनत्वात् आवृतस्वरूपस्य विषयविशेषस्य अनावरणे प्रकाशने पर्यवसानम्। एवं सति विश्वविद्यालये अध्ययनाध्यापनाभ्यां सह शोधोऽपि अनिवार्यस्वीकार्य इति प्रज्ञालोक इति शोधपत्रिका इतो विश्वविद्यालयस्य संस्कृताध्ययनविभागतः प्रकाश्यते। अत्र, प्रज्ञासहायानां प्रतिभाचक्षुषां विदुषां विशिष्टविचाराणां प्रकाशनेन संस्कृतवाङ्मयस्य तद्विदां च समुल्लासः परमोद्देशः। इमं लक्ष्यीकृत्य प्रज्ञालोकनामिका शोधपत्रिकेयं अस्मिन् वर्षे प्राकाशि। एतत्प्रकाशने खलु भूयांसः अभिनन्दनीयकर्माणः। एतत्प्रकाशने सततं प्रेरणानिर्देशनादिभिः अनुगृहीतवद्भ्यः कुलपतिचरणेभ्य आत्मप्रियानन्दस्वामिपादेभ्यः प्रणतयः प्रेमादरोदञ्चितं वितन्यन्ते। किञ्च एतद्दिशि अस्मत्प्रवृत्तिम् अनुमोदयद्भ्यः स्वामिदुर्गानन्दपादेभ्यः धन्यवादं प्रशास्महे।

संस्कृतवाङ्मये विविधविषयेषु सम्पन्नबिधा नैके विद्वासः स्वविचारविद्योतसंशुद्धान् लेखान् काले सम्प्रेष्य अनितरसदृशं सहकारमकार्षुः। ते हि सगौरवस्नेहम् अभिनानद्यन्ते। अपि च एतत्पत्रिकाया मुखपुट-आवरणादिविन्यासेन महोपकारं समाचरितवान् विश्वविद्यालयस्य च्छात्रः सञ्चयनः नितान्तं धन्यताभावैरभिनन्द्यते। अस्मिन् कर्मणि दोषपरिष्करणादिषु विविधेषु कार्येषु सहकारं दत्तवते विभागस्य शोधच्छात्राय विवेकायापि भूयांसि अभिनन्दनानि।

भगवत्कृपया प्रज्ञालोकस्येदं स्रोतः निरन्तरं प्रवहत्विति प्रार्थयामहे, एतदर्थञ्च भवतां सर्वेषां सहकारं भृशं काययामहे।

सम्पादकाः

RAMAKRISHNA MISSION VIVEKANANDA UNIVERSITY
(Declared by Government of India under Section 3 of UGC Act, 1956)
PO Belur Math, Dist Howrah 711202, West Bengal, India

# Foreword

Swami Vivekananda wanted the grand truths of *Vedānta* embedded in our *Vedānta* scriptures—the *prasthāna-traya,* namely, *Upaniṣads, Brahma Sūtras* and *Bhagavad-Gītā* —to be taught to everybody irrespective of any distinction, so that the whole nation may become strong and powerful by imbibing the sublime ideas of *Vedānta.*

He also emphasized that these great *Vedātic* truths should be put into practice in society to build up a vigorous and spiritually powerful nation with men and women of impeccable character imbued with the realization of the *Ātman* as taught in the *Vedānta* scriputues, particularly the *Upaniṣads.* Swamiji wanted that the grand truths in our ancient scriptures, particularly *Vedānta* and *Yoga,* should be actualized in the daily lives of every Indian in order that a powerful India—spiritually advanced and morally elevated—may be built on the bedrock of ancient Indian spiritual wisdom blended harmoniously with the modern scientific knowledge. He in fact envisioned that Belur Math itself would one day bloom into a full-fledged University, an all-round temple of learning (*Vidyāmandira),* wherein will be combined the best elements of the East and the West. He wanted to create a machinery that would "bring to the door of everybody what our ancients thought about the most momentous questions of life". Swami Vivekananda's genius for synthesis and harmony has been succinctly put by Romain Rolland in his famous biography of Swamiji in the following telling words: "In the two words 'equilibrium' and 'synthesis', the whole of Vivekananda's constructive genius may be summed up." Swamiji's vision in regard harmonizing and synthesizing the vast body of knowledge in our ancient system of *Vedānta* and *Yoga* could best grasped by quoting his own powerful words:

> "The dry, abstract *Advaita* must become living -- poetic -- in everyday life; out of hopelessly intricate mythology must come concrete moral forms; and out of bewildering Yogi-ism

> must come the most scientific and practical psychology -- and all this must be put in a form so that a child may grasp it. That is my life's work."[1]

Swami Vivekananda also emphasized that the three great major schools of *Vedānta - Advaita, Viśiṣṭādvaita* and *Dvaita*-are not contradictory at all. To quote his own inspiring words:

> "Unfortunately there is the mistaken notion in modern India that the word *Vedānta* has reference only to the *Advaita* system; but you must always remember that in modern India the three *Prasthānas* are considered equally important in the study of all the systems of religion. First of all there are the Revelations, the *Śrutis*, by which I mean the *Upaniṣads* . Secondly, among our philosophies, the *Sūtras* of *Vyāsa* have the greatest prominence on account of their being the consummation of all the preceding systems of philosophy. These systems are not contradictory to one another, but one is based on another, and there is a gradual unfolding of the theme which culminates in the *Sūtras* of *Vyāsa*. Then, between the *Upaniṣads* and the *Sūtras,* which are the systematising of the marvellous truths of the *Vedānta,* comes in the *Gītā* the divine commentary of the *Vedānta.*"

In the light of the above reconciliatory vision of Swami Vivekananda, our University bearing Swamiji's hallowed name, organized a National Seminar: *Vedānta Darśana Vākyārtha Sabhā,* on 19 and 20 February 2010 on the occasion of the birth anniversary of Sri Ramakrishna to discuss the *prasthāna-traya - Upaniṣads, Brahma Sūtras* and *Bhagavad-Gītā,* as interpreted by the great *Acāryas* of the *Advaita, Viśiṣṭādvaita* and *Dvaita* traditions as well as a reconciliation of these systems in the light of Ramakrishna-Vivekananda *Vedānta* thought. The entire deliberations—the talks and the interactions—were fully in Sanskrit followed by an interpretation in summary form in Bengali at the end of each deliberation. The two-day seminar was divided into four sessions; the first three sessions were

[1]Swami Vivekananda's Complete Works, 5.104

devoted respectively to *Advaita, Viśiṣṭādvaita, Dvaita* and the last and concluding session to the harmonious reconciliation of these three systems in the light of Ramakrishna-Vivekananda teachings.

The seminar was attended by faculty members and students from several Universities and colleges in West Bengal and the resource persons were eminent Professor-scholars who were specialists in the three *Vedānta* traditions. These eminent scholars spoke in simple and powerful Sanskrit and listening to them speak in mellifluous Sanskrit was in itself an elevating experience, particularly because we rarely get a chance to listen to Sanskrit speeches and that too for two full days. The interactions among the scholars as well as between the scholars and the audience were lively and enlightening. The spirit of harmony that permeated the whole seminar held at Vidyamandira in the holy precincts of Belur Math could be felt palpably by all those present. The entire proceedings of the seminar were video-taped and some of the papers in the present volume is based on this record. In being able to bring out this volume, albeit belated, we feel particularly blessed, more so because this volume is seeing the light of day on the occasion of Swami Vivekananda's 150th birth anniversary. May this maiden effort in studying and harmonizing the three great *Vedāntic* traditions—a monumental contribution of India to world thought—encourage many more Universities and centres of learning to take up similar efforts and may this humble endeavour inspire the present and future generations of students and scholars to take up the study of and research into *Vedānta* in a big way is our earnest prayer.

Swami Atmapriyananda
Vice Chancellor

Belur Math
7 June 2013
(Sacred day of *Ṣoḍaśī Pūjā* )

# प्रमाणविषये पूर्वमीमांसा-विशिष्टाद्वैतसिद्धान्तयोः विमर्शः

का.ई.देवनाथन् †

पूर्वमीमांसायां प्राभाकराणां भाट्टानां च सिद्धान्ताः बहुत्र परस्परं विरुद्धाः इति प्रसिद्धम्। परन्तु तेषां सिद्धान्ताः विशिष्टाद्वैतसिद्धान्तैः सह प्रमाणविषये क्वचिदेकरूपाः क्वचिद् विरुद्धाश्च भवन्तीति च प्रसिद्धमेव। अस्मिन् निबन्धे यत्र यत्र विषये पूर्वमीमांसायाः विशिष्टाद्वैतस्य च साम्यमस्ति, यत्र वा वैषम्यं वर्तते, तदुभयमपि प्रदर्श्यते।

## १. ज्ञानलक्षणम्

### १.१ भाट्टाः

'सर्वव्यवहारकारणं बुद्धि'रिति[1] बुद्धिं लक्षयन्ति भाट्टाः। इयं हि तेषां प्रक्रिया— ज्ञानमात्मगुणः, तत् स्वसामग्र्या जन्यते। तच्च ज्ञानं सकर्मकम्। ज्ञानेन स्वकर्मणि विषयेऽतिशयः कश्चित् जन्यते, यः ज्ञाततप्राकट्यप्रकाशप्रभृतिशब्दैरभिधीयते। तेनातिशयेन प्रत्यक्षभूतेन ज्ञानमतीन्द्रियमनुमीयते। उक्तं च श्लोकवार्तिकव्याख्यायां न्यायरत्नाकरे[2] 'ज्ञानजन्योऽर्थगतः कश्चिदतिशयः प्रकाशभासनादिपर्यायवाच्यः। स च पाकजन्यौदनगतातिशयवदनवगतेऽपि ज्ञाने शक्यतेऽवगन्तुम्। अतो ज्ञानस्य कल्पकः' इति। इदमनुमानमत्र विवक्षितं यद्घटः, घटत्वप्रकारकज्ञानविषयः, घटत्वप्रकारकज्ञाततावत्त्वात् इति।

मानमेयोदयकारः नारायणभट्टः अर्थापत्त्या बुद्धेरनुमानं प्रतिपादयति।[3] ज्ञानस्य स्वप्रकाशत्वं प्राभाकराभिमतं च एतैरनुमानैः निराकरोति। 'संवेदनं स्वप्रकाशं न भवति वस्तुत्वात्, घटवत्' 'विप्रतिपन्नो व्यवहारः स्वविषयसंवेदननिबन्धनः, व्यवहारत्वात्, संप्रतिपन्नव्यवहारवत्' (अत्र विप्रतिपन्नव्यवहारपदेन ज्ञानविषयकव्यवहारो विवक्षितः) 'संवेदनव्यवहारः संवेदनसंवेदननिबन्धनः, संवेदनव्यवहारत्वात्, परगतसंवेदनव्यवहारवत्[4] इति।

†आचार्यः, विशिष्टाद्वैतवेदान्तविभागस्य, तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्य।

[1] त.सि.र.४९

[2] न्या.र.६४

[3] मा.मो.२४८

[4] मा.मे.२५०

### १.२ प्राभाकराः

ज्ञानं स्वप्रकाशमेतेषां मते। यदि ज्ञानस्य स्वप्रकाशता नाङ्गीक्रियते तदा ज्ञाने उत्पन्नेऽपि विषयेषु ज्ञातत्वव्यवहारो न स्यात्। ज्ञानस्य स्वप्रकाशत्वाभ्युपगमे ज्ञानव्यवहारार्थं ज्ञानान्तरापेक्षा न भवतीति लाघवम्। न च विषयाणामेव स्वयंप्रकाशत्वं स्वीक्रियताम् इति वाच्यम्, विषयाणां स्थिरत्वात् स्वापादिदशाया एव अभावप्रसङ्गात्। ज्ञानस्य स्वप्रकाशत्वादेव प्राथमिकं ज्ञानमेव मातृ-मिति-मेयविषयकम् 'अहं घटं जानामी'तिरूपं स्वीक्रियते। सर्वाश्च प्रतीतयः स्वयंप्रत्यक्षाः प्रकाशन्ते। तेन तासां स्वात्मनि युक्तमेव, प्रत्यक्षत्वं, प्रमाणत्वं च[5] इति प्रकरणपञ्चिकायामेतदेव स्थापितम्।

### १.३ विशिष्टाद्वैतिनः

एतेषां मते सर्वं ज्ञानं यथार्थम् इति स्वीक्रियते। ख्यातिविषये पूर्वमीमांसकानां विशिष्टाद्वैतिनां च मतभेदः परस्ताद् विचार्यते। 'कस्यचिद् व्यवहारानुगुण्ये निरपेक्षहेतुत्वं ज्ञानत्व'मिति न्यायसिद्धाञ्जने वेदान्तदेशिकाः। अयमर्थः— व्यवहारानुगुण्यं नाम व्यवहारकर्मत्वं, घटादेः विषयस्य व्यवहार्यत्व इतरनिरपेक्षहेतुः ज्ञानमेव। इन्द्रियादीनि तु सहकारीण्येव। इदं ज्ञानं स्वव्यवहारेऽपि असाधारणकारणम् इति स्वप्रकाशमेव। भाष्यकारैरपि 'स्वसत्तयैव स्वाश्रयं प्रति कस्यचिद्विषयस्य प्रकाशनं हि संवेदनम्' इति भाषितम्। वेदान्तदेशिकाः 'ज्ञानं स्वप्रकाशं धीत्वाद् बुद्धिलक्षणधीवत् सर्वज्ञधीवद्वा' इत्यनुमानं तत्त्वमुक्ताकलापे प्रदर्शयन्ति। अयमर्थः— बुद्धिलक्षणज्ञानं सर्वबुद्धिविशेष्यक-असाधारणधर्मप्रकारकं सत् सर्वान्तर्गतलक्षणज्ञानमपि विषयीकरोति तथा सर्वज्ञस्य भगवतो बुद्धिः स्वविषयिणीति स्वीकार्यम्। एवं च ज्ञानस्य स्वप्रकाशत्वे अनुमानमेव प्रमाणम् इति। न च अङ्गुल्यग्रस्य स्वात्मस्पर्शवत् बुद्धेः स्वविषयकत्वविरोधात् न स्वप्रकाशत्वमिति वाच्यम्, यथा आत्मा ग्राहकः, ग्राह्यश्च यथा वा घटादिः प्रत्यक्षे विषयः, तस्य जनकश्च तथा ज्ञानस्य स्वपरनिर्वाहकत्वेन स्वविषयकत्वे विरोधाभावात्। मानमेयोदयादिषु यज् ज्ञानस्वप्रकाशत्वदूषकानुमानमुक्तम्, तदप्रयोजकम् इति मन्तव्यम्। अतः ज्ञानं स्वप्रकाशमेव।

## २. ख्यातिविचारः

### २.१ भाट्टाः

भाट्टमते अनधिगताबाधितार्थविषयकं ज्ञानं प्रमेत्युच्यते। अप्रमायाः विपरीतख्यातिरिति नाम। अन्यस्य अन्यरूपेण प्रतीतिः विपरीतख्यातिः। न च भेदाग्रहसहितात् ग्रहणस्मरणात्मकज्ञानद्वयादेव रजतार्थिनः शुक्तौ प्रवृत्तिरुपपद्यत

[5] प्र.प.१७०

इति किमर्थं विशिष्टज्ञानम् अन्यथाख्यातिरूपं स्वीकार्यम् इति वाच्यम्, इदंत्वाभिमतवस्तुविशेष्यकरजतत्वप्रकारकज्ञानमन्तरा पुरोवर्त्तिविशेष्यकरजतत्वप्रकारकेच्छा न भवेदिति कथं तादृशविसंवादिप्रवृत्तेः सम्भव इति आक्षेपसम्भवात्। न च रजतत्वेन इदमर्थस्याज्ञानेऽपि भेदाग्रहादेव प्रवृत्तिरिति वाच्यम्, तथात्वे अभेदाग्रहेण निवृत्तेरप्यापत्तेः। उक्तं च वार्तिके

तस्माद् भ्रान्तिरपि त्वेषां कल्पयत्यर्थमेव नः।
कल्पयत्यन्यथासन्तं न त्वात्मानं व्यवस्यति॥
ततश्च बाधकज्ञानात् वाचोयुक्तिरियं भवेत्।
अर्थेऽन्यथापि सत्येष धियाकारः प्रतीयते॥[6]

शास्त्रदीपिकाकाराः अन्यथाख्यातौ संसर्गिणः सत्याः, संसर्गमात्रमसदेव भासते इति वदन्ति। 'सर्वत्र संसर्गमात्रमसदेवावभासते। संसर्गिणस्तु सन्त एव। सेयं विपरीतख्यातिरुच्यते मीमासंकैः। शुक्तिरजतवेदनेऽपि विमानैव रजतत्वजातिः विमानस्यैव शुक्तिशकलस्य अनात्मभूतैव आत्मतया अवगम्यत' इति[7]।

## २.२ प्राभाकराः

अनुभूतिः प्रमा। अतः अयथार्थभूतोऽनुभव एव नास्ति, अनुभवसामान्यस्य प्रमात्वात्। नयवीथ्यां शालिकनाथेनोक्तम्

यथार्थं सर्वमेवेह विज्ञानमिति सिद्धये।
प्रभाकरगुरोर्भावः समीचीनः प्रकाश्यते॥[8]

अयं हि तेषां सिद्धान्तः। इन्द्रियादीनां ज्ञानकरणानां प्रमाजननस्वभावत्वात् दोषसहकारेणापि तैः भ्रमजननासम्भवः। इदं रजतमिति रजतस्मरण-पुरोवर्तिग्रहणात्मकं ज्ञानद्वयमेव। तयोः ज्ञानयोर्द्वित्वाग्रहः।

एवं विषययोः रजतपुरोवर्तिनोरपि भेदाग्रहः। तादृशाग्रहसहितं ज्ञानद्वयमेव प्रवर्तकमिति स्वीक्रियते। अन्यथाख्यातिवादे विशिष्टज्ञानस्य हेतुत्वेन ग्रहणस्मरणयोः स्वीकारात्, तादृशज्ञानद्वयेनैव विसंवादिप्रवृत्त्युपपत्तौ किं मध्ये विशिष्टज्ञानस्य भ्रमस्य कल्पनेन? तद्धेतोरेवास्य तद्धेतुत्वे मध्ये किं तेनेति न्यायात्। सर्वस्य ज्ञानस्य प्रमात्वेऽपि यथार्थायथार्थप्रवृत्तिजनकत्वेन ज्ञानयोः प्रमात्वभ्रमत्वव्यवहारः। भ्रमस्थल इव प्रमास्थलेऽपि भेदाग्रहसहितज्ञानद्वयमेव भेदाग्रह एव वा प्रवर्तकम् इति तत्सिद्धान्तः। उक्तं हि

नन्वेवं रजताभासः कथमेष घटिष्यति।
उच्यते शुक्तिशकलं गृहीतं भेदवर्जितम्॥
शुक्तिकाया विशेषा ये रजताद्भेदहेतवः।

[6]श्लो.वा. ३२८
[7]शा.दी.५८
[8]प्र.प.४३

तेन ज्ञाता अभिभवाज्ज्ञाता सामान्यरूपता॥
अनन्तरं च रजते स्मृतिर्जाता तथापि च।
मनोदोषात् तदित्यंशपरामर्शविवर्जितम्॥
रजतं विषयीकृत्य नैव शुक्तेः विवेचितम्।
स्मृत्याऽतो रजताभास उपपन्नो भविष्यति॥[9]

अत्र हि कथमिदं रजतमिति ज्ञानद्वयस्थले रजतस्मृतिः सम्भवतीति निरूपितम्। प्रथमं शुक्त्यसाधारणधर्माग्रहणम्। ततः सामान्यरूपग्रहणम्, ततः रजतस्य तत्तांशप्रमोषेण स्मरणं भवतीति प्रक्रिया। अन्यस्यान्यथाभानं हि प्रतीत्या पराहतम्। अन्यस्यान्यथाभाने सति सर्वोऽपि पदार्थः अविशेषेण सर्वस्य ज्ञानस्य विषयः स्यात्। अतः यद् भासते ज्ञाने तत् तस्य विषय इत्येव स्वीकार्यम्।

## २.३ विशिष्टाद्वैतिनः

विशिष्टाद्वैतिनां मते यथार्थं सर्वविज्ञानमिति स्वीकृतम्। परन्तु प्राभाकरमताद्विशेषः अयं यत्, प्राभाकरमते इदं रजतमिति ज्ञानद्वयं स्वीक्रियते। एते हि तज्ज्ञानमेकमेवेति सिद्धान्तयन्ति। शुक्तौ त्रिवृत्करणप्रक्रियया रजतांशानां सत्त्वात् दोषेण शुक्त्यंशाग्रहणे सति विमानरजतांशग्रहणं 'इदं रजतमि'ति एकमेव ज्ञानमिति स्वीकर्तुं शक्यते। त्रिवृत्करणं हि 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' इति श्रुत्या, 'नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना। समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः॥' इत्यादिस्मृत्या च निरूपितम्। सर्वत्र सर्वांशसद्भावेऽपि यद्भूतांशा यत्राधिका भवन्ति, तत्र तद्व्यपदेशः। अतः अबादौ पृथिव्यांशानां न्यूनत्वात् पृथिव्यादिव्यपदेशाः न भवन्तीति स्वयमुक्तं सूत्रकारेण 'त्र्यात्मकत्वात्तु भूयस्त्वात्' इति। एवं श्रुतिस्मृतिसूत्रपर्यालोचनया चेदमपि निश्चितम् यद् 'यत्र पदार्थे यदंशसत्तानिबन्धनौ यादृशप्रतीतिव्यवहारौ तद्भिन्नपदार्थे च तदंशसत्ताबलेन तादृशप्रतीतिव्यवहारौ कदाचित् जायमानौ प्रामाणिकौ' इति।

## २.४ पूर्वमीमांसकसम्मतिः

'यदि सोमं न विन्देत पूतीकानभिषुणुयात्' इति श्रुतिः। सोमलतायाः साधनत्वं सोमेन यजेतेति वाक्येनावगतम्। सोमावयवानां सर्वेषां साधनत्वमवगतम्। भूयः सोमावयवकसोमव्यक्त्या यागानुष्ठानं कर्तव्यम्, तदलाभे कतिपयसोमावयवशालिद्रव्यान्तरे ग्राह्ये पूतीकविधिरयं पूतीकनियमं दर्शयति। एवं व्रीह्यलाभे नीवारग्रहणम् उपपाद्यते। अयं भावः— सदृशद्रव्येषु मुख्यद्रव्यावयवसद्भावः, तादृशावयवार्थतया मुख्यद्रव्यवाचिशब्दप्रयोगस्य युक्तत्वं सिद्ध्यति। 'सामान्यं तच्चिकीर्षा हि'[10] इत्यादि

[9] प्र.प.४९-५०
[10] मीमांसासूत्रं ६-३-२७

सूत्रभाष्यशास्त्रदीपिकादौ एतत् स्पष्टम्। श्रीभाष्ये हि कथितम्—

सोमाभावे च पूतीकग्रहणं श्रुतिचोदितम्।
सोमावयवसद्भावात् इति न्यायविदो विदुः॥ इति।

यत्र एकभूतकार्ये भूतान्तरकार्यसादृश्यप्रतीतिः, तत्र त्रिवृत्करणोपयोगः, यथा शुक्तिः पृथिवी, रजतं तैजसमिति, तत्र शुक्तौ रजतसादृश्यानुभवः अन्यत्रेव रजतगतरजतावयवसद्भावमूल एव। तथा च रजते तेजोद्रव्यं यादृशशुक्लभास्वरपरिणामं प्राप्य वर्तते, तथैव शुक्तौ अपि त्रिवृत्कृतपृथिव्यन्तर्गततेजोभागः तादृशपरिणामः वर्तत इति ततः तत्र सादृश्यप्रतीतिः। सोमपूतीकस्थले सोमपूतीकयोरुभयोरपि एकभूतकार्यत्वात् त्रिवृत्करणं नोपयुज्यते।

शुक्तौ रजतांशसत्त्वम्। न च शुक्तेः दाहे स्वल्पोऽपि रजतांशः नोपलभ्यते इति कथं शुक्तौ रजतांशसम्भव इति वाच्यम्, शुक्तौ रजतांशसद्भावस्य प्रमाणसिद्धत्वात्। ओषधिविशेषसम्पर्काद् रजतादेरपि भस्मीभावो लक्ष्यते। तद्वद्विलक्षणशुक्तिशकलान्तर्गताः रजतांशा अपि ईदृशोपायैः पृथक्करणार्हा भवन्ति। विजातीयद्रव्योपश्लेषबलाद्दाहे स्वरूपं विहाय रूपान्तरं प्रापितं भवेत्। पार्थिवतेजोभाग एव किलैवं स्थित इति ब्रूमः। स स्वां प्रकृतिं दाहे प्राप्नोतीति युक्तो दाहवशाद्रजतालाभः रजतत्वजातेरवयवेषु सर्वेषु वर्तमानत्वाद्रजतांशानां शुक्तौ सत्त्वे दोषाभावश्च।

अयमत्र सारः— सर्वं ज्ञानं यथार्थमिति प्रतिज्ञा। शुक्तिरजतादिस्थले विशिष्टज्ञानस्य यथार्थत्वं वक्तुं शक्यते। देहात्मप्रत्ययस्य यथार्थत्वं त्रिवृत्करणादिना वक्तुं न शक्यते, अतः तत्राख्यातिरेव। तावतापि सर्वं ज्ञानं यथार्थमिति सिद्धान्तस्य नापवादः। इदं रजतमिति ज्ञानस्य बाध्यत्वं नाम बाध्यप्रवृत्तिकत्वमेव। कार्याक्षमत्वाग्रहसहितं रजतज्ञानमेव विसंवादिप्रवृत्तौ हेतुः। अख्यातिसंवलितयथार्थज्ञानमिति सिद्धान्तः।

प्राभाकरमते इदं रजतत्वेन जानामीति ज्ञानस्य निर्वाहः दुःशकः। अन्यथाख्यातिवादे इदमर्थविशेष्यकरजतत्वप्रकारकस्य ज्ञानस्य प्रसिद्धत्वाद्दोषाभावः। विशिष्टाद्वैतिनां मतेऽपि नानुपपत्तिः इदमर्थविशेष्यकरजतत्वप्रकारकज्ञानस्य यथार्थत्वात्। न च रजतत्वप्रकारकत्वसंसर्गग्रहसहितरजतत्वप्रकारकत्वस्मरणादिरूपः इदं रजतत्वेन जानामीति प्रत्यवमर्शः इति वाच्यम्, तथात्वे इदं रजतमिति ज्ञानस्येवास्यापि प्रत्यवमर्शस्य भ्रान्तित्वापातात्। नेष्टापत्तिः, न हि शुक्तौ रजतभ्रमानन्तरं विशेषदर्शिनां ‘नेदं रजतमि'ति बाधनिश्चयवत् उक्तप्रत्यवमर्शानन्तरं ’शुक्तिज्ञानं न रजतत्वप्रकारकम्' इति कस्यापि बाधनिश्चयो जायते। येन तस्यापि भ्रान्तित्वं स्वीक्रियेत। न च भिन्नज्ञानीयविषयतयोः निरूप्यनिरूपकभावस्येष्टत्वात् स्मरणीयरजतत्वप्रकारतानिरूपित-इदमर्थविशेष्यताशालिज्ञानमेव तस्य (इदं रजतत्वेन जानामीति) प्रत्ययस्य विषय इति वाच्यम्। ‘इदं रजतत्वेन अन्वभूवम्’ इत्यत्र रजतत्वप्रकारताशाल्यनुभवस्याप्रसिद्धत्वात् तावतापि ज्ञानद्वयस्वीकर्तृप्राभाकरमते अनुपपत्तेः तदवस्थत्वात्।

### २.५ स्वप्नः

ननु स्वप्नस्य सत्यविषयकत्वे स्वप्नजागरज्ञानयोरविशेषात् 'वैधर्म्याच्च न स्वप्नादिवत्' इति[11] भगवता बादरायणेन स्वप्नजागरयोः वैधर्म्यवर्णनं कथं संगच्छेतेति चेन्न, स्वप्नपदार्थस्य सत्यत्वानभ्युपगमेन सूत्रकारेण तथा वर्णनात्। तथाहि— विज्ञानाकारव्यतिरेकेण बाह्यपदार्था न सन्तीति पूर्वपक्षः तत्र कृतः। तेषां मते तत्समाधानमिदं सूत्रम्। स्वप्ने बाह्यपदार्था न सन्तीति पूर्वपक्षिणः सम्मतम्, वेदान्तिनामपि इष्टमेव। अयं भेदः— वेदान्तिमते ते आन्तरपदार्थाः सत्याः। बौद्धमते तु ते असत्या इति एवं च पराभ्युपगतं वैधर्म्यं दृष्टान्तीकर्तुं शक्यमेवेति यावत्। किञ्च 'स्वप्नादिवत्' इति आदिपदं प्रयुञ्जानः सूत्रकारः पूर्वपक्ष्युक्तमसत्यविषयकत्वं स्वप्नस्य अभ्युपगम्य स्वप्नवैधर्म्यं वदन्नपि आदिपदग्राह्यमायादिस्थलान्येव मुख्यवैधर्म्योदाहरणत्वेन मन्यते इति सुवचम्। किञ्च श्रुतिप्रामाण्यानङ्गीकारिबौद्धस्य पूर्वपक्षे श्रुतिसिद्धं स्वप्नसत्यत्वं समाश्रित्य समाधानं नोचितम्। इत्थं सूत्रनिर्वाहः सुशकः।

केचिद्विशिष्टाद्वैतिनः अन्यथाख्यातिमपि स्वीकुर्वन्ति इति प्राचीनग्रन्थेभ्यो ज्ञायते।

## ३. निर्विकल्पकस्वरूपम्

प्रत्यक्षं द्विविधं निर्विकल्पकं सविकल्पकं चेति। तत्र विचारः क्रियते।

### ३.१ भाट्टाः

'सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म, तत्प्रत्यक्षमनिमित्तं विमानोपलम्भनत्वात्' इति मीमांसासूत्रम्। तेन इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमिति लभ्यते। एतस्य लक्षणस्य भ्रमेऽतिव्याप्तिः तत्रापि इन्द्रियसन्निकर्षजन्यत्वस्य सत्त्वादिति तत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म, सत् प्रत्यक्षमिति तत्सतोः व्यत्ययः कृतः। अत्र तत् इति तृतीयान्तमव्ययम्।[12] गागाभट्टस्तु जन्यज्ञानजन्यमात्रवृत्तिजातिशून्यज्ञानत्वम् [13] इति प्रत्यक्षं लक्षयति। एवं स्थिते निर्विकल्पकस्वरूपं विशोध्यते। नामजात्यादिविशेषणानवगाहिसंमुग्धाकारं ज्ञानं निर्विकल्पकम्। तत् बालानां मूकादीनां च केनचित् वस्तुना इन्द्रियसन्निकर्षे सति जायमानं प्रसिद्धं भवति। उक्तं श्लोकवार्तिके

अस्ति ह्यालोचनाज्ञानं प्रथमं निर्विकल्पकम्।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्॥
न विशेषो न सामान्यं तदानीमनुभूयते।

---

[11] ब्र.सू.२.२.२८
[12] शा.दी.४८
[13] भा.चि १५

तयोराधारभूता तु व्यक्तिरेवावगम्यते॥[14]

अयं भावः— 'शुद्धवस्तुजम्' जात्यादिवैशिष्ट्यानवगाहि वस्तुमात्रविषयकम् इत्यर्थः। विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वमेतेषां मते स्वीक्रियते। 'न विशेष' इत्यनेन जातिप्रभृतिः निर्विकल्पके विषय एव न भवति। केवलं व्यक्तिरेव विषय इति आपाततः प्रतीयते। परन्तु प्रतीमो हि वयमक्षसन्निपातानन्तरम् अविभक्तसामान्यविशेषणविभागं संमुग्धवस्तुमात्रगोचरमालोचनाज्ञानम्। तदभावे तु विकल्प एव न जायेत। विकल्पयता हि पूर्वानुभूतं जातिविशेषं संज्ञाविशेषं चानुस्मृत्य तेन पुरःस्थितं वस्तु विकल्पयितव्यम् इत्यादि शास्त्रदीपिकाग्रन्थपरिशीलनेन[15] जात्यादिकं व्यक्तिश्च स्वरूपतः विशेषणविशेष्यभावं विना भासेते इति लभ्यते।

## ३.२ प्राभाकराः

प्राभाकरमते साक्षात्प्रतीतिः प्रत्यक्षम् इति स्वीक्रियते। सा प्रतीतिः द्विविधा सविकल्पाविकल्पभेदेन।

सविकल्पाऽविकल्पा च प्रत्यक्षा बुद्धिरिष्यते।
आद्या विशिष्टविषया स्वरूपविषयेतरा॥[16]

इति प्रकरणपञ्चिका। एतन्मते निर्विकल्पकं जात्यादेः स्वरूपमात्रविषयकं ज्ञानम्। अर्थात् जातिः गुणः, द्रव्यम् इत्यादिकं स्वरूपतो निर्विकल्पके भासते। तस्यां दशायाम् अनुवृत्तत्वं, व्यावृत्तत्वमित्यादिकं न विषयीक्रियते। तादृशव्यक्त्यन्तरस्य पूर्वमननुसंहितत्वात्। उक्तं च तन्त्ररहस्ये निर्विकल्पकं स्वरूपविषयम्। प्रथमं हि स्वरूपमात्रज्ञानं जायते द्रव्ये गुणे जातौ वा। तस्यां दशायां वस्त्वन्तरानुसन्धानशून्यतया जातेः अनुवृत्तिव्यावृत्तिबुद्धिः न भवति इति। तत्रत्यग्रन्थसन्दर्भोऽयम् — "तत्राद्यं स्वरूपविषयम्। तथाहि इन्द्रियसम्प्रयोगानन्तरं प्रथमं द्रव्यगुणजातिषु स्वरूपमात्रज्ञानं जायते। तस्य च न द्रव्यमात्रं विषयः। जातिगुणयोरप्यवभासात्। अतः योग्यं सर्वमपीति निर्विकल्पकम् स्वरूपविषयम्"[17] इति।

अयं भावः— भाट्टमते जात्यादिः विशेषणविशेष्यभावं विना निर्विकल्पके भासते। प्राभाकरमते तु जात्यादिः सामान्यात्मना भासते, नेतरव्यावृत्तत्वेन, नापि पूर्वव्यक्तिवृत्तित्व-विशिष्टैतद्व्यक्तिवृत्तित्वरूपानुगतत्वेन वा- इति विशेषः।

## ३.३ विशिष्टाद्वैतिनः

निर्विकल्पकं निष्प्रकारकं ज्ञानमिति भाट्टतार्किकयोः सिद्धान्तः न युक्तः। सर्वं ज्ञानं

---

[14]श्लो. वा.१४७,१४८

[15]शा.दी. ४०

[16]प्र.प. १६०

[17]त.र.९

सप्रकारकमेवेति सिद्धान्तात्। जात्यादिविधुरतया वस्तुमात्रस्य प्रतिभासो न सम्भवति। न्यायमणौ घटादेरनुल्लिखितानुवृत्तिधर्मघटत्वादिकतिपयविशेषणविशिष्टतयार्थावच्छेदकं लक्षितम्। वेदान्तदेशिकैः 'संस्कारनिरपेक्षेन्द्रियजन्यं ज्ञानं निर्विकल्पकम्' इति न्यायपरिशुद्धौ निरूपितम्। भाष्ये 'निर्विकल्पकं नाम केनचिद्विशेषणेन वियुक्तस्य ग्रहणम्' इति कथितम्। अयं भावः— इन्द्रियसन्निकर्षेऽविशिष्टे व्यक्तिमात्रं प्रथमं गृह्यते न जात्यादिरिति पक्षो वा, व्यक्तिजात्यादि गृह्यते, परन्तु तेषां परस्परं संसृष्टतया ग्रहणं प्रथमं न भवतीति पक्षो वा न युक्तः। अतः प्रथमं विशेषणविशिष्टमेव वस्तु गृह्यते, परन्तु गोत्वादेः संस्थानस्यानुवृत्तत्वांशो न गृह्यते, पूर्वं तादृश व्यक्त्यन्तरस्यागृहीतत्वात् इति वक्तव्यम्। अत्र गोत्वादिसंस्थानवत् रूपादेरपि प्रथममग्रहणं, परस्तात् सविकल्पे भानं च युज्यत एव। निर्विकल्पकमिति शब्दस्य 'प्रकारताशून्यम् ' इत्येव यथाश्रुतार्थः, तर्हि कथं तस्य सप्रकारकत्वमित्युक्तमिति न च शङ्क्यम्। अल्पधने पुरुषे धनसामान्याभाववत्परस्य दरिद्रशब्दस्य प्रयोगवत् सप्रकारकेऽपि निर्विकल्पके तच्छब्दप्रयोग उपपद्यते। इतः परं निष्प्रकारकज्ञानस्वीकारः भाट्टादीनां यः, स नोपपन्न इति प्रतिपत्तेः।

यदुक्तं मीमांसकैः बालमूकादिविज्ञानं निर्विकल्पकम् इति, तन्न, तद्गतगुणादि-विशिष्टाविषयकमेव तेषां विज्ञानम्। तज्ज्ञानं यद्यपि संज्ञाविकल्परहितम् तथापि जात्यादिविशिष्टविषयकं नेति वक्तुं न शक्यते। अन्यथा इदं हेयम् इदमुपादेयम् इति विवेकपूर्वकं तेषां प्रवृत्तिः न स्यात्। इष्टसाधनताज्ञानेन स्तन्यपानादौ प्रवृत्तिः वक्तव्या। तच्च ज्ञानं निर्विकल्पकरूपमिति न सुवचम्।

ननु गौरिति विशिष्टज्ञानं विशेषणज्ञानजन्यम्, विशिष्टज्ञानत्वात् सुरभि चन्दनम् इत्यादिविशिष्टज्ञानवत् इत्यनुमानेन विशेषणज्ञानरूपेण निर्विकल्पकं सिद्ध्यति। अत्र ईश्वरज्ञानमादाय सिद्धसाधनवारणाय विशेषणज्ञाननिरूपितकार्यत्वव्याप्य-धर्मावच्छिन्नकार्यत्ववत्त्वम् साध्यं पर्यवसितम्। स्वाव्यवहितोत्तरत्व-स्वसामाना-धिकरण्योभयसम्बन्धेन विशेषणज्ञानविशिष्टत्वं वा तत्। एतेनानुमानेन विशेषणज्ञानस्य सिद्धौ तस्यापि सप्रकारकत्वेऽनवस्थाप्रसङ्गात् तुरीयविषयताशालि तत् निष्प्रकारकं ज्ञानं स्वीकार्यमिति। न च 'विशिष्टज्ञानत्वं' हेतुः तत्र ज्ञानत्वमात्रस्य निवेशे को दोषः, निर्विकल्पके हेतुभूतज्ञानत्ववति विशेषणज्ञानपूर्वकत्वरूपसाध्याभावाद् व्यभिचार इति तु वक्तुं न शक्यम्, उक्तानुमानेन निर्विकल्पकसिद्धेः पूर्वं व्यभिचारज्ञानाभावात्, निर्विकल्पकसिद्ध्यनन्तरं व्यभिचारज्ञानमबाधकमेव, अनुमितेः जननानन्तरम् अनुमितौ व्यभिचारिलिङ्गकत्वेन अप्रामाण्यमनुमीयत इत्यपि न सुवचं, प्रमेयत्वलिङ्गिकायां पर्वते वह्न्यनुमितेः प्रमात्वदर्शनात्, तथा च विशिष्टज्ञानत्वादित्यत्र विशिष्टपदं व्यर्थमिति वाच्यम्, ज्ञानत्वं यदि विशेषणज्ञानपूर्वकत्वव्याप्यं स्यात् तर्हि अनवस्था स्यादिति तर्केण ज्ञानत्वे विशेषणज्ञानपूर्वकत्व-व्याप्तिज्ञानप्रतिबन्धादनुमित्यसम्भवात् विशिष्टविषयकत्वदलस्य सार्थक्यात्, तथा च

निष्प्रकारकरूपं निर्विकल्पकमनुमानेन सिद्ध्यतीति चेन्न, उक्तानुमानस्याप्रयोजकत्वात्। विशेषणाग्राहकेन्द्रियग्राह्यविशेष्यकत्वस्योपाधित्वम्। यत्र यत्र विशेषणज्ञानपूर्वकत्वं सुरभि चन्दनमित्यादिज्ञाने, तत्र विशेषणाग्राहकचक्षुर्ग्राह्यविशेष्यकत्वस्य सत्त्वात् साध्यव्यापकत्वम्, पक्षे गौरित्यादिज्ञाने विशेषणाग्राहकेन्द्रियग्राह्यविशेष्यकत्वस्याभावात् साधनाव्यापकत्वम् इति। सुरभि चन्दनम् इति स्थले चक्षुषः विशेषणाग्राहकत्वं नाम सौरभनिष्ठलौकिकविषयताशालिप्रत्यक्षाजनकत्वम् एव। अयं भावः— यत्र विशेषनणविशेष्ययोः एकसामग्रीवेद्यत्वं तत्र विशेषणविशेष्ययोः युगपदेव ग्रहणसम्भवात् विशिष्टज्ञानस्य विशेषणज्ञानपूर्वकत्वं न वक्तव्यमिति। प्रथमाक्षसन्निपातजन्या बुद्धिः विशिष्टविषयिणी, बुद्धित्वात्, संप्रतिपन्नवत् इत्यनुमानेन प्राथमिकज्ञानस्य सप्रकारकत्वं साध्यते। एवं च विशिष्टाद्वैतिनां सिद्धान्ते संस्कारनिरपेक्षेन्द्रियजन्यज्ञानं निर्विकल्पकम्, संस्कारसापेक्षेन्द्रियजन्यज्ञानं सविकल्पकम् इति निर्णयः।

# ४. अनुमानम्

## ४.१.१ भाट्टाः

व्याप्यदर्शनात् असन्निकृष्टार्थज्ञानमनुमानम्। यथा पर्वते धूमवत्त्वदर्शनात् अग्निमत्त्वज्ञानम् इति मानमेयोदयः।[18] पर्वते ज्ञाते अग्नेरपि अन्यत्र ज्ञाने सति तयोः सम्बन्ध एव अनुमेय इति शास्त्रदीपिकाकारः। तथाहि

विशेषेऽनुगमाभावः सामान्ये सिद्धसाध्यता।
अनुमानभङ्गपङ्केऽस्मिन्निमग्ना वादिदन्तिनः॥

इति चार्वाका अनुमानाप्रामाण्यमाचिक्षिषुः। पर्वतीयवह्नौ साध्ये तेन च हेतोः व्याप्तिग्रहो नास्ति, वह्निसामान्येन हेतोः धूमस्य व्याप्तेः ग्रहणस्य सुशकत्वेऽपि वह्निसामान्यस्य पूर्वमेव सिद्धत्वात् तस्य साधने सिद्धसाधनदोष इति अनुमानमप्रमाणमेवेति अस्य श्लोकस्यार्थः। अस्य समाधानमेवमुक्तं शास्त्रदीपिकायाम् अग्निसामान्यस्य पूर्वं प्राप्तत्वेऽपि अग्निसामान्यनिरूपितव्याप्त्या पर्वतवह्निसम्बन्धः साध्य इति। यजुर्युक्तमध्वर्यवे ददातीत्यत्रेव प्राप्ताप्राप्तविवेकन्यायोऽत्र समाश्रीयते इति।

## ४.१.२ प्राभाकराः

यस्य सम्बन्धनियमो ज्ञातः तस्यैकस्य दर्शनादसन्निकृष्टे पदार्थे एकदेशान्तरे यज् ज्ञानं जायते तदेवानुमानम्। अत्र प्रकरणपञ्चिका

ज्ञातसम्बन्धनियमस्यैकदेशस्य दर्शनात्।
एकदेशान्तरे बुद्धिरनुमानमबाधिते॥

[18]मा. मे. २५

ज्ञातः सम्बन्धनियमो यस्य, तस्यैकदेशस्य दर्शनादेकदेशान्तरे असन्निकृष्टेऽर्थे या बुद्धिः, सानुमानमित्यर्थः[19] इति।

प्राभाकरमतेऽनुमानं गृहीतग्राहि कथ्यते। तथापि तस्य प्रमाणत्वम् आहुः। अनुभूतिः प्रमा इति प्रमाया लक्षणात्। तथाहि— 'नन्वेवं सम्बन्धनियमावसानसमय एव यावद्धूमादिभावितया वह्न्यादिसम्बन्धस्यावगतत्वात् धूमादिसत्तानिश्चयात् अधिकं निश्चेतव्यं नावशिष्यते इत्यनुमानमप्रमाणं स्यात्। सत्यम्, स्याद्यदि अनधिगतार्थगन्तृ प्रमाणमिति प्रमाणलक्षणं स्यात्। अनुभूतिस्तु प्रमाणमित्युक्तम्। धूमादग्निज्ञानमनुभावाकारप्रवृत्तं धारावाहिकवत्। न चात्र स्मृतिप्रमोषकल्पना प्रत्युत्पन्नकारणसम्भवात्। अनुभवकारणासम्भवेन शुक्तिकारणतादिषु स्मृतिप्रमोषः स्मृत्यनारूढोऽप्याश्रितः। इह तु सम्बन्धनियमस्मरणमेकदेशदर्शनं नानुभवकारणमस्तीति यथाप्रतीत्यनुभूतिरूपतैवाश्रयितुमुचितेति युक्तमेवानुमानस्य प्रामाण्यम्'[20] इति प्रकरणपञ्चिका स्पष्टमेव प्रतिपादयति यदनुमानं गृहीतग्राह्यपि प्रमाणं, नापि स्मृतिप्रमोषस्वीकार इत्यादिकम्।

## ४.१.३ विशिष्टाद्वैतिनः

व्याप्यस्य व्याप्यत्वानुसन्धाना व्यापकविशेषप्रतीतिरनुमानम्। अत्र अनुमानपदेनानुमितिः विवक्षिता। भाट्टादिमतवदत्रापि विशिष्टपरामर्शो न स्वीकृतः। अनुमानमप्रमाणमिति अनुमानेन वक्तुं न शक्यते, तस्यानुमानस्य प्रमाणत्वेऽनुमानाप्रामाण्यं न वक्तुं शक्यते, तस्यानुमानस्याप्रमाणत्वे कथं तेनानुमानप्रामाण्यं निषेद्धुं शक्यते इति 'विशेषेऽनुगमाभाव' इत्यादि चार्वाकप्रश्नस्योत्तरमेते एवं वदन्ति। तथाहि— अनुमानदूषणाय अनुमानस्य उपन्यासो न युक्तः। व्याप्तिः न सम्भवति नियमाभावादित्यपि वक्तुं न शक्यते, व्याप्त्यसम्भवेन नियमाभावस्य व्याप्तिरस्ति चेद् व्याप्तिः स्वीकृतेत्यायाति, यदि व्याप्तिर्नास्ति, नियमाभावेन व्याप्त्यभावः कथं साधयितुं शक्यते इति प्रत्युत्तरसम्भवात्। अतः 'सामान्यसिद्धव्याप्तिः हेतोः पक्षधर्मताख्यसहकारिसाहित्यात् साध्यविशेषमुपस्थापयतीति'[21] इति वेदान्तदेशिकसम्मतः सिद्धान्तः। भाट्टमतसाम्यं चात्र तैरेव कथितमस्ति 'स च साध्यस्य विशेषः पक्षसम्बन्धमात्रात्मा त्रय्यन्तविद्भिरिष्यते। तदतिरिक्तविशेषानुमाने त्वनुगमाभावविरोधादयो दोषाः स्युरिति'[22] इति वेदान्तदेशिकसम्मतः सिद्धान्तः। अत्र 'पक्षसम्बन्धमात्रात्मा' इत्यस्य विवरणं श्रीकृष्णताताचार्यैरेवं कृतं— मात्रपदेन इतरबाधसहकृतसामान्यधर्मावच्छिन्नव्याप्यवत्ताज्ञानाधीनविशेषभानस्य व्यवच्छेदः। लाघवज्ञानेन विशेषभानमिष्यत एव। अन्यथा तत्र विशेषधर्मावच्छिन्नविषयकसंशय-

---

[19] प्र.प.११६

[20] प्र.प.३४

[21] न्या.प.१५४

[22] न्या.प.१५६

निवृत्तेरसम्भवाद् अनुमितेः लघ्वर्थविषयकत्वस्यैव व्यर्थत्वापत्तेः। महानसीयेतर-वह्न्यभावज्ञानसहकृतवह्निव्याप्यवत्ताज्ञानेन महानसीयवह्न्यनुमितिः न स्वीक्रियते। परन्तु महानसीयेतरवह्न्यभाव-वह्निव्याप्य-उभयत्वावच्छिन्ने महानसीयवह्नि-व्याप्यताया अबाधात् तादृशव्याप्यवत्ताज्ञानेनैव महानसीयवह्न्यनुमितिः स्वीकार्या। विशेषभानाय इतरबाधसहकृत-सामान्यधर्मावच्छिन्नव्याप्यवत्ताज्ञानरूपा सामग्री भिन्ना न स्वीकार्या इति।

विशिष्टाद्वैतिनः अत्यन्तातीन्द्रियवस्त्वनुमानं नेच्छन्ति। अत एव ईश्वरादेरनुमानवेद्यत्वं नेष्टं तेषाम्।

## ४.२ केवलव्यतिरेकि-अनुमानम्

### ४.२.१ भाट्टाः

लिङ्गं त्रिविधम्- अन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि चेति। धूमाद् वह्न्यनुमानस्थले अन्वयेन व्यतिरेकेण व्याप्तिमान् हेतुः धूमः अन्वयव्यतिरेकी। ज्ञानं ज्ञानान्तरप्रकाश्यं वस्तुत्वात् घटवत् इत्यत्र वस्तुत्वहेतुः केवलान्वयी। तत्र व्यतिरेकसहचारो न प्रसिद्धः वस्तुत्वाभावस्याप्रसिद्धत्वात्। केवलव्यतिरेकि लिङ्गमवीतलिङ्गमिति यद्यपि भाट्टैः व्यवह्रियते, तथापि केवलव्यतिरेकिहेतुः नाङ्गीक्रियते कौमारिलैः। पृथिवी इतरेभ्यो भिद्यते गन्धवत्वाद् इत्यनुमानं हि केवलव्यतिरेक्यनुमानम् वक्तव्यं, तत्र हि पक्षे विशेषणस्य पृथिवीतरभेदाख्यस्य साध्यस्याप्रसिद्धत्वात् अनुमानमेव न प्रवर्तते। उक्तं च मानमेयोदये[23]

तं च कौमारिलाः प्रायो नेच्छन्ति व्यतिरेकिणम्।
क्वचित् प्रसिद्धमन्यत्र साध्यते ह्यनुमानतः॥ इति।

न च अनुभूतिः अननुभाव्या अनुभूतित्वात् इति केवलव्यतिरेक्यनुमानं सम्भवत्येव, अनुभाव्यत्वाभावस्य साध्यस्य अद्वैतिनां मते अनुभूतिरूपपक्षव्यतिरिक्ते कुत्रापि प्रसिद्धत्वाभावेऽपि अनुभाव्यत्वव्यतिरेकः विशकलिततया प्रसिद्धिविषय एवेति वाच्यम्, तस्याः प्रसिद्धेरनुपयुक्तत्वात्, साध्यतावच्छेदकविशिष्टसाध्यप्रसिद्धेरेवावश्यकत्वात्। एवं च तार्किकमते भाट्टमते त्रिविधं द्विविधं वा लिङ्गम् इति।

### ४.२.२ प्राभाकराः

एतेऽपि केवलान्वयि, अन्वयव्यतिरेकि इति द्विविधमेव लिङ्गं स्वीकुर्वन्ति। भाट्टवत् अनुभूतेः स्वप्रकाशत्वधीः अर्थापत्तिरित्येव एतेषामभिप्रायः न च प्राभाकरमते अभावस्य पदार्थान्तरत्वाभावात् व्यतिरेकव्याप्तिरेव नास्तीति कथमन्वयव्यतिरेकिहेत्वभ्युपगमो युज्यत इति वाच्यम्। तेन नाग्नेः धूमसम्बन्धस्य कालावच्छेदोऽनुप्रवेश्यते। धूमस्य तु कदाचिदपि अग्निसंयोगरहितस्यावगमो नास्ति[24] इति प्रकरणपञ्चिकाग्रन्थतः अन्वयव्यतिरेकित्वं

[23] ५६-५७
[24] प्र.प.२०४

धूमस्यास्ति इति अवगमात्। अभावस्य पदार्थान्तरत्वमेव प्राभाकरैः खण्डितं न तु तस्य पदार्थत्वम् इति व्यतिरेकव्याप्तेरनिषेधः।

## ४.२.३ विशिष्टाद्वैतिनः

व्याप्यो हेतुः द्विविधः— अन्वयव्यतिरेकी, केवलान्वयी चेति। पर्वतोऽग्निमान् धूमादित्यत्र धूमोऽन्वयव्यतिरेकी। ब्रह्म, शब्दवाच्यं वस्तुत्वादित्यत्र अन्वयव्याप्तेरेव केवलं सत्वात् तत्र हेतुः केवलान्वयीत्युच्यते। हेतोः पक्षसत्वं, सपक्षसत्त्वम्, असत्प्रतिपक्षितत्वम्, अबाधितत्वं, विपक्षावृत्तित्वं चेति पञ्चरूपाणि अपेक्षितानि। केवलान्वयिनः स्थले विपक्षस्यैवाभावात् कथं विपक्षावृत्तित्वं हेतोर्निर्वहतीति न शङ्क्यं, ब्रह्म शब्दवाच्यं वस्तुत्वात् इत्यत्र शब्दवाच्यत्वाभावस्याप्रसिद्धत्वेऽपि वाच्यत्वा-भाववद्वृत्तित्वमित्याहार्यज्ञानविषयीभूतस्य विशेषणविशेष्यभावापन्नपदार्थजातस्य योऽभावः, तस्य विपक्षावृत्तित्वस्य प्रसिद्धत्वात्। यथा शशशृङ्गं नास्तीति प्रतीत्या शृङ्गविशेषणतया भासमाने शशीयत्वाभावप्रतियोगितावच्छेदकत्वमवगाह्यते, विशिष्टशृङ्गस्याप्रसिद्धत्वात् शशीयत्वांशे इयमभावप्रतीतिराहार्यरूपा, तथा प्रकृतेऽपीति।

पक्षः साध्यातिरिक्तपक्षधर्मातिरिक्तधर्मवान् प्रमेयत्वात् इत्यादयः अभिमतसर्व-साधकतया महाविद्येति परिभाषितमनुमानम्। इदं केवलान्वय्यनुमानम् इति केचित्। ईदृशानुमानानां सर्वसाधकतया विपक्षे बाधकतर्कासम्भवादप्रामाण्यमेवेति वेदान्तदेशिकाः[25]। केवलव्यतिरेकि तु विशिष्टाद्वैतिनां सिद्धान्ते न स्वीक्रियते। तथाहि— भावसाध्यककेवलव्यतिरेकिषु यदि साध्यं पक्षे प्रसिद्धं, तर्हि अनुमानं व्यर्थं, यदि अन्यत्र साध्यं प्रसिद्धं, तदा सपक्षस्य लब्धत्वात् तत्र वर्तमानस्य हेतोः अन्वयित्वमेव स्यात्, न केवलव्यतिरेकित्वम्। न च अनुभूतिः अनुभाव्यत्वाभाववती, अनुभूतित्वाद् इति अभावसाध्यककेवलव्यतिरेकी हेतुः प्रसिद्धः तत्र साध्यज्ञानविरहेऽपि अनुभाव्यत्वरूपसाध्याभावज्ञानसम्भवात् तद्व्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिज्ञानं सम्भवत्येवेति वाच्यम्, अननुभाव्यत्वरूपसाध्यस्याभावस्यानुभाव्यत्वरूपत्वेऽपि अननुभाव्यत्वाभावत्वेनानुभाव्यत्व-ज्ञानस्यापेक्षितत्वात् तस्य च ज्ञानस्य अननुभाव्यत्वरूपप्रतियोगिनः विशिष्टस्या-ज्ञानात् असम्भव इति व्यतिरेकव्याप्त्यग्रहरूपदोषस्य तदवस्थत्वात्। यदि अनुभाव्यत्वव्यापकीभूताभावप्रतियोगित्वज्ञानादेव अनुमितिरुच्यते, तदा धूमाभाववान् वह्न्यभावादित्यत्र धूमव्यापकीभूताभावप्रतियोगित्वज्ञानात् द्रव्याभावानुमितिप्रसङ्गः, धूमस्यापि द्रव्याभावाभावरूपत्वात्। अतः अनुभाव्यत्वाभावत्वावच्छिन्नाभावव्यापकीभूताभावप्रति-योगित्वज्ञानमेव अनुमितिजनकं वाच्यम्, तच्च साध्यस्य विशिष्टस्य प्रतियोगिनोऽप्रसिद्धत्वात् न सम्भवतीति।

[25]न्या.प.२०५

न्यायपरिशुद्धौ तु अनुभूतिः अननुभाव्या, अनुभूतित्वात्, इच्छादयोऽष्ट-द्रव्यातिरिक्तद्रव्याश्रिता अष्टद्रव्याश्रितत्वायोगे सति गुणत्वादिवत्, सर्वं कार्यं सर्ववित्कर्तृपूर्वकं कादाचित्कत्वात्, वेदाः सर्वज्ञप्रणीताः वेदत्वाद् इत्येतादृशस्थलेषु केवलव्यतिरेकव्याप्तिः स्वीकर्तव्येति पूर्वपक्षयित्वा खण्डितम्।[26] तदेतत् सिद्धं केवलव्यतिरेक्यनुमानमप्रमाणम् इति।

ननु लक्षणेन इतरभेदानुमानमिष्टम् 'पृथिवी इतरभिन्ना गन्धवत्त्वात्' इति। तदनुमानं च केवलव्यतिरेक्येवेति। अतः कथं तदनुमानस्य निषेध इति चेन्न, लक्षणेन इतरभेदानुमानस्य नेष्टत्वात्। लक्षणं हि इतरभेदः। अतः लक्षणेनेतरभेदस्य नानुमेयत्वात् न केवलव्यतिरेकव्याप्तेरावश्यकता अथवा पृथिव्यामेकदेशस्य दृष्टान्तत्वसम्भवाद्दोषाभावः। एवं च पृथिवी इतरभिन्ना गन्धवत्त्वाद् इत्यत्र पृथिव्यन्तर्गतघटादिरेव साध्यप्रसिद्धिस्थलम् इति। न च आकाशलक्षणेन इतरभेदानुमानस्थले कथं साध्यप्रसिद्धिः आकाशेऽनेकत्वाभावात् इति वाच्यम्, कल्पादिभेदेन आकाशबहुत्वस्वीकारात्। ईश्वरलक्षणेन इतरभेदः कथमनुमातव्यः ईश्वरबहुत्वाभावात् इति प्रश्ने एवं समाधानं कथ्यते। तथाहि धर्मिग्राहकेण प्रमाणेन वेदेन ईश्वरस्य सिद्धौ सः असाधारणधर्मरूपलक्षणविशिष्ट एव सिद्ध्यतीति लक्षणेन साधनीयं किमपि नास्ति, असाधारणधर्मातिरिक्तस्येतरभेदस्याभावात्। ईश्वरलक्षणे ज्ञाते ईश्वरत्वेन शङ्क्यमानेषु ब्रह्मरुद्रादिषु तदभावेन अनीश्वरत्वसाधनं युज्यते। ब्रह्मादयोऽनीश्वराः सकलजगत्सृष्ट्यकारणत्वात् घटवत् इति प्रयोगोऽत्र विवक्षितः। अयमत्र सिद्धान्तः— लक्षणं नाम असाधारणधर्मः, तदपेक्षया अतिरिक्तः इतरभेदो न स्वीक्रियते। एवं च तत्र इतरभेदानुमानार्थं केवलव्यतिरेक्यनुमानं नापेक्षितम्। अथवा नानाव्यक्तिलक्ष्यकस्थले तदन्तर्गतव्यक्तिविशेषस्य साध्यवत्त्वेन प्रसिद्धत्वात् लक्षणेन इतरभेदानुमानमन्वय्येव। एकव्यक्तिलक्ष्यकस्थले प्रथमरीतिरेव। उक्तं च वेदान्तदेशिकैः

लक्षणादधिके भेदे कुत्रत्योऽवीतसम्भवः।
तस्यैव तत्त्वे किं केन किमर्थं साधयिष्यसि॥[27]

तत्सिद्धं यद् भाट्टमते प्राभाकरमते विशिष्टाद्वैतिनां च सिद्धान्ते केवलव्यतिरेक्यनुमानं न स्वीक्रियते।

केवलव्यतिरेकिस्थले साध्याप्रसिद्धेः तद्व्यतिरेकव्याप्तिर्दुग्रहा। एवमन्वयव्यतिरेकिणि स्थलेऽपि अन्वयव्याप्तिरेव प्रधानभूता। व्यतिरेकसहचारग्रहस्तु सहकारिभूत इति।

---

[26]न्या.प.२२०-२३५

[27]न्या.प.२४८

# ५. शब्दप्रमाणविचारः

## ५.१ शब्दार्थसम्बन्धः

### ५.१.१ शक्तिग्रहः

#### ५.१.१.१ भाट्टाः

शब्दार्थयोः सम्बन्धः स्वाभाविकः (नित्य) इति पूर्वमीमांसकाः। "औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध"[28] इति सूत्रम्। न तावत् शब्दार्थयोः संयोगः सम्बन्धो भवितुमर्हति। तथात्वे क्षुरादिशब्दोच्चारणे मुखस्य पाटनादिप्रसङ्गः। न च शब्दार्थयोः कार्यकारणभावः सम्बन्ध इति वाच्यं शब्दस्य अर्थस्य च नित्यत्वात् तयोः कार्यकारणभावासम्भवात्। न च समवायः तयोः सम्बन्धः, शब्दार्थयोः पृथक्सिद्धत्वात्। एवमेव संयोगसमवायादिघटितसम्बन्धानामपि शब्दार्थयोः मध्ये सम्भवो नास्ति। अत एवं निर्णयः कार्यः यत् शब्दार्थयोः प्रत्यायकप्रत्याय्यभावः सम्बन्धः। न च प्रत्याय्यप्रत्यायकभावो नामातिरिक्तः कश्चित् सम्बन्धः, विना सम्बन्धान्तरम् अयं शब्दः अस्यार्थस्य प्रत्यायक इति अनुभवसिद्धस्यैव सम्बन्धत्वात्। इन्द्रियलिङ्गादिवत् सन्निकर्षव्याप्त्यादिकं विना शब्देन यदर्थप्रतिपादनं तदेव शब्दार्थयोः सम्बन्धः। उक्तं च शास्त्रदीपिकायां— "स्यादेवं यत् सम्बन्धः शब्दार्थयोः, अस्ति तु सम्बन्धः प्रत्याय्यप्रत्यायकत्वलक्षणः, असत्येव सम्बन्धान्तरे स्वभावत एव शब्दः अर्थस्य प्रत्यायकः अर्थश्च प्रत्याय्यः इत्ययमेव सम्बन्धो भविष्यति। यथेदम् इन्द्रियलिङ्गादिवत् सन्निकर्षव्याप्त्यादिसम्बन्धानपेक्षम् अर्थप्रतिपादनम् इदमेवाभिधानमित्युच्यते। तदेव च संज्ञासंज्ञित्वम्, तेनोच्यते संज्ञासंज्ञिलक्षणः सम्बन्ध इति"[29] इति। यदि च शब्दस्य प्रत्यायकत्वं स्वभावसिद्धं तदा प्रथमश्रवणे एव शब्दोऽर्थप्रत्यायकः स्यादिति चेन्न, नेत्रादीनाम् आलोकादिसापेक्षत्वस्येव शब्दस्यापि प्रत्यायकत्वग्रहणसापेक्षत्वेन सर्वदा शब्दात् श्रुतात् अर्थग्रहणासम्भवात्।

शक्तिग्रहः भाट्टमते एवमुच्यते। शब्दार्थयोः यद्यपि स्वाभाविकः सम्बन्धः, तथापि अस्य शब्दस्य एतदर्थप्रत्यायकत्वमिति कथं बालः गृह्णाति इति चेदुच्यते। बालाः अप्रसिद्धसमस्तशब्दार्थाः वृद्धेभ्यः सम्बन्धं प्रतिपद्यन्ते। व्यवहारादपि शक्तिग्रहो भवति। प्रयोजकवृद्धः गामनयेति प्रयुङ्क्ते। मध्यमवृद्धः सास्नादिमत्पिण्डमानयन् बालेन दृष्टः। स प्रतिपद्यते "अस्माद् वाक्यात् गवानयनरूपार्थः प्रत्यायित" इति। अनन्तरं गां वधान, अश्वमानयेति बहुवाक्यश्रवणेन वाक्यावयवानां पदानां, पदभागानां प्रकृतिप्रत्ययानां च आवापोद्वापाभ्यां व्युत्पत्तिः भवति।

---

[28] मी.द.१-१-५

[29] शा. दी. ९०

### ५.१.१.२ प्राभाकराः

शब्दानामर्थेन प्रत्याय्यप्रत्यायकभाव एव सम्बन्धः। उक्तं च तन्त्ररहस्ये— शब्दार्थयोस्तावत् प्रत्याय्यप्रत्यायकभावलक्षणः सम्बन्धः। वाच्यवाचकभाव इति यावत्। स चापौरुषेयः[30]।

प्रकरणपञ्चिकायामपि "अथ कः सम्बन्धः? प्रत्याय्यप्रत्यायकभावः। न तर्हि अपौरुषेयः सम्बन्धः, स्वभावतः शब्दस्य अप्रत्यायकत्वात्। यदि हि स्वभावत एव शब्दः अर्थं प्रत्याययेत् ततः प्रथमश्रुतः किं न प्रत्याययेत्? ततोऽवगच्छामः, अपेक्षते किञ्चित् शब्द इति"[31] भाट्टानामेतेषां नातीव भेदः शब्दार्थसम्बन्धस्वरूपे। परन्तु शब्दार्थसम्बन्धग्रहणं वृद्धव्यवहारादेव भवति। कार्यान्विते एव व्युत्पत्तिः।

### ५.१.१.३ विशिष्टाद्वैतिनः

शब्दार्थयोः सम्बन्धः बोध्यबोधकभावः। स च सम्बन्धः वृद्धव्यवहारादिना गृह्यते। सिद्धेऽपि पदार्थे प्रथमव्युत्पत्तिः भवितुमर्हति, अतः कार्यार्थे एव व्युत्पत्तिरिति निर्बन्धो न कार्य इति श्रीभाष्यादौ प्राभाकरमतस्य निराकरणं कृतम्। तत्त्वमुक्ताकलापोक्तरीत्या भाष्यप्रक्रिया अत्रानूद्यते। तथाहि, इदं हि प्राभाकरमतम्। शब्दस्य प्रामाण्यं व्युत्पत्त्यायत्तम्। प्रथमव्युत्पत्तिः कार्या एव। वृद्धव्यवहारः व्युत्पत्तिहेतुः। प्रयोजकवृद्धो हि गामानयेति वाक्यं प्रयुङ्क्ते प्रयोज्यश्चानयति। व्युत्पित्सुः बालः अनेन वाक्येनानुमानसहितेन व्युत्पत्तिमान् भवति। इयमत्रानुमानप्रक्रिया। विप्रतिपन्ना प्रयोज्यवृद्धप्रवृत्तिः कार्यता-बुद्धिपूर्विका चेतनप्रवृत्तित्वात् अस्मत्प्रवृत्तिवत्। विप्रतिपन्ना कार्यताबुद्धिः प्रयोजक-वाक्यजन्या तद्वाक्यान्वयव्यतिरेकानुविधायित्वाद्यद्यदन्वयव्यतिरेकानुविधायि तत्तत् प्रयोजकवाक्यजन्यं, यथा संप्रतिपन्नकार्यविशेष इति सामान्यमुखी व्याप्तिरत्र विवक्षिता। एवं सामान्यतः कार्यपरत्वे प्रयोजकवाक्यस्य निश्चिते गामानय गां बधानेत्यादिषु वाक्येषु आवापोद्वापवशात् पूर्वोक्तरीत्या शक्तिग्रहो जायते। अतः कार्या एव शब्दानां व्युत्पत्तिः इति।

अत्र विशिष्टाद्वैतिनां समाधानम्— अस्तु कार्या एव प्रथमव्युत्पत्तिः, तथापि कार्यान्विततया करणादिषु सिद्धेष्वपि व्युत्पत्तिः सुशकैव। वस्तुतः सिद्धेऽपि प्राधान्येन तात्पर्यं सम्भवति, कोऽसौ इति पृष्टे पाञ्चाल इति उत्तरयति कश्चित्। तत्र तस्य वाक्यस्य सिद्धे एव तात्पर्यमिति। तथा च पाञ्चालपदस्य तत्रैव शक्तिग्रह इति। कानिचिद्वाक्यानि कार्यपराणि, कानिचिच्च सिद्धपराणि इति विवेकः। वाक्यस्य प्रमाणत्वे हि पुरुषार्थपर्यवसायित्वमेव तन्त्रम्। 'तव गृहे निधिरस्ति' इति वाक्यं प्रतिपत्तिमात्रेण पुरुषार्थापर्यवसायि।

इदानीं प्रथमव्युत्पत्तिः प्रकारत्रयेण सिद्धार्थेऽपि भवितुमर्हतीति निरूप्यते। तथाहि

१. कश्चित् पुरुषः "पुत्रस्ते जात इति देवदत्ताय ज्ञापय" इति चेष्टया कञ्चिदन्यं

[30]त.र.२२

[31]प्र.प.२३२

चोदयति। स पुरुषः देवदत्ताय तं विषयं वक्ति, तेन सहगतः कश्चिदन्यः यः तद्वाक्यार्थं पूर्वं नाजानात्, परन्तु मूकवत् चेष्टाविशेषज्ञः, स चेष्टया ज्ञातोऽर्थ एव अनेन वाक्येन प्रतिपद्यत इति जानन् पुत्रजन्मरूपार्थप्रतिपादकमिदं वाक्यमिति जानाति। वाक्यस्य सिद्धार्थपरत्वे ज्ञाते परस्तात् प्रतिपदव्युत्पत्तिरपि भवति।

२. प्रतिपदमपि सिद्धे व्युत्पत्तिः प्रदर्शयितुं शक्यते। तथाहि— कश्चित् शिक्षको जनः कञ्चित्कालम् अङ्गुलीनिर्देशपूर्वकम् अम्बा तातः मातुल इत्यादिशब्दान् तेषु तेषु अर्थेषु सन्निहितेषु प्रयुङ्क्ते। व्युत्पित्सुः चेष्टासहितपदानां प्रवृत्तिः, व्युत्पादनार्थेति जानाति। अतः क्रमशः अङ्गुलीनिर्देशमन्तरेण शब्दप्रयोगे सति शब्दस्य तत्तदर्थे शक्तिं गृह्णाति। अम्बाशब्दः इमां व्यक्तिं बोधयति, शब्दार्थयोः सम्बन्धान्तरं न दृश्यते, संकेतयितुरभावात् संकेतोऽपि नास्ति, परिशेषात् तयोः बोध्यबोधकभाव एवेति निश्चिनोति।

३. तृतीयः प्रकारः— देवदत्तस्य पुत्रे जाते कश्चित्तस्मै पुत्रस्तेजात इति वदति। श्रोतुः मुखविकासो जायते। तत्पश्यन् बालकः मुखविकासेन तद्धेतुभूतं हर्षमनुमिनोति। ततः तेन बालकेन हर्षहेतुः ज्ञानमनुमीयते। तच्च ज्ञानं प्रकृतवाक्यजन्यम् इत्यपि अन्वयव्यतिरेकाभ्यामुन्नीयते। तस्य ज्ञानस्य पुत्रजन्मरूपार्थविषयकत्वं सन्निधानादिलिङ्गवशेन निश्चीयत इति सिद्धार्थपरत्वं तस्य वाक्यस्य, तद्घटकपदानां सिद्धार्थे व्युत्पत्तिरपि शक्यकथनेति। न च सन्निहितेषु बहुषु हर्षहेतुषु सत्सु पुत्रजन्मविषयकज्ञानमेव तद्वाक्यजन्यमिति कथं निश्चय इति वाच्यम्, कार्यव्युत्पत्तिपक्षेऽपि अवान्तरबहुव्यापारसम्भवात्, कार्यविशेषपरतया तद्वाक्यस्य कार्यव्युत्पत्तिपक्षेऽपि अवान्तरबहुव्यापारसम्भवात्, कार्यविशेषपरतया तद्वाक्यस्य नियन्तुमशक्यत्वात्। एवं त्रिधा व्युत्पत्तिः प्राप्तुं शक्यत इति तत्त्वमुक्ताकलापे[32]।

## ५.१.२ शब्दवाच्यम्

### ५.१.२.१ भाट्टाः

पदस्यार्थः जातिरेव। जातिः आकृतिरित्यनर्थान्तरनम्। व्यक्तौ तु न शक्तिः। व्यक्तीनामानन्त्येन शक्त्यानन्त्यप्रसङ्गात्। व्यक्तिस्तु अर्थापत्त्या लभ्यत इति प्राचीनमीमांसकाः। जातेः व्यक्त्या सहाभेदस्याप्युपगमात् जातेर्लाभे व्यक्तेरपि लाभः। न चैवं व्यक्त्यभेदे जातेरनित्यत्वापत्तिः, जात्यात्मना नित्यत्वेऽपि व्यक्त्यात्मनाऽनित्यत्वस्या-स्माकमिष्टत्वात् इति न्यायसुधाकृतः। खण्डदेवाचार्यस्तु व्यक्तिबोधः लक्षणाधीन इत्याहुः। तथाहि— “अयमेव मण्डनमिश्रपक्षः। उक्तं च तैः

जातेरस्तित्वनास्तित्वे नहि कश्चित् विवक्षति।
नित्यत्वाल्लक्ष्यमाणायाः व्यक्तेः ते हि विशेषणे॥” इति।

---

[32]त.मु.बुद्धि. ७४,७५

न च एकस्मिन् पदे शक्तिलक्षणारूपवृत्तिद्वयविरोधः। यथा गङ्गापदात् शक्यप्रवाहोपस्थितावपि तस्य घोषान्वयप्रमितेः प्रागेव अनुपपत्तिप्रतिसन्धानेन तीरलक्षणया तदुपरि तीरान्वयबोधो नानुपपन्नः, तथा प्रकृतेऽपि सम्भवात्। न च "सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति" इति न्यायविरोधः, एकस्यैव गवादिपदस्य गोत्वे शक्तेः, गोत्वाश्रये लक्षणायाश्च स्वीकारादिति वाच्यम्, एकेन पदेन एकया वृत्त्याऽन्वयबोधोत्पत्त्यनन्तरं पुनर्वृत्त्यन्तरेणान्वयबोधान्तरासम्भवस्यैव तन्न्यायविषयत्वात्। खण्डदेवमते प्रथमतः गवादिपदात् जात्युपस्थितिः, अनन्तरं जातेः कर्मत्वान्वयबोधात् प्रागेव अनुपपत्तिवशाद् व्यक्तिलक्षणया शाब्दबोधसम्भवः, न च प्रथमं जात्युपस्थितिः, अनन्तरं लाक्षणिकव्यक्त्युपस्थितिरिति स्वीकारे क्रमिकयोः तयोरुपस्थित्योः निर्विकल्पकरूपत्वापत्तिः, इष्टत्वात् आकाशपदात् निर्विकल्पकरूपाया उपस्थितेः जननस्य, तस्याः च शाब्दबोध-हेतुत्वस्य च तार्किकैरपि इष्टत्वात् इति[33]।

५.१.२.२ प्राभाकराः

पदानामर्थे द्विविधा शक्तिः। एका स्मारिका, सा जातौ स्वीक्रियते। अन्विते चार्थे आनुभाविकी शक्तिः। पदस्य जातौ स्मारकशक्तेः सत्त्वाज्जातिरिव व्यक्तिरपि उपस्थाप्यते। यथा वा 'एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकम् ' इति न्यायेन सम्बन्धविशिष्टहस्तिपकज्ञानात् हस्तिनः स्मरणे सति तदसम्बन्धिनः हस्तित्वस्यापि स्मरणं भवति, तथा गोशब्देन गोत्वस्य सम्बन्धिनः स्मरणे सति तदाश्रयस्य गोशब्दसम्बन्धितया अगृहीतस्यापि गोरपि स्मरणं नानुपपन्नम्।

५.१.२.२.१ अन्विताभिधानवादः

प्रसङ्गात् प्राभाकरसम्मतान्विताभिधानवादः विचार्यते। पदानां वृद्धव्यवहारात् शक्तिग्रहो भवति। शक्तिश्चेतरान्वितार्थे एव गृह्यते। इयमेव पदानामानुभाविकी शक्तिरित्युच्यते। न च प्रथमतः व्युत्पत्तेः इतरान्वितविषयकत्वसम्भवेऽपि पश्चादावापोद्वापाभ्यां गवादिपदस्य गवादिस्वरूपमात्रे शक्तिः निर्णीयते इति वाच्यं, तथात्वे पदानामभिधायकताया भङ्गप्रसङ्गात्, गवादिस्वरूपस्य स्मारकशक्त्यैव लाभात्। न च "पदमभ्यधिकाभावात् स्मारकान्न विशिष्यत" इति भाट्टवार्तिकात् स्मारकत्वमेव अभिधायकत्वमिति वाच्यं, तथापि अन्विताभिधानस्य स्वीकार्यत्वात्। तथाहि— वाक्यस्य वाक्यार्थप्रतिपत्तौ तात्पर्यमावश्यकम्। अन्यथा वाक्यार्थस्य शाब्दत्वमेव न स्यात्। परम्परया शब्दावगतपदार्थकरणकशाब्दबोधविषयत्वरूपशब्दप्रयोज्यत्वात् वाक्यार्थस्य शाब्दत्वं, न तु तत्र शक्यत्वसत्त्वादिति यदि कथ्यते, तदा परम्परया श्रोत्रप्रयोज्यत्वस्य वाक्यार्थे सत्त्वाद् वाक्यार्थस्य श्रौत्रत्वमपि स्यात्।

न च पदार्था एव शाब्दबोधकरणमिति भाट्टमतमेव युक्तमिति वाच्यं,

[33]भा. कौ. १४८

तन्मते पदानां पदार्थाभिधानशक्तिः, पदार्थानां वाक्यार्थावगमशक्तिः, पदानां पदार्थगतवाक्यार्थावगमशक्त्याधानशक्तिश्चेति शक्तित्रयकल्पनया गौरवप्रसङ्गात्। अन्विताभिधानवादे हि पदानामन्वितार्थे एकैव शक्तिः स्वीक्रियत इति लाघवम्। न चान्विताभिधानवादेऽपि पदानां स्वार्थस्मारकशक्तिः, अन्वितानुभवजननशक्तिः, एकस्मृत्यारूढानामेव सर्वेषां पदानामन्वितानुभवजनकत्वेन पदगतान्विता-भिधानशक्त्याधानशक्तिः तावत्पदविषयकस्मरणे, इति शक्तित्रयं कल्पनीयमिति गौरवमेवेति वाच्यम् अभिहितान्वयवादापेक्षया तथापि लघुत्वात्। अभिहितान्वयवादे १. स्वार्थाभिधानशक्तिः २. स्वार्थस्मरणशक्तिः ३. पदार्थगतवाक्यार्थावगमशक्त्याधानशक्तिः ४. पदार्थे वाक्यार्थावगमशक्तिः ५. एकस्मृत्यारूढानामेव पदार्थानामन्वयबोधकत्वात् तावत्पदार्थविषयकस्मरणे पदार्थगतवाक्यार्थावगमशक्त्याधानशक्तिरिति शक्तिपञ्चकं स्वीकार्यमिति गौरवमेव।

किञ्च प्रमेये प्रमाणस्य सम्बन्धोऽपेक्षितः, प्रमाणानां स्वप्रमेयसम्बद्धानामेव प्रमेयावभासकत्वात्। भूतलं घटवत् इत्याकारकभूतलविशेष्यकसंयोगसंसर्गक-घटप्रकारकप्रत्यक्षविषयाणां भूतलादीनां चक्षुरादिप्रमाणेन सम्बन्धोऽस्ति। एवं शब्दप्रमाणस्य वाक्यार्थे सम्बन्धो वक्तव्यः। एवं चान्विताभिधानवादः युक्तियुक्तः।

ननु अन्विताभिधानं न सम्भवति। अन्वयप्रतियोगिनामानन्त्यात् अन्वयस्या-नन्तत्वात्। ततश्चान्वितानामप्यानन्त्यात्, तेषु पदानां सम्बन्धग्रहणमेव दुःशकम्। न च सामान्यतोऽन्वयाभिधानमेव विवक्षितमिति न अनन्तान्वयग्रहणप्रयुक्तं गौरवमिति वाच्यं, वाक्यादन्वयविशेषस्यैवावगन्तव्यत्वात्। किञ्च पदं पदान्तरानभिहितेनान्वितमर्थमभिधत्ते यदि, तदा पदान्तरवैयर्थ्यम्, एकेन पदेन सर्वान्वयप्रतीतिसम्भवात्। यदि पदं पदान्तरेणाभिहितार्थान्वितमर्थमेव अभिधत्ते, तदा अन्योन्याश्रयः। प्रथमपदमन्वितस्वार्था-भिधानाय द्वितीयपदाभिधानमपेक्षते। एवं द्वितीयपदमपि। किञ्च सर्वेषां पदानामितरा-न्वितवाचकत्वे पदभेदेन वाक्यार्थभेदात् सर्वत्र वाक्यभेदापत्तिरिति चेन्न, आकाङ्क्षा-योग्यता-सन्निधीनां व्युत्पत्तौ उपलक्षणत्वमङ्गीक्रियते। आकाङ्क्षितं सन्निहितं योग्यं यत् पदार्थान्तरं तदन्विते शक्तिग्रहो भवति। एकैकपदश्रवणानन्तरमनन्विततत्तदर्थोपस्थितौ सत्यामेकस्मृत्यारूढेभ्यः पदेभ्य आकाङ्क्षितयोग्यसन्निहितार्थान्तरान्वितप्रतीतिर्जायत इति पदान्तराभिधानानपेक्षणात् नान्योन्याश्रयः। एकेन पदेनैव इतरान्वितार्थप्रतीतौ सत्यामन्यपदेनापि तथैव प्रतीतिजनने वाक्यार्थभेदात् वाक्यभेदापत्तिरिति दोषोऽपि न सम्भवति। घटमानयेत्यत्र घटपदेनानयनान्वितघटस्य, आनयनपदेन घटान्वितानयनस्य बोधेन विशेषणविशेष्यभावस्य भेदेऽपि अर्थैक्यप्रयुक्तैकवाक्यत्वाबाधात्।

अपि च यथा नैयायिका घटपदस्य घटत्वतदाश्रयतत्सम्बन्धेषु त्रिषु शक्तिं स्वीकुर्वन्ति, तद्वद् अन्वयेऽपि घटपदस्य शक्तिस्वीकारे न काप्यनुपपत्तिः।

अयं सङ्ग्रहः

यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते।

तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते॥ इति।

५.१.२.२.२ अभिहितान्वयवादः

विनापि पदं पदार्थमात्रात् वाक्यार्थबुद्धिरुदेति। स्वयमुत्प्रेक्षितमर्थं कवयः काव्ये निबध्नन्ति। वाक्यरचनायां वाक्यार्थज्ञानं हेतुः। अर्थं बुद्ध्वा शब्दरचना इति हि वदन्ति। काव्यहेतुवाक्यार्थज्ञानं कवेः पदानि जनयन्तीति न युज्यते। परन्तु चिन्तावशेनोपस्थिताः पदार्था एव परस्परमन्वयरूपवाक्यार्थमवगमयन्तीति वक्तव्यम्। एवं येन पुरुषेण अज्ञाताश्रयं श्वैत्यं प्रतिपन्नं, हेषारवेण अज्ञातरूपोऽश्वोऽनुमितः, खुरपदविक्षेपशब्देन अज्ञातकर्तृकं धावनं चानुमितम्, तस्य पुरुषस्य श्वेतोऽश्वो धावतीति वाक्यार्थबुद्धिर्जायते। एवं च पदार्था एव वाक्यार्थबोधे करणम् इति।

उक्तं च वार्तिककारैः—

पश्यतः श्वेतमारूपं हेषाशब्दं च शृण्वतः।
खुरविक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीः॥
दृष्टा वाक्यविनिर्मुक्ता न पदार्थैर्विना क्वचित्॥ इति

अयमभिहितान्वयवादसारः— पदानि स्वस्वमर्थमभिधाय निवृत्तव्यापाराणि भवन्ति। पदाभिहिताः पदार्थाः, वाक्यार्थावगमे करणं भवन्ति। यथा गङ्गायां घोष इत्यत्र गङ्गापदस्मृतेन प्रवाहेण तीरं स्मर्यत इति तीरं पदस्य लक्ष्यमित्युच्यते, तथा पदाभिहितपदार्थैनान्वयरूपो वाक्यार्थोऽनुभूयते इति वाक्यार्थः लक्ष्य इति प्राचीनाः। उक्तं च—

न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि नः।
वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति नः स्थितिः॥ इति

न च वाक्यार्थावगमस्य पदार्थकरणकत्वे पदार्थस्यातिरिक्तप्रमाणत्वापत्तिरिति वाच्यं, पदार्थस्य शब्दप्रमाण एवान्तर्भावात्। तथाहि श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यारूपाणि षट् प्रमाणानि अज्ञातार्थबोधकानीति स्वीक्रियते। तत्र श्रुतिः, वाक्यं, समाख्या च शब्दरूपत्वात् शब्दप्रमाणेऽन्तर्भवन्ति। लिङ्गं प्रकरणं स्थानं च श्रुतिकल्पनयैवाज्ञातं ग्राहयन्तीति शब्दप्रमाण एवान्तर्भवन्ति। तथैव पदाभिहितानां पदार्थानामन्वयबोधकत्वेऽपि शब्दप्रमाण एवान्तर्भावः। अन्वयप्रतीतेः शब्दजन्यत्वाभावेऽपि शब्दावगतपदार्थजन्यत्वात् शाब्दत्वम् इति।

खण्डदेवाचार्यास्तु भाट्टकौस्तुभे एवमाहुः। "शाब्दबोधे पदार्थाः करणम्, पदार्थज्ञानमवान्तरव्यापारः, शाब्दबोधः फलम्। शब्दस्तु पदार्थज्ञानं प्रति करणत्वेन तत्रोपक्षीण" इति। उक्तं च 'पदार्थानां तु मूलत्वं युक्तं तद्भावभावतः'[34] इति श्लोकवार्तिके। न च भूतभाविपदार्थानां नियतपूर्ववृत्तित्वं वक्तुं न शक्यत इति कथं

[34]श्लो. अ.७-श्लो.१११

पदार्थाः करणमिति वाच्यं, भूतभाविपदार्थानां स्वरूपेणाविमानानामपि ज्ञानविषयत्वेन सत्त्वाज् ज्ञाततायामिव करणत्वोपपत्तेः। अत एव न्यायसुधाकृता कथितम्, “अतीतानागतयोरप्यतिक्रान्तदिवसादिगतसंख्यादिवज् ज्ञाततयां करणत्वोपपत्ति”रिति। यथा नैयायिकमते ज्ञानविषयत्वेनैव मौनिवाक्यस्थले शब्दस्य प्रमाणत्वमुच्यते, तदा भाट्टमतेऽपि ज्ञानविषयत्वेनातीतादिपदार्थानां शाब्दकरणत्वम् इति।

५.१.२.३ विशिष्टाद्वैतिनः

पदानामाकृतिविशिष्टव्यक्तिशक्तिस्वीकार एव उचितः। उक्तं च तत्त्वमुक्ताकलापे—

व्यक्तिः शब्दैर्न बोध्या यदि न खलु भवेदन्वितज्ञप्तिसिद्धिः
तच्छक्तिर्व्यक्तिमात्रे न च भवति यतः स्वोपलम्भादिबाधः।
धर्मो धर्मी च नैकं किमपि न च तयोः भिन्नयोरप्यभेदः
तस्मात्तां तद्विशिष्टामभिदधति पदान्यन्यथागत्यभावात्॥[35]

विशिष्टाद्वैतिनां सिद्धान्ते जातिं विना व्यक्तिभानस्य, व्यक्तिं विना जातिभानस्य चासम्भवात्, उभयत्रैव शक्तिः स्वीक्रियते। अयं हि सिद्धान्तः— गोशब्दः गोत्वरूपजातिम्, अपृथक्सिद्धिसम्बन्धेन तद्विशिष्टां गोव्यक्तिं, तदाश्रयमात्मविशेषं, तस्य जीवात्मनोऽपि आधारभूतं परमात्मानं च प्रतिपादयति। ये तावत् लौकिका वेदान्तज्ञानशून्याः ते जातिविशिष्टव्यक्तिरेव पदार्थ इति मन्वते, वेदान्तज्ञास्तु सर्वे शब्दाः परमात्मपर्यन्ताभिधायिन इति। अत एवोक्तं “वेदान्तश्रवणेन व्युत्पत्तिः पूर्यते” इति भाष्यकारैः। एवं गुणवाचिनः शब्दा अपि स्वापृथक्सिद्धविशेष्यं गुणिनम् अभिदधतीति। ‘अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि ’ इति छान्दोग्यश्रुतिः। भगवान् स्वसृष्टपदार्थानुप्रवेशेन नामरूपव्याकरणं विधाय तच्छब्दवाच्यो भवति इति “चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोऽभाक्तः तद्भावभावित्वात् ” इति सूत्रभाष्ये स्पष्टः। न च सर्वशब्दानां परमात्मवाचित्वे सर्वशब्दानां पर्यायत्वापत्तिः इति वाच्यम्। तत्तद्विशेषणरूपप्रवृत्तिनिमित्तभेदेन पर्यायत्वशङ्कायाः परिहारात्। न च कोशस्यानर्थक्यं स्यात्, सर्वपदानां ब्रह्मवाचकत्वेऽर्थभेदस्याभावादिति वाच्यं, कोशग्रन्थस्य वेदान्तश्रवणसमधिगम्यपूर्णव्युत्पत्तिरहितलौकिकज्ञानोद्देशेन प्रवृत्तत्वात्। सर्वपदानां परमात्मवाचकत्वे प्रसक्ता आक्षेपाः तत्र तत्र ग्रन्थेषु विशिष्टाद्वैतिभिः परिहृता इति नात्र प्रतन्यते।

अन्विताभिधानाभिहितान्वयवादविषये विशिष्टाद्वैतिनां सिद्धान्तः प्रस्तूयते। भाट्टा अभिहितान्वयवादिनः, प्राभाकरा अन्विताभिधानवादिनः। श्रीभाष्यकारवचनेषु परिशीलितेषु उभयत्र तेषामनुमतिः भवतीति ज्ञायते। वेदार्थसंग्रहे शोधकेष्वपि सत्यं ज्ञानत्मनन्तं ब्रह्म आनन्दो ब्रह्म इत्यादिषु सामानाधिकरणव्युत्पत्तिसिद्धानेकगुणविशिष्टैकार्थाभिधानमविरुद्धम् इत्युक्तम्। तत्त्वरत्नाकरे भट्टपराशराः

[35]त.मु.बु.स. ७८

अवश्या श्रयणीयेयमन्विताथाभिधायिता।
इत्याहुर्यामुनाचार्याः पदैरेवान्विताभिधा॥ इति
षड्भिः प्रतीतिप्रमुखोपपत्तिभिर्निर्धूतवाचाभिरिहान्विताभिधा।
सिद्धा पदैर्नाभिहितान्वयस्थितिः विपर्ययादित्यखिलं समञ्जसम्॥

इति च अन्विताभिधानवादः श्रीभाष्यकारपरमाचार्याणां यामुनाचार्याणाञ्च सम्मत इति स्थापयामासुः। एते च पराशरभट्टाः श्रीभाष्यकारकालीनास्तत्प्रशिष्याः।

एवमभिहितान्वयद्योतकमपि वाक्यं वेदार्थसंग्रहे उपलभ्यते। एवं बोधकानां पदसङ्घातानां संसर्गविशेषबोधनेन वाक्यशब्दाभिधेयानामुच्चारणक्रमो यत्र पुरुषबुद्धिपूर्वक इति। अत्र नैयायिकरीतिः पदसङ्घातस्य वाक्यात्मकस्य अन्वयबोधकत्वम् इति प्रसिद्धा सा दृश्यते। श्रीभाष्ये पदसङ्घातरूपस्य वाक्यस्यानेकपदार्थसंसर्गविशेषाभिधायित्वेनेत्युक्तम्। अत्रेदं भाति— एवं बहूनि वाक्यानि अभिहितान्वयपराणि वेदान्तदेशिकैरुदाहृतानि न्यायपरिशुद्धौ[36] तथापि पदार्थाः करणम् इति यद् भाट्टमतं, तन्न तद्वाक्येभ्यो द्योत्यते। परन्तु नैयायिकप्रक्रियैव तत्र कथितेव भाति। तथापि अभिहितान्वयद्योतकवाक्यत्वेन वेदान्तदेशिका कथमुदाहरन्? इति चेदुच्यते, भाट्टकौस्तुभे मन्त्राधिकरणे पदानां करणत्वपक्षोऽपि भाट्टसम्मत इत्यभिधाय पदार्थकरणकत्वपक्षो न्यरूपि। तेन ज्ञायते यत् नैयायिकप्रक्रियापि अभिहितान्वयवादशब्दशब्दिता भवितुमर्हतीति।

तत्त्वमुक्ताकलापे[37] वेदान्तदिशिका अन्विताभिधानप्रक्रियां यथावदुपपाद्य तत्र दोषद्वयमापाद्य समादधुः। तथाहि— अन्विताभिधानवादे 'पदैः अर्थप्रतीतिः, अनन्तरमाकाङ्क्षादिपरामर्शः, पश्चात् पदैरर्थाभिधानम्, ततोऽर्थप्रतीतिरिति चक्रकदोषः, आकाङ्क्षादिपरामर्शादर्थाभिधानम्, अर्थाभिधानानन्तरमाकांक्षादिपरामर्श इति अन्योन्याश्रयदोषश्च भवत इति पूर्वपक्षः।

समाधानमेवं— प्रथमं पदैः नान्विताभिधानं, किन्तु तत्तदर्थस्वरूपस्मरणमेव, अनन्तरमाकाङ्क्षादिपरामर्शः, पश्चात् पदैरन्विताभिधानं, ततः अन्वितार्थप्रतीतिरिति न चक्रकं, नापि अन्योन्याश्रयः। एवं वाक्यभेदप्रसङ्गोऽपि नास्ति, तत्तत्पदैः विशेषणविशेष्यभावभेदेन विशिष्टार्थप्रतिपादनेऽपि विशिष्टार्थस्य वस्तुत आनयनविशिष्टघटस्य वा घटविशिष्टानयनस्य वा परस्परं भेदाभावात् वाक्यभेदाभावात्। एवमन्विताभिधानं प्रसाध्य अभिहितान्वयवादेऽपि नानुपपत्तिरिति प्राहुराचार्याः। न च अभिहितान्वयवादे पूर्वोक्तरीत्या शक्तित्रयकल्पनाप्रयुक्तं गौरवम् इति वाच्यं, पदानां पदार्थाभिधानशक्तेः स्वीकारेऽपि अर्थानां संसर्गबोधनसामर्थ्यं स्वाभाविकम् इति न तत्कल्पनीयम्। लोके हि शब्दाभिधानमन्तरेणापि प्रतीतानामर्थानां संसर्गबोधनं दृष्टम्।[38] एतद्ग्रन्थपरिशीलने न्यायपरिशुद्धिप्रदर्शित-

[36]पृ.२३८,२३९
[37]सर्वार्थसिद्धौ पृ.३८९
[38]त.मु.३९१

अभिहितान्वयवादपरभाष्यादिग्रन्थानां पदार्थैकरणकबोधवादिभाट्टमतपरतयैव अभिप्रायो वर्णनीयः, न नैयायिकसम्मतप्रक्रियापरतयेति भाति। एवं च वेदान्तदेशिकैः अन्विताभिधानवादे अभिहितान्वयवादे च दोषाणामुद्धरणेन मतद्वयमपि निर्दुष्टम् इति प्रतिपादितम् इति विशेषः। अयं तेषां सर्वार्थसिद्धिग्रन्थः— "अतो गुरुकुमारिलपरिगृहीतं पक्षद्वयमध्याश्रित्य परपक्षवादिनं प्रतिक्षिपामः, नास्माकं क्वापि निर्बन्धः इति। प्रधानार्थविरोधे हि प्रतिक्षेप्यत्वनिर्बन्धः" इति।

अयमस्ति विवेकः भट्टपराशरादयः श्रीभाष्यकाराणामन्विताभिधानवाद एव इष्ट इति प्राहुः। श्रीराममिश्रादयस्तु अभिहितान्वयवाद एव भाष्यकृदिष्ट इत्याहुः। उभयमस्माकं नानिष्टमिति वेदान्तदेशिकाः।

## ५.३ विध्यर्थविचारः

### ५.३.१ भाट्टः

यजेत स्वर्गकाम इत्यादौ लिङ्-लोट्-तव्यप्रत्ययानामर्थो विधिः किंरूप इति विचार्यते। "अभिधाभावनामाहुरन्यामेव लिङादयः" इति वार्तिकस्य व्याख्यानं कुर्वन्तः पार्थसारथिमिश्रा अर्थभावनाप्रतिपत्त्यनुकूलायाः शब्दनिष्ठायाः शक्तेः प्रवर्तनात्वेन लिङर्थत्वं प्रतिपादयन्ति। ते एव न्यायरत्नमालायाम् इष्टसाधनत्वमेव प्रवर्तनात्वेन विध्यर्थ इति प्राहुः। अयमेव तेषां परमसिद्धान्त इति ज्ञायते।

पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः।
प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम्॥

इति वदन्तो मण्डनमिश्रा अपि प्रवर्तनात्वेन इष्टसाधनत्वं विध्यर्थ इति अभिप्रयन्ति। प्रवर्तनात्वेनेष्टसाधनत्वं विध्यर्थ इति कथनेन 'सन्ध्यावन्दनं तवेष्टसाधनं, तस्मात् तत् कुरु' इति इष्टसाधनत्ववाचकलोटः प्रयोगः तत्रोपपद्यते, इष्टसाधनत्वस्य प्रवर्तनात्वेनैव लोडर्थत्वात्।

न्यायसुधाकृतः भट्टसोमेश्वराः "क्लृप्तैः विनिगमनाविरहे कल्प्यमन्यत् सिद्ध्यति" इति न्यायेन प्रेरणं विध्यर्थत्वेनैव युक्तमित्याचक्षते। तदनुसारेण भाट्टरहस्ये खण्डदेवाचार्या अपि प्रवर्तनामेव विध्यर्थमाहुः। तथाहि— प्रवृत्त्यनुकूलव्यापारः प्रवर्तना। प्रवृत्तिः आख्यातेन लभ्यते। अनुकूलत्वं संसर्गतया लभ्यते। एवं च व्यापारत्वमात्रं लिङादिशक्यतावच्छेदकमिति सम्भवति। तया प्रवर्तनया यथायथमिष्टसाधनत्वादिकमनुमीयते। यागः इष्टसाधनम्, अयमत्र प्रवर्ततामित्याकारकाप्तेच्छाविषयकृतिविषयत्वात् गवानयनवत् इत्यनुमानाद्यागस्य इष्टसाधनत्वं लभ्यत इति अनन्यलभ्यः शब्दार्थ इति न्यायेन इष्टसाधनत्वस्य विध्यर्थत्वं न वक्तव्यम्। लोके पुरुष आप्तः, वैदिकप्रयोगे वेदस्यैवाप्तत्वम्, ईश्वरानङ्गीकारात्। वेदसाधारणाप्तत्वपरिष्कार एवमुक्तः प्रतारणाजन्यः हिताहितोपदेशकर्तृत्वे सति तद्भिन्नोपदेशाकर्तृत्वम् इति। "विवाहार्थमनृतं वदेत्" इति वाक्यस्थले प्रवर्तनया इष्टसाधनत्वं नानुमातुं शक्यते, किन्तु अनिष्टसाधनत्वाभाव एवानुमीयते। एवमेव अन्यत्रापि

अनुमानं कार्यमिति। निषेधवाक्यस्थले निवृत्त्यनुकूलव्यापारः निवर्तना लिङर्थः, तस्य स्वप्रयोज्याभावप्रतियोगित्वसम्बन्धेन प्रवृत्तौ अन्वयः। नञ् तात्पर्यग्राहकः।

## ५.३.२ प्राभाकराः

"तत्र लिङादिप्रत्ययः नियोगार्थशरीरमेवाभिदधाति प्रकृतिस्तद्विषयम्"[39] इति प्रकरणपञ्चिकायां नियोगो विध्यर्थ इति प्रत्यपादि। प्रमाणान्तरायोग्यत्वात् नियोगः अपूर्वम् इत्युच्यते। नियोगः प्रमाणान्तरायोग्यश्चेत् तत्र सम्बन्धग्रहणं न सम्भवति। यदि अपूर्वमनुमीयत इत्युच्यते तदा अपूर्वे शक्तिकल्पनं न युक्तम्। शब्दादेव अपूर्वमवगत्य सम्बन्धावधारणमिति तु न युक्तमन्योन्याश्रयदोषप्रसङ्गात्। न च लिङादेरयं महिमा यत् शक्तिग्रहाभावेऽपि नियोगस्य लिङा प्रतिपत्तिरिति वाच्यं प्रमाणाभावात्। तथा च लिङादिः अपूर्वे (नियोगे) सम्बन्धग्रहणं विना कथं तद्बोधक इति पूर्वपक्षः। तत्र समाधानं— चैत्रः अन्यं प्राह जलमाहर इति। स जलमाहरति। पार्श्वस्थः बालः व्युत्पद्यते। तथाहि— बालः प्रथममनुमिनोति 'इयं स्वाधीना प्रवृत्तिः बुद्धिपूर्विका स्वाधीनप्रवृत्तित्वात्' इति। प्रवृत्तिहेतुभूता बुद्धिः यद्विषया, स एव प्रवृत्तिहेतुभूतोऽर्थः विध्यर्थः भवति। न च लिङादिस्वरूपमेव प्रवर्तकं भवतु, न तदर्थविषयकज्ञानमिति वाच्यं, तथा चेत् सर्वेषामेव लिङ्श्राविणां प्रवृत्त्यापत्तेः। लिङादिव्यापारस्य प्रवृत्तिहेतुत्वाश्रयणं न युक्तम्। एवं च प्रवृत्तिहेतुभूतज्ञानविषयः विध्यर्थः वाच्यः। स च शब्दभावना नियोगापरपर्याया। नियोगः, कार्यम्, अपूर्वमिति पर्यायपदानि। कार्यं नाम

कृतिसाध्यं प्रधानं यत् तत्कार्यमवसीयते।
तच्च मानान्तरेणापि वेद्यमोदनपाकवत्॥ इति[40]

इत्युक्तरीत्या कृतौ सत्यां भावात्, असत्यां तस्यामभावादपूर्वस्य कृतिसाध्यत्वात् कार्यत्वव्यपदेशः। एवं कृत्युद्देश्यत्वरूपकृतिप्रधानत्वमपि कार्ये वर्तते। तथाहि— अपूर्वं स्वसिद्ध्यर्थं नियोज्यं प्रवर्तयति, स्वस्मिन् कृत्युद्देश्यत्वसिद्ध्यर्थम् अपूर्वं स्वर्गादिफलं करोति, स्वात्मनि नियोज्यस्य रुचिस्तु तदानीमेव हि जायेत। उक्तं हि

आत्मसिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये।
कुर्वत्स्वर्गादिकमपि प्रधानं कार्यमेव नः॥ इति।

लिङादयः नियोगमभिदधति, विध्यर्थस्य प्रवर्तकत्वात्। प्रमाणान्तरायोग्यमर्थमपूर्वं कार्यत्वेन अभिदधति। अपूर्वे पूर्वं शक्तिग्रहाभावेऽपि कार्यत्वावच्छिन्ने लौकिकलिङः शक्तिग्रहे वैदिकलिङः योग्यताबलादपूर्वप्रतिपादकत्वमिति विवेकः।

## ५.३.३ विशिष्टाद्वैतिनः

[39]पृ.५४
[40]प्र.प.१८०

कर्तृव्यापारसाध्यतामात्रं शब्दानुशासनसिद्धमेव लिङादेर्वाच्यमिति भाष्यात् कृतिसाध्यत्वं लिङर्थ इति केचित्। यजेत स्वर्गकाम इत्यत्र स्वव्यापारसाध्ययागादिविशिष्ट इति कर्तृप्राधान्येनैव बोधः। आख्यातार्थः कर्ता। तद्विशेष्यको बोधो विवक्षितः। इष्टसाधनत्वं विध्यर्थ इति मते तवेष्टसाधनमिदम्, अतः कुरु इति सहप्रयोगानुपपत्तिः। न चादरादिनिबन्धना पुनरुक्तिरियम् इति वाच्यं, हेतुसाध्यभावेन निर्देशात्। आप्तस्य वक्तुरिच्छा विध्यर्थ इत्यपि न युक्तम्, आप्तस्येष्टमिदम्, अतो ममेदं कार्यम् इति सहप्रयोगस्यानुपपत्तेः। कर्तव्यताया विध्यर्थत्वे कर्तव्यमिदम्, अतः कुरु इति सहप्रयोगः सामान्यविशेषादिविवक्षाया अविरोधः। ब्राह्मणस्य कर्तव्यम् इदं, ततः तवापि इदं कर्तव्यम् इति हि तत्र विवक्षितम्। वेदार्थसंग्रहेऽपि यागादेः प्रकृत्यर्थस्य कर्तृव्यापारसाध्यतां व्युत्पत्तिसिद्धां लिङादयोऽभिदधतीति कथनात् कृतिसाध्यत्वपक्षे भाष्यकाराणां निर्भर इति ज्ञायते।

नीतिमालायां नारायणार्यास्तु नियोगापरपर्याया आप्तेच्छा विध्यर्थः, सैव भाष्यकाराभिमतो विध्यर्थ इत्याहुः।

आप्तस्य हितकामस्य नियोगं केचिदूचिरे।
भाष्यकारोऽपि भगवान् एतदेवान्वमन्यत॥ इति।

एतैः प्रदर्श्यमानं भाष्यवाक्यं स्वशासनावबोधि शास्त्रं च प्रदिश्य इति। ‘विधिः प्रेरणेति वैयाकरणनिर्वचनमपि एतदनुकूलम्। तत्त्वरत्नाकरे पराशरभट्टाः त्रयीवृद्धाः तत्तद्विधिरपि भवत्प्रेरणम् इति कथयन्तः[41] नियोगः विध्यर्थ इति स्व्यकुर्वन्। कर्तृव्यापारसाध्यतामात्रं विध्यर्थ केवलसाध्यत्वमात्रं वा विध्यर्थ इति संशये वेदान्तदेशिका अस्मिन् विषये पक्षपातरहिताः मतद्वयेऽपि बहुभाष्यादिवाक्यगणस्य अनुकूलस्य दर्शनात् अन्यतरस्मिन् निर्भररहिताः पक्षद्वयमपि विस्तरेण प्रतिपादयन्ति न्यायपरिशुद्धौ। इतः परं तत्त्वमुक्ताकलापरीत्या विध्यर्थनिर्णयः क्रियते। तत्त्वमुक्ताकलापे अद्रव्यसारप्रकरणे शब्दभावनाया लिङ्वाच्यत्वं, इष्टसाधनत्वस्य लिङ्वाच्यत्वं च निरस्य कर्तृव्यापारसाध्यत्वपक्षं, नियोगविध्यर्थत्वपक्षं च निरूपयन्ति आचार्याः।

तथाहि— लिङोऽपूर्वं कार्यापरनामकं वाच्यम् इति पक्षो न युक्तः। किमज्ञातेऽपूर्वे लिङादेर्व्युत्पत्तिः, उत ज्ञाते? न तावदज्ञाते व्युत्पत्तिः घटते, व्याघातात्। ज्ञातेऽपूर्वे लिङः व्युत्पत्तिरिति चेत्, किं लिङैव ज्ञाते तस्मिन्, उत अन्यज्ञाते इति प्रश्नः। लिङैव ज्ञातेऽपूर्वे लिङ्व्युत्पत्तिरिति चेदन्योन्याश्रयः, ज्ञाते व्युत्पत्तिः, व्युत्पन्ने अभिधानम्, अभिधानाच्च ज्ञानम् इति चक्रकदोषो वा। अन्येन ज्ञातेऽपूर्वव्युत्पत्तिः लिङ इति चेत्, प्रमाणान्तरागोचरत्वादपूर्वस्य अन्यज्ञातत्वकथनमेव न युक्तम्। अपूर्वस्य लिङादिवाच्यत्वेऽपि तस्य देवताप्रीत्यप्रीतिरूपत्वमेव।

कौमारिलाः केचित् शब्दभावनायाः लिङ्वाच्यत्वं स्वीकुर्वन्ति। लिङ्व्यापारः =

[41] श्रीरङ्गराजस्तवः २०

शब्दभावना = अभिधाभावना। स्वव्यापारं लिङोऽभिदधतीति तन्मतम्। तन्न युक्तम्। न खलु शब्दाः कदाचिदपि स्वव्यापारं स्वयमेव अभिदधते। स्वनिष्ठव्यापाराभिधानं यदि शब्दाः कुर्युः तदा तुल्ययुक्त्या घटशब्दोऽपि घटप्रतिपत्त्यनुकूलामभिधाम् अभिदध्यात्। इष्टसाधनत्वं विध्यर्थम् इति पक्षस्तु न्यायपरिशुद्धावेव निराकृतः। एवं परमतं विमृश्य श्लोकत्रयेण कृतिसाध्यत्वं विध्यर्थ इति पक्षं, नियोगो विध्यर्थ इति पक्षं च निरूपयन्ति आचार्याः।

धात्वर्थस्यैव रूपं किमपि हि कथयन्त्यत्र सर्वे लकाराः
कर्तृव्यापारसाध्यां त्वभिदधति विधिप्रत्ययाः तल्लिङा।
वैघट्यं द्वारसिद्धिः प्रशमयति तथा सन्ति लोकोक्तिभेदाः
सिद्धं शब्दानुशिष्ट्या त्विदमुचितमिति स्थापितं भाष्यकारैः॥
इष्टस्वर्गादिकस्य त्वितरदपि यदा साध्यमुक्तं तदार्थात्
सिद्धं तत्साधनत्वं सुगममिह तदानर्थकत्वं निषेध्ये।
नित्यत्वेनोपदिष्टेष्वकरणमपि तत्तुल्यमेवार्थलब्धम्
सामान्यात् प्राप्तमेतत् फलनियतिरपि व्यज्यते तत्तदुक्त्या॥[42]

व्याख्यातमाचार्यैरेवं— शब्दार्थनिर्णयः विशिष्टप्रयोगेण व्याकरणेन वा भवति। उभयमपि कर्तृव्यापारसाध्यत्वरूपविध्यर्थवादेऽनुकूलम्। लकारा धात्वर्थस्य वर्तमानत्वभूतत्वभविष्यत्वादिकमभिदधति, तथा लिङ् अपि धात्वर्थस्यैव यागादेः कर्तृव्यापारसाध्यत्वमभिदधाति। न च स्वर्गकामस्य यागादिः कर्तृव्यापारसाध्यतया विधीयते। यागे इष्टसाधनत्वं साक्षान्नोच्यते। एवं च कथं यागादेः इष्टसाधनत्वं ज्ञायते, कथं वा अपगोरणादेः अनिष्टसाधनत्वं लभ्यत इति वाच्यम्, स्वर्गकामस्य यागः कृतिसाध्य इति साक्षाच्छब्दलब्धेऽपि अर्थात् यागात् स्वर्ग इति लभ्यते। एतच्छ्लोकद्वयेन कृतिसाध्यत्वं विध्यर्थ इति प्रतिपादितम्। अनन्तरश्लोकेन[43] प्रेरणा विध्यर्थ इति प्रतिपाद्यते। न्यायपरिशुद्धौ इदमपि मतं निरूपितम्। अत्र विधिनिमन्त्रणेत्यादिसूत्रस्थविधिपदस्य विधिः प्रेरणम् इति व्याख्यां विदधति वैयाकरणाः। आप्तस्य हितकामस्य नियोगः विध्यर्थ इति पक्षमपि वयं न निषेधामः इति आचार्याः। तच्च वयं न प्रतिक्षिपामः, श्रुतिः स्मृतिर्ममैवाज्ञातेति, शास्ता विष्णुरशेषस्येति भगवदाज्ञारूपत्वं चोदनाया युज्यते इति सर्वार्थसिद्धिग्रन्थः[44]

तथा चायं निष्कर्षः — कृतिसाध्यत्वं, नियोगो वा विध्यर्थ इति। उत्तमूर्-वीरराघवाचार्यस्वामिनस्तु एतत्पक्षद्वयमपि एकीकृत्य स्वीयतत्त्वमुक्ताकलापव्याख्याने कृतिसाध्यत्वं नाम कृत्यधीनसिद्ध्यर्हत्वम्। तदर्हत्वं च यथायथम् इष्टसाधनत्वादिघटितम् इतिरीत्या निष्कर्षं प्रतिपादयामासुः।

---

[42]त.मु.अद्रव्यसारः श्लो.९४,९५

[43]त.मु.अद्रव्यसारः श्लो ९६

[44]त.मु.पृ.५३८

# ६. ज्ञातताविचारः

ज्ञानजन्योऽतिशयः प्राकट्यापरनामा भाट्टैः स्वीक्रियते। विशिष्टाद्वैतवेदान्तिनः तादृशमतिशयं न स्वीकुर्वन्ति। ज्ञानेन ज्ञानस्य विषयस्य च संयोगः संयुक्ताश्रयणं वा सम्बन्धः। एवं च संयोगादिरूपस्य विषयिविषयभावस्यैव ज्ञात इति व्यवहारप्रयोजकत्वात् नातिरिक्तः ज्ञातताख्यो धर्मः आवश्यक इति।

✦✦✦

# औपनिषदसिद्धान्ते बिम्बप्रतिबिम्बावच्छेदवादविचारः

## अद्वैतवेदान्तानुसारं जीवात्मस्वरूपम्

गणपतिभट्टः*

न्यायवैशेषिकदर्शनेष्वनेकात्मवादः स्वीकृत इति ज्ञातं समेषाम्। प्रकृते त्वद्वैतवेदान्ते नामानुरूपमेकमेव सच्चिदानन्दस्वरूपमात्मानमङ्गीकृत्योपाधिभेदेनैव जगद्वैचित्र्यं व्यवस्थाप्यते। भगवत्पादशङ्कराचार्यैः "जीवो ब्रह्मैव नापरः"[1] इत्युभयोपाधिशून्यस्यात्मनो ब्रह्मरूपत्वं प्रतिपादितम्। अनन्तराचार्येषु जीवेश्वरनिरूपणावसरे विवरणानुसारिभिर्बिम्बप्रतिबिम्बवादः, सुरेश्वराचार्यैर्विद्यारण्यस्वामिभिश्चाभासवादः, वाचस्पति-मिश्रैश्चावच्छेदवादोऽङ्गीकृतः। एषु त्रिषु प्रस्थानेषु विषयविवेचनावसरे विरोधाभासे सत्यपि तात्पर्ये तावदैकमत्यमस्तीत्यहो वैचित्र्यमद्वैतस्य।

स्वरूपतो मिथ्याभूतं प्रतिबिम्बमिति वा आभासवादः[2] इति गौडब्रह्मानन्द-सरस्वतीभिराभासवादस्य लक्षणं प्रतिपादितम्। आभासवादे परमात्मन आभास एव जीव इति प्रतिपाद्यते। तदुक्तं भाष्यकृद्भिः "शङ्कराचार्यैः आभास एव चैष जीवः परस्यात्मनो जलसूर्यकादिवत् प्रतिपत्तव्यः"[3] इति। श्रीविद्यारण्यस्वामिनः "जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवति"[4] इति श्रुत्यनुसारेण शुद्धचैतन्यमाश्रिताऽनिर्वचनीया मूलप्रकृतिरेव शुद्धसत्त्वगुणप्रधानतया मायेति, मलिनसत्त्वगुणप्रधानतयाऽविद्येति प्रतिपाद्य तत्र मायायां प्रतिफलितश्चिदाभासो मायां स्वाधीनीकृत्य स्थित ईश्वर इति। अविद्यायां प्रतिफलितोऽविद्यावशीभूतश्च चिदाभासो जीव इति प्रतिपादितवन्तः।

> सत्त्वशुद्ध्यविशुद्धिभ्यां मायाऽविद्ये च ते मते।
> मायाबिम्बो वशीकृत्य तां स्यात् सर्वज्ञ ईश्वरः॥
> अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा[5]॥ इति।

श्रीविद्यारण्यस्वामिभिर्यथैक एवाकाशो महाकाशः, घटाकाशः, मेघाकाशः, जलाकाशः इति भेदेन चतुर्धा भवति, तथैकमपि चैतन्यं ब्रह्मचैतन्यं, कूटस्थचैतन्यं, ईश्वरचैतन्यं, जीवचैतन्यं चेति चतुर्धा भवतीति स्वीक्रियते। तदुक्तम्—

> कूटस्थो ब्रह्म जीवेशावित्येवं चिच्चतुर्विधा।

---

*सहाचार्यः, अद्वैतवेदान्तविभागस्य, तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्य

[1]ब्र.ज्ञा.मा. २०

[2]न्या.र. पृ. ८९

[3]ब्र.सू.श. भा. २।३।५०

[4]नृसिंहो. ९ खण्डे

[5]पञ्च. १।१६-१७

घटाकाशमहाकाशौ जलाकाशाभ्रखे यथा॥[6]॥ इति।

अत्र स्थूलसूक्ष्मशरीरयोरधिष्ठानभूतं चैतन्यं कूटस्थम्, निरवच्छिन्नचैतन्यं ब्रह्म, मेघस्थजलकणेष्विव बुद्धिवासनाविशिष्टमायायां प्रतिबिम्ब ईश्वरः, शरीररूपघटे बुद्धिरूपजले यश्चेतनस्य प्रतिबिम्बः स जीव इति ज्ञातव्यम्। प्रतिशरीरं बुद्धीनां भिन्नत्वात् तद्गतचिदाभासानामपि भेदः इति जीवानामनेकत्वसिद्धिः। एवं जीवभेदेनैव प्रतिजीवं सुखदुःखयोर्व्यवस्थोपपत्तिः। स्वरूपतः सत्यं प्रतिबिम्बत्वरूपेण मिथ्याभूतं बिम्बमेव प्रतिबिम्बमिति वास्य प्रतिबिम्बवादत्वम्[7] इति प्रतिबिम्बवादस्य लक्षणं गौडब्रह्मानन्दसरस्वतीभिः प्रतिपादितम्। बिम्बस्यैव प्रतिबिम्बव्यवहारात् क्लृप्तकार्यसम्भवा-न्नातिरिक्ताभासकल्पनं युक्तं, गौरवादिति प्रतिबिम्बावादो युक्त इति प्रतिबिम्बवादिनामाशयः।

अत्र प्रतिबिम्बवादे द्वौ पक्षौ स्तः। एको विवरणकारस्य, अपरः संक्षेपशारीरककारस्य। विवरणकृतस्तु—

विभेदजनकेऽज्ञाने नष्टे ज्ञानबलान्मुने।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति॥[8]

इति श्रुतिबलात् जीवेश्वरयोरुपाधिभूतमज्ञानमेकमेवाङ्गीकृत्य तदज्ञानोपहितं बिम्बचैतन्यमीश्वर इति अन्तःकरणतत्संस्कारविशिष्टाज्ञानप्रतिबिम्बितं चैतन्यं जीव इति च प्रतिपादयन्ति। अत एव उपाध्यन्तर्गतत्वप्रतीयमानत्वे सत्यौपाधिकपरिच्छेदशून्यत्वे च सति बहिःस्थित-स्वरूपत्वं प्रतिबिम्बत्वम्। उपाध्यन्तर्गतत्वे सत्युपाध्यनन्तर्गतस्वरूपाभिन्नत्वं बिम्बत्वम्[9] इति हि काश्मीरकसदानन्दयतिना बिम्बप्रतिबिम्बयोर्लक्षणे व्यवस्थापिते। अत्रान्तःकरणनानात्वाज्जीवनानात्वम्। यथा तार्किकमते श्रोत्रैक्येऽपि तत्तत्कर्ण-शष्कुल्युपाधिभेदेन शब्दग्रहभेदव्यवस्था, एवमात्मैक्येऽप्यन्तःकरणोपाधिभेदादेव बन्धमोक्षा-दिव्यवस्थोपपत्तिः[10]।

श्रीविद्यारण्यस्वामिनोऽन्तःकरणोपाधावनिर्वचनीयस्य प्रतिबिम्बस्योत्पत्तिम-ङ्गीकुर्वन्ति। तन्मतानुसारेण दर्पणं प्रतिबिम्बस्याधिष्ठानोपादानम्, बिम्बसन्निधिश्च निमित्त-कारणम्। यद्यपि निमित्तापाये न कार्यापायस्तथापि निमित्तकारणं तावद् द्विविधम्-कार्यपूर्ववर्तिनिमित्तकारणम्, कार्यकालवर्तिनिमित्तकारणं चेति। दण्डादिकं घटं प्रति कार्यपूर्ववर्तिनिमित्तकारणम्। एवमेव दूरस्थनानावृक्षेषु यदेकत्वभ्रमो भवति, मन्दान्धकारे च रज्जौ सर्पत्वभ्रमो भवति, तत्र दूरत्वं मन्दान्धकारत्वं च कार्यकालवर्तिनिमित्तकारणे भवतः। यथा दूरत्वमन्दान्धकारत्वयोर्निमित्तकारणयोर्निवृत्तावेकत्वादिभ्रमस्य निवृत्तिर्भवति, तथा बिम्बस्य सन्निधानं प्रतिबिम्बोत्पत्तौ कार्यकालवर्तिनिमित्तकारणमिति तन्निवृत्तौ प्रतिबिम्बस्यापि

---

[6]पञ्च. १।१८

[7]न्या. र., पृ. ८९.

[8]जा. ४।६३

[9]अ. ब्र. सि., पृ. २०२.

[10]अ. ब्र. सि., पृ. २०२.

निवृत्तिरिति प्रतिबिम्बस्य मिथ्यात्वादाभासवादः।

विवरणमते तु प्रतिबिम्बस्य बिम्बाऽभिन्नात्वात् तत्र दर्पणस्थितत्वविपरीतदेशमुखत्व-बिम्बभिन्नत्वरूपाणामेवानिर्वचनीयधर्माणामुत्पत्तिरिति तेषां धर्माणामेव मिथ्यात्वं प्रतिबिम्बस्य च सत्यत्वमिति प्रतिबिम्बवाद इत्यनयोर्भेदः[11]।

वाचस्पतिमिश्रैस्तु नाविद्या ब्रह्माश्रया, किन्तु जीवे सा त्वनिर्वचनीया[12]। विद्यास्वभावे ब्रह्मणि तदनुपपत्तेः[13] इत्यादिस्थलेष्वज्ञानस्य जीवाश्रयत्वं ब्रह्मविषयत्वञ्च प्रतिपादितं वर्तते। अतस्तन्मतानुसारेणाज्ञानविषयीकृतं चैतन्यमीश्वरः, अज्ञानाश्रयीभूतं च जीव इति प्रतिपादितं भवति।

पूज्यपादैः शङ्कराचार्यैरपि "सत्यमेवैतत् पर एवात्मा देहेन्द्रियमनोबुद्ध्युपाधिभिः परिच्छिद्यमानो बालैः शारीर इत्युपचर्यते। यथा घटकरकाद्युपाधिवशापरिच्छिन्नमपि नभः परिच्छिन्नवदवभासते तद्वत् "[14] इत्यवच्छेदवादः समर्थितः।

✦✦✦

11 वृ. प्र., पृ. ५१०५१२.
12 ब्र. सू. भा. १।१।४
13 ब्र. सू. भा. १।४।३
14 ब्र. सू. भा. १।२।६.

# नेह नानास्ति किञ्चन – माध्वी दृष्टिः

ए.वि.नागसम्पिगे*

कठोपनिषदि नेह नानास्ति किञ्चन[1] इति वचनं दृश्यते। जगद्गुरुश्रीमदानन्द-तीर्थभगवत्पादाचार्याणां (श्रीमध्वाचार्याणां) व्याख्याप्रणालीह निरूप्यते। काठकोपनिषदि तृतीयः प्रश्नो भवति – अस्तीत्येके नायमस्तीति चैके इति[2]।

अत्र शङ्कराचार्याणां व्याख्या एवमस्ति – देहेन्द्रियाद्यतिरिक्त आत्मा अस्ति न वा? इति।

भगवद्रामानुजाचार्याणां व्याख्या तु – मुक्तस्य ज्ञानमस्ति न वेति नचिकेतसा विप्रतिपत्तिर्दर्शिता।

श्रीमदानन्दतीर्थपादाचार्यास्तु मुक्तौ भगवान् विष्णुर्नियामकतया अस्ति न वेति विप्रतिपत्तिं न्यरूपयन्। मतत्रयाचार्याणां दृष्ट्यापि प्रकरणमधुनातनं ब्रह्मस्वरूपविचारपरम्। पूर्वतनवाक्यम् –

यदेवेह तदमुत्र यदमुत्र तदन्विह।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।[3]

अस्य त्वयमाशयः – पूर्वं गुहां प्रविश्य तिष्ठन्तीम्[4] इत्यत्र मत्स्याद्यवताररूपाणां मूलरूपेणाभेद उक्तः। इह- देहादिषु यदवतारजातमस्ति विष्णोस्तदेवामुत्र वैकुण्ठलोके प्रचकास्ति। न तयोर्भेदगन्धः। यदमुत्र मूलरूपमस्ति तदेवानु देहादिषु स्थितमवतारजातं भवति। "न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि"[5] इति सूत्रं मूलावताररूपभेदप्रतिषेधकमत्र मानम्। अयं माध्वभाष्यरीत्याऽर्थो विज्ञेयः।

तदनन्तरं श्रूयमाणमिदं वचनम् –

मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन।
मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति।[6] इति

अस्य चायमर्थः पूर्वं भगवद्रूपाणां स्वावयवरूपादिभिर्भेदः प्रतिषिद्धः। अधुना इदं प्रमेयजातं (मूलावताररूपयोर्भेदो नास्तीत्यादिरूपं) मनसैव मननसमर्थेन मनइन्द्रियेणैव विज्ञेयम्। इह मूलावताररूपयोः, किञ्चन अल्पीयानपि नाना भेदः नास्ति

---

*निदेशकः, पूर्णप्रज्ञसंशोधनमन्दिरस्य, पूर्णप्रज्ञविद्यापीठस्थस्य, कत्तरिगुप्पमुख्यमार्गस्थितस्य, बेङ्गलूरुस्थस्य

[1]कठ २.१.१०

[2]कठ १.१.२०

[3]कठ २.१.१०

[4]कठ २.१.७

[5]ब्र.सू. ३.२.११

[6]कठ २.१.११

न विद्यते। अवयवावयविनोश्च भेदः नास्तीत्यभेदो निरूप्यते। यो भगवदवताररूपाणां गुणकर्मणामवयवावयविनां च भेदं पश्यति सोऽन्धतमो गच्छति। उभयव्यपदेशाधिकरणगतं "प्रतिषेधाच्च"[7] इति सूत्रमेतमर्थमवगमयतीति श्रीमध्वाचार्या व्याचक्षते। अत्रोपनिषदि न केवलं भगवतस्तद्गुणानां च भेदः प्रतिषिद्धोऽपि तु भेदाभेदोऽपि प्रतिषिद्ध इति विज्ञेयम्।

भवेदेकत्र संयोग इवशब्दो विरुद्धयोः।
धर्मयोरुपमायां च स्वल्पत्वे वा विवक्ष्यते॥

इति शब्दनिर्णयवचनमुदाहृत्य विरुद्धयोर्धर्मयोरेकत्र वस्तुनि संयोगेन स्थिताविवशब्द-स्तद्वाचको भवेत्। एवमुपमास्वल्पत्वस्य च वाचको भवेत्। विरुद्धयोर्धर्मयोरेकत्र संयोगे यथा–

दुर्जनोऽपि सुजनसङ्गेन सुजन इव भवतीत्यर्थः।

कदाचित्कचित्सुजनसङ्गेन दुर्जनः सुजनः, सुजनश्च दुर्जनो भवतीत्यर्थः। उपमायां यथा–

पण्डितास्तु कलत्रेण रमन्ते महिषा इव।

स्वल्पत्वे यथा– ग्रामेऽयं पण्डित इव – अत्यल्पज्ञान्ययमित्यर्थः। स्वल्पत्वे निदर्शनान्तरम् – उदरमिव लक्ष्यतेऽस्याः। अल्पोदरीत्यर्थः।

यद्यप्यत्राप्राप्तानामेव गुणकर्मणामवयवानां च भेदः प्रतिषिध्यत इति आपाततः प्रतीयेत। तथापि भेदः प्राप्त एव। आसीनो दूरं व्रजति[8] इत्यत्रावयवानां महान्तं विभुमात्मानम्[9] इत्यत्र गुणानां यः पूर्वं तपसो जातमद्भ्यः[10] इत्यत्र कर्मणाञ्च भेदस्य प्रसक्तत्वात्। अत्र इह ब्रह्मणि किञ्चन प्रकृतमवयवादिकं नाना भिन्नं नास्तीत्युक्ते अवयवादीनां भेदः प्रतिषिद्धो भवति। सविशेषणे हि विधिनिषेधौ विशेषणमुपसङ्क्रामतः सति विशेष्ये बाधे इति न्यायात्। लोहितोष्णीषा ऋत्विजश्चरन्ति, न जीर्णमलवद्वासा स्नातकः स्यात् इत्यादौ तथा दर्शनात्। स्वरूपत एव निषेधे नानेति व्यर्थं स्यात्।

अथवा इह ब्रह्मणि किञ्चनावयवगुणकर्मादिकं परस्परं च भगवता नाना भिन्नं नास्तीत्यर्थः। एवञ्चात्र नानाशब्दः नानात्वपरः। द्व्येकयोर्द्विवचनैकवचने[11] इति सूत्रे द्वित्वैकत्वयोरिव भावप्रधानार्थत्वं विज्ञेयम्। धर्माणां स्वरूपत एव निषेधे नानेति पृथगिति च व्यर्थम्।

अथवा विनानानाशब्दयोरेकार्थत्वमुक्तं व्याकरणमहाभाष्ये। नाना विष्णुं मोक्षदो नास्ति देव इत्यमरव्याख्यायां नानाशब्दस्य विनार्थत्वमुक्तम्। न तदस्ति विना यत्स्यान्मम

[7]ब्र.सू. ३.२.३१
[8]कठ १.२.२१
[9]कठ १.२.२२
[10]कठ २.१.६
[11]अष्टा. १.४.२२

भूतं चराचरम्[12] इति गीतायां च सर्वं विश्वमविनाभूतमनन्यमित्युक्तम्। अत्र चोक्तमनन्यत्वं तदधीनत्वमेव केवलम्। तदुक्तं न्यायामृते –

नानेत्यस्य विनार्थत्वाद्विना भूतं निषिध्यते।
अविनाभूतमस्तीति सत्तैवार्थात्तु लभ्यते॥ इति।

किञ्च ब्रह्मणि विश्वं नास्तीत्युक्ते न मिथ्यात्वं सिध्यति। ब्रह्मणोऽन्यत्र प्रकृत्यादौ स्वोपादाने जगतः सत्त्वसम्भवात्। अनन्या राघवेणाहं भास्करेण प्रभा यथा[13] इत्यत्र यथा रामाधीनसत्ता भगवत्याः सीतायाः प्रतिपादिता तथैवेह भगवदधीना विश्वसत्तेत्यर्थ उपवर्णयितुं शक्यते। अनेन विश्वमिथ्यात्वोपवर्णनमस्य वाक्यस्य नातीव सङ्गतमित्युक्तं भवति। तदुक्तं न्यायामृते –

अनन्या राघवेणाहं भास्करेण प्रभा यथा।
व्याख्याऽत्र यादृशी तादृङ्नेह नानेति च श्रुतेः॥

एवञ्च नेह नानास्ति किञ्चन इति वचनं भगवतस्तद्रूपाणां तदवयवक्रियाणां भेदप्रतिषेधपरमित्युक्तं भवति। भगवतस्तद्गुणानाञ्च भेददर्शनस्य तमःसाधनत्वोक्तेरभेद एवानुसन्धेय इति विज्ञेयम्।

✦ ✦ ✦

[12]गीता १०.३९
[13]रामायणे ५.२१.१६

# जीवतत्त्वविषये समस्याः— अधिविज्ञानं साध्यतापर्यवेक्षणम्

एन्. उषा देवी*

## १. भूमिका

भवपाशव्यूहबन्धनप्रत्यभिज्ञानतो मननशीलस्यान्तःस्वरूपभूतजीवविषयकं मूल-तत्त्वं मृग्यमेवेति वासना द्रढीभावमेति। "जन्तूनां नरजन्म दुर्लभम् "[1] इत्याचार्योक्त्या सूचितमेतदेव यत् प्रपञ्चेऽस्मिन् जीवतत्त्वाधारीभूता सुव्यवस्था मानवचेतसा एव विवेक्तव्या इति। आत्मस्वरूपप्रदर्शकसामर्थ्यावधारणपूर्वकतया मनसः श्रेष्ठं स्थानं शास्त्रे श्रुतं— "मनसैवानुद्रष्टव्यम् "[2]। विज्ञानशास्त्रे विदितं लौकिकप्रमाणाभिगम्यं जीवस्वरूपमन्यथा दर्शयन् जीवतत्त्वस्यापूर्वताभिख्यापन्नाद्वैतवेदान्तः स्वीयमनुपमितं चिह्नं विज्ञानमण्डले प्रसरन् वरीवर्ति। विषयेभ्यो विनाशतावगाहिभ्योऽत्यन्तव्यतिरिक्तमात्मानं विषयिणं जीवस्याभ्रान्तस्वरूपत्वेन पुरस्कुर्वद्दर्शनमिदं प्रमाणमात्रावलम्बिषु मनःसु क्षोभं तथा व्यवहारातीतावस्थापरिशीलकानां ह्लादं च जनयत् अनधिगतमबाधितं च राजते।

अभिमानसंज्ञितान्तःकरणभागगतधर्मप्रचयाद्धेतोः परिस्पन्दम् आवहन्तः जीव-विषयिकाः समस्याः मानवसमूहोपलब्धान्तःसङ्घर्षभूमिकापदमलङ्कुर्वन्ति। जीवनकाले प्रत्येकमनुभवपथमागच्छन्त्य एताः कदाचित् बलादनिरोद्धव्यरूपतया आपतन्ति, अन्याश्च काश्चित् विधिवैपरीत्याद्याशयानवगाह्य नैर्घृण्येनागच्छन्ति, पुनरपरास्तु पूर्वजन्मार्जितकर्मप्राचुर्यफलतश्च दृष्टिपथम् उपयान्ति। एतादृशसङ्घर्षाणामनुपातः अपरिमिततया भीतिदरूपेण शमनमलभमानो वृद्धिमाप्नोतीत्येतदस्मत्कालिकी दुष्परिहार्या स्थितिः। अनेनैतत् मन्तुं युक्तं यत् सांव्यावहारिकं लोकमतिमुख्यमाकलयन् पुरुषः स्वदेहेन्द्रियसङ्घातात्यन्तानपेतेषु कार्येषु व्यग्रो विचरन् सदा तत्रैव तत्परः जीवस्वरूपविचारणे-ऽनवधानतया तिष्ठतीति। समूहमध्यगता विविधाः प्रश्नाः यदाऽभिमुखमायान्ति, तदा बहुषु परिहारानवाप्त्या च पुरुषस्य विचारः जीवतत्त्वस्वरूपोपरि समायाति। जीवकाल-साधारणानां प्रश्नानामन्तर्लक्ष्यभूतार्थविविदिषा सर्वान्तर्यामितत्त्वविचाराय मानवं प्रेरयति। तस्मादपक्रमणं तस्य भीरुत्वमुद्घोषयति च। लोकव्यवहारोपलब्धेनानन्देनान्वितोऽपि पुरुषः क्रमशस्तद्भङ्गदर्शनात् जीवविषयकतत्त्वावलोकने तदर्थावगमे चोत्सुको भवतीत्येतत् साधारणमेवात्र।

---

*सहायकाचार्या, संस्कृतविभागे, केरलेषु एर्नाकुलमण्डलस्य कालाडीस्थानस्य श्रीशङ्करमहाविद्यालयस्य

[1]विवेकचूडामणिः- 2

[2]कठोपनिषत्- II.iv.11

"को न आत्मा किं तद्ब्रह्म"[3] इत्येवंरूपात्मस्वरूपान्वेषणोन्मुखतया उपनिषत्कालिकः पुरुषः यां धारणाशक्तिं धृष्टतां च प्रकटितवान्, तत्रान्तर्गतः परिपक्कः बुद्धिविकासः नरसंस्कृतौ गरीयान् महद्योगदानकरश्चावशिष्यते। प्रमाणितं चैतद् यत् तस्य जगद्विषयिका सर्वसमालिङ्गिता संविदेका आसीत् इति, "सर्वं ह्येतद्ब्रह्म अयमात्मा ब्रह्म" इत्यादिश्रुतिभ्यः। प्रकृतेरुपजायमानाभ्यः समस्याभ्यः अनुन्मुखमनाश्च नासीत्सः। सामान्यतयोपलब्धानां व्यावहारिकजीवनसम्बन्धिनीनां पद्धतीनामपर्याप्तत्वमवगम्य तेन ततोऽप्यतिश्रेष्ठानि लक्ष्याणि मनसि निधाय प्रपञ्चवैचित्र्याधारभूतस्य सद्रूपस्यैकतत्त्वस्यानावरणे समनुभोगयोग्यमन्तःकरणं नीतम्। स्थूलविषयेभ्यः प्रपञ्चास्पदमेकं सूक्ष्मं तत्त्वं निर्धारयितुं मनसः करणत्वम् एवं शास्त्रे प्रकाशतामुपगतम्। तथा च सर्वविधानां चिन्तास्रोतसामप्यधिष्ठानभूतं तत्त्वं यदा विज्ञातं भवति तदा सर्वमपि विज्ञातं भवतीति प्रतिज्ञानमद्वैतवेदान्ते सर्वथा समाहृतम्।

अद्वैतवेदान्तदृष्ट्या जीवविषयकप्रश्ननिरूपणायोद्यमः समानीतोऽस्मिन् प्रबन्धे। विज्ञानशास्त्रमपि तावदेव चिन्तापथं प्रापयति यावताद्वैतेन वैषम्यं किञ्चिदपि तत्र द्रष्टुं न शक्यते।

## २. जीवस्वरूपनिर्णयः

औपनिषदे दर्शने जीवः सद्देवताया आभासमात्रत्वेन विवक्षितः, जीवेनात्मना सद्देवता सर्वभूतेष्वनुप्रविष्टा च। एष आभासभावस्तु बुद्ध्यादिभूतमात्रसंसर्गजनितः। जलादिषु सूर्यादीनामिवाभासमात्ररूपत्वाद् दैहिकैः सुखदुःखादिभिः सद्देवतायाः स्वरूपतोऽन्वयश्च न। आभासरूपत्वे जीवस्यासत्यत्वं नाशङ्कनीयं, सदात्मना तस्य सत्यत्वमभ्युपगतमद्वैते। "अनेन जीवेनात्मना" इति श्रुतेः शङ्कराचार्यकृतं व्याख्यानमेवं— "स्वबुद्धिस्थं पूर्वसृष्ट्यनुभूतप्राणधारणमात्मानमेव स्मरन्ती एवमुच्यते। प्राणधारणकर्तात्मा स्वात्मनोऽव्यतिरिक्तमविशिष्टं चैतन्यस्वरूपम् " इति। "तत्सृष्ट्वा तदेवानुप्राविशद् " इति श्रुतेः भाष्ये एवमपि दर्शितम्— "अन्नमयादिष्वारभ्य 'अन्योऽन्तर आत्मा' इत्यतः "ब्रह्म पुच्छं प्रतिष्ठा" इत्यनया श्रुत्या सर्वविकल्पास्पदं निर्विकल्पः अस्यामेवानन्दगुहायाम् अधिगन्तव्य इति तत्प्रवेशः प्रकल्प्यते। निर्विशेषत्वाद्ब्रह्मणोऽवगमे अन्तःकरणगुहात्मसम्बन्ध आवश्यकः। यथा आलोकविशिष्टा घटाद्युपलब्धिस्तथा बुद्धिप्रत्ययालोकविशिष्टा आत्मोपलब्धिः" इति। जीवस्य परमात्मचैतन्यादभिन्नत्वं भगवता वासुदेवेनाप्येवं दर्शितम्— "ममैवांशो जीवलोके जीवभूतः सनातनः" इति। प्रपञ्चे विशिष्टशरीरान्विततया स्थितिः जीवस्य निश्चिता। जीवशक्तेः शरीरान्तर्गतप्रवर्तनसाकल्यसमन्वये तद्वारा अङ्गानां समग्रतया एकीभावसम्पादने च विनियोगः सुविदितो लोके। प्राणधारणादपि जीवत्वव्यवहारः चैतन्यस्य समभवदिति आचार्यविद्यारण्यैरुक्तम्[4]। विषयिणः सदात्मतायाः प्रमाणीकरणे अवगतिपर्यन्त-

---

[3]छान्दोग्योपनिषत्- V.xi.1

[4]कृत्वा रूपान्तरं जैवं देहे प्राविशदीश्वरः। इति ताः श्रुतयः प्राहुर्जीवत्वं प्राणधारणात्॥ पञ्चदशी-IV.10

ज्ञानसाक्षात्करणे च शक्तेरस्याः नान्तरीयकत्वमभ्युपगतमद्वैते। तत्त्वतो विचिन्तने शरीरावच्छिन्नतया जीवस्यायोग्यत्वमेवापतेत्। सङ्घटितस्वरूपावलोकने तु प्रथमतः जीवशक्तिः शरीरावस्थितकोशबाहुल्ये एकमपि कोशमविहाय सर्वत्र शरीरे समतयोपस्थिता। तत्रापि सङ्घटनमेतदपेक्ष्य शक्तेरतिसूक्ष्मरूपेण सर्वत्र व्याकरणं विशेषतया निरीक्षितव्यम्। शरीरेषु विविधप्रकृतिकेषु जीवः अनुभवविषयोऽविषयश्च सन् वैषम्यापाकरणेन स्थीयते इत्येषा वस्तुता चिन्ताशीलानामतीव कुतूहलावहा। अन्योऽपि प्रश्नः समाधानमपेक्षमाणः अत्रावतिष्ठते- भूमौ तादृशग्रहेष्वन्येषु वा जीवोऽयमखिलसंस्पर्शितया सन्निहितोऽस्ति वा न वा? विज्ञानशास्त्रानुरोधेन विचारे कृते स्पष्टमेतत्सिद्धान्तितं यत् जगदिदं द्रव्यसंज्ञितं चेतनमचेतनमिति द्वेधा विभक्तम्। जीवजालेष्विव सस्यजालेष्वपि जीवतत्त्वसुव्यवस्था अभ्युपगता। अत्र विज्ञानशास्त्रे समुद्घोषितनिरीक्षणपटुता प्रत्यक्षाधिष्ठिता, अत एव इन्द्रियावलम्बिनी केवला सा दृश्यातीते वस्तुनि अनुशीलनमलभमाना असम्पूर्णा प्राप्तेत्येषा श्रुत्याचार्यवचनादिभ्य अनुभोक्तव्या वस्तुता[5] "एको देवः सर्वभूतेषु गूढः"[6] "एक एव तु भूतात्मा भूते भूते व्यवस्थितः"[7], "सर्वं खल्विदं ब्रह्म"[8] इत्यादिश्रुतिभिः चैतन्यस्यैकस्य सर्वभूतेष्वनुवृत्तता सुव्यक्तं शब्दिता। प्रतिभासमानतयोपलब्धेषु विषयेष्ववेक्षिता जीवपदवाच्या शक्तिः सर्वत्राधिगम्या चानुभूयते यया विना प्रपञ्चे किञ्चिदपि सद्रूपतां न प्राप्नोति। परमाणुषु[9] तथा ततोऽप्यतिसूक्ष्मघटकेषु भौतिकेषु शक्तिरेषा आकर्षणादिस्वभाववत्तया व्यवस्थिता। जीवस्य निजं स्वरूपं तादृशं महदद्भुतं यत् तस्य वशे एव वैद्युताः कान्तिकाश्च प्रवाहाः शरीरान्तर्वर्तिनः नियमिताः। शक्तिविभागयोरेतयोः प्रपञ्चान्तर्गतविविधविषयाणामपि परस्परसमाकर्षणजननद्वारा बन्धसमुत्पादने महद् योगदानं विद्यते। प्रतिसारितास्वभावः निषेधात्मकतावगाहिचिन्ताप्रवाहानां व्युत्पादकः विद्वेषपदवाच्यः आभ्यामुपजातः। अन्तःकरणगताहङ्कारभागेन संयुक्तोऽयं जनितविशेषगत्या मनःसङ्घाते सङ्घटितः। अंशोऽयं विद्वेषजननद्वारान्तःकरणसङ्घर्षं प्रति हेतुभूतः, यस्याभिव्यक्तिरुतानभिव्यक्तिः साधारणा। या काचिदवस्थाप्यस्त्वेतयोः द्वयोः स्वरूपतः, द्वे अप्येते रोगदुरितादिबीजभूते अवशिष्येते। एवं देहव्यापारः सर्वथा जीवप्रवाहमविहायैव प्रवर्तते।

अन्योऽपि प्रश्नः अत्र प्रसक्ततया उपादेयो द्रष्टुं शक्यते— जीवेनैकेन शरीरान्तःकरणादेः व्यापारसुगमता समानेतुं शक्या किम्?

---

[5] कठोपनिषत्- II.i.1

[6] श्वेताश्वरोपनिषत्- VI.11

[7] ब्रह्मबिन्दूपनिषत्- 12

[8] छान्दोग्योपनिषत्- III.xiv.1

[9] शक्तिरस्त्यैश्वरी काचित्सर्ववस्तुनियामिका।
आनन्दमयमारभ्य गूढा सर्वेषु वस्तुषु॥

## ३. जीवसङ्घटनम्

जीवो यद्यप्यूर्जधारारूपेण विज्ञानशास्त्रे लाघवेनाभ्युपगतस्तथापि तस्य निजं रूपमुत्कृष्टमातृकात्वेनाकलयितव्यं यत् सर्वाधारतया शक्तिस्रोतसां प्रपञ्चे विद्यमानानां समन्वयविशिष्टं विराजते। परमतत्त्वं ब्रह्मैव विषयाणामुपरि विभेदजनकरूपेणोल्लङ्घनात्मिकायाः शक्तेः प्रवर्तकत्वेन वर्तते इत्येतद् वेदकालादारभ्य मननशीलैः पुरस्कृता वस्तुता।[10] प्रपञ्चगतसर्वप्रक्रियाणां नियन्ता समन्वयकर्ता च विराजते। ईक्षासमनन्तरमुपगता जीवगता चलनसमग्रता जीवतत्त्वसङ्घटनस्पष्टीकरणे सुतरामुपयुक्ता, यस्या अनुभूतिः प्राणे प्रतीकतया समुपलभ्यते। समकालिकतयोपलभ्यमान-विज्ञानशास्त्रपाठेष्वपि जीवस्य प्रपञ्चसमष्टौ सङ्घटितशक्त्यात्मनावस्थितिः वैविध्यपूर्णतया व्याकरणं च प्रमाणितौ। तत्त्वतोऽवेक्ष्यमाणे शक्तिविहीनं किञ्चिन्नावतिष्ठते, लोकानुभवैः "शिवश्शक्त्या युक्तो"[11] इत्यादिप्रमाणैश्च। सचेतनेष्विव सर्वेष्वचेतनेष्वपि शक्तेरस्याः समष्टिरूपाया विलासो वक्तव्य इत्येषा अद्वैतवेदान्तेन पुरस्कृता अतीवप्राधान्यावहा वस्तुता। विज्ञानशास्त्रेऽप्येतदत्यन्तमपेक्षणीयं विद्यते यद् आणवेषु तथा तस्मादपि लघुषु घटकेषु जीवात्मतामनवगाह्य काचित् स्थितिः नैवेति। एवं शास्त्रे इव विज्ञानशास्त्रेऽपि जीवस्य सर्वप्रपञ्चव्यापित्वमवितर्कितमभ्युपगतम्।

प्रसङ्गे अस्मिन्नेतादृशः प्रश्नः समायाति— जीवतत्त्वे सङ्घटनात्मकं किञ्चिदपि प्रवर्तनमस्ति किम्? सर्वैरप्यनधिगतरूपेण समुपलब्धस्य सर्वशरीरान्तर्गतात्मचैतन्यस्य सुव्याख्यानक्षमः सामान्यनियमः अस्ति किम्? जीवगतप्रक्रियाणां सम्यगवलोकनेन तत्राधारीभूतायाः शक्तेः मौलिकं विपरिवर्तनमनिषेध्यं प्रतिभाति। अत एव शक्तेरस्या जीवात्मिकायाः सर्वथा समनुयोज्यं नाम चैतन्यमित्यत्र न विप्रतिपत्तिः। मनुष्यशरीरा-न्तर्वर्तिनो मनसो विशिष्टतया प्रदत्तसीमासङ्कुचिता स्थितिः तादृशी निर्मितिर्वा न द्रष्टुं शक्यते। एतेन तस्य नियमसाधारण्याभावः अनिश्चिता स्थितिर्वा नाशङ्कनीया ययोरनावरण-मात्मचैतन्यसाक्षात्कारमन्वेवोपजायते।

प्रथमवीक्षणे जीवतत्त्वस्यैकतां समनुभोक्तुं न पारयामो वयं, तस्य गुणस्वभाव-गतवैचित्र्यसम्बन्धानां मिथो विभेदो न न्याय्य इति विवेक्तुं शक्यम्। व्यापाराणां सर्वेषां शक्तिगतानां यथावत्स्वरूपाधिगमेनैव तद्गतनिर्विशेषताविवेचनं कर्तुं युक्तम्। तद्द्वारा तेषामेकात्मता प्रकाशमुपयाति च। तेषामनियतावर्तनेन नूतनघटकानां तेभ्यो विसर्गश्च सम्पादितः सचेतनानामिव अचेतनानां च। एवमुत्पन्नानां पञ्चभूतानां जीवतत्त्वे व्यापारसम्बन्धाध्यासकरणाय सामर्थ्यं स्वभावसिद्धम्। निर्व्यापारतया जीवस्य पञ्चभूतेभ्य बहिरेव वस्तुतः स्थितिस्तथापि तन्मिथ उपजायमानसम्बन्धावगमाय व्यापारवत्तया

[10] श्वेताश्वतरोपनिषद् IV-10

[11] सौन्दर्यलहरी 1

प्रथममाकलयति जीवम्। एकैकस्मिन्नपि भूते स्वरूपविशिष्टा जीवशक्तिः व्याकृता निरीक्षितेत्यतो भूतानां मिथः सम्बन्धो भावात्मकसंयोगावगाहितया अभ्युपगन्तव्यः। व्याकृतस्यैकैकस्यापि जीवरूपस्यान्वयः विशिष्टमहाभूतान्विततया एवोपलभ्यते। अद्वैत-वीक्षणस्य विषये अस्मिन्नेतावता उक्तेन विरामो नेष्यते। पूर्वजन्मार्जितकर्मवासनाप्रचोदनेन जीवस्य पञ्चभूतसम्बन्धविनिश्चयः अवगन्तव्य इत्यद्वैतसिद्धान्तः। तत्रागच्छति महान् पञ्चभूतव्याकरणकर्ता परमात्मा, 'अहमात्मा गुडाकेश सर्वभूतव्यवस्थितः'[12] इत्युक्तेः। एतेनोक्तेनैतद्व्यक्तमायाति यद् अचेतनोऽपि भौतिकः कार्यवर्गोऽखिलः सचेतनजीवजालवदेव जीवतत्त्वसङ्घटितो विद्यते यतः जीवशक्तिः सर्वत्र विधार्यावस्थिता। एवमनिश्चितानामावर्तनानां दृश्यगतानां पुनराविष्करणानां च चेतन आधारः जीवः यस्य वास्तवं स्वरूपमनावृतं केवलबोधावगाहिमनःसु एव।

## ४. सङ्घटनम्— निश्चलो जनितकश्च

सङ्घटनपदेन परमार्थतः विषयाणां स्वरूपनिष्पादनद्वारा जीवतत्त्वसंयोजनं नूतनरीत्याविष्कारसहितं विवक्षितं यत्र पूर्वसिद्धकर्मादिकमपेक्षितमभ्युपगतम्। निर्व्यापारस्य चितो व्यापारवत्त्वदृष्टिरेवं समुपस्थापिता। जीवान्वितं नामरूपव्याकरणं बहुरूपतया प्रदर्शनं च सङ्घटनात्मकव्यापारान्नान्ये। अव्याकृतस्य व्याकृतत्वे सम्पादनीये पञ्चमहाभूतपर्यन्तस्य दृश्यस्य भूय एव तन्मात्रादिसंयोजनेन भौतिकपदार्थसर्जने विनियोगः अपि वक्तव्यः। एतेन दृश्यप्रपञ्चस्य सर्वविधव्याकरणं प्रति सीमावगाहिता वक्तव्या यद्विना जीवः यथार्थरूपेणावगन्तुं न शक्यः। यदा चिदात्मेश्वरः नामरूपव्याकरणादेर्निवृत्तं भवति तदैव जीवस्य बन्धेभ्यः अखिलेभ्यः विमुक्तिः औपनिषददर्शनदर्शिता।

दृश्यप्रपञ्चगतान् प्रतिभासप्रकारानधिकृत्य वर्तते जीवगतं जनितकं सङ्घटनम्। निश्चलसङ्घटने तु जीवतत्त्वप्रवर्तनानुरूपविषयस्वाभाव्यता मुख्यतया परिगणिता, किन्तु अत्र जनितकसङ्घटनविषये सर्वमपि दृश्यं जगदनेन विना क्षणमपि नावतिष्ठते इति विशेषः। अहङ्कारादिकमप्येतस्माद्रूपान्न विलक्षणं यत् अविद्यापदनिर्दिष्टं सर्वविषय-सङ्घटनकारणं परानपेक्षिततया स्वरूपसङ्घटितं च वर्तते। पाश्चात्त्यदार्शनिकः हसर्ल्-महाभागः अपि अहङ्कारस्याविद्यातः सङ्घटनं युक्तमिति मन्यते[13]। तन्मते सर्वं प्रपञ्चगतं सङ्घटनमविद्याम् (absolute ego) अधिकृत्य वर्तते। चैतन्यात्मकं जीवतत्वं यद्यपि न सङ्घटितं नित्यसिद्धत्वात्तथाप्यहङ्कारनाम्नी अविद्या सङ्घटकरूपेण प्रवर्तते। एतदेव चैतन्यस्वभावानावरणे सारांशतः जीवतत्त्वावगमे च निष्कपटं प्रचोदनभूतं विद्यतेऽद्वैतदर्शने। सांव्यवहारिकस्य जीवस्याहङ्काराश्रितत्वं प्रसिद्धं यत् सर्वविधं जीवस्वरूपविस्तरमवष्टभ्य वर्तते,

[12]भगवद्गीता- X.20
[13]Cairns D. Cartesion Meditation. op. cit. Sec-39

'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्'[14] इति स्मरणात्। अन्तःकरणगतप्रक्रियाभागो यद्यपि प्रतिभासमात्रोऽभिमतः तथापि तद्गतप्रक्रियासमाहारस्य नान्तरीयका काचिद् व्यवस्था सङ्गणयितव्येत्यतः सर्वाध्यक्षतया प्राणधारणकर्तुर्जीवस्यान्वयोऽत्र। तदुक्तम्— 'कोशोपाधिविवक्षायां याति ब्रह्मैव जीवताम्'[15] इति।

विज्ञानशास्त्रपक्षतः यद्यभिवीक्ष्यते तर्हि एतद्वक्तुं शक्यते यत् सूक्ष्मतमेष्वारभ्य प्रपञ्चगतसर्वेषु घटकेषु जीवः शक्तिस्वरूपाभिन्नोऽनुप्रविष्टः। चेतनेष्वसावेकैकमपि कोशम-भिव्याप्य वर्तते या जीवतत्त्वे तत्परतया समन्वितलक्ष्यत्वेन प्रमाणिता। आधारभूतो जीवः कोशेष्वनेकेषु विभक्तो भाति तथापि तस्याद्वितीयतया सिद्धता च स्वभावतः सम्यगुपस्थिता एवावशिष्यते। ऊर्जधाराविभेदा वस्तुतो विद्युत्कान्तिकरूपा आकर्षणात्मिकाश्च शक्तितरङ्गाः। विज्ञानशास्त्रे शक्तिप्रवाहानामेषां भौतिकता दृश्यप्रपञ्चेशितृत्वञ्च वैशिष्ट्येन निदर्शिते।

अद्वैतवेदान्तदर्शनानुसारतः अखिलं जगत् चैतन्यस्य निरुपाधिकस्य औपाधिको बाह्याविष्कारः प्रतिभासते। शक्तेरूर्जात्मना जीवात्मना चावभासः पञ्च-भूतान्तर्गतवायुद्वारा प्रवाहरूपेण सम्पादितः, नाडीषु मनसि च तद्वृत्तानिश्चयस्य अनुभवयोग्यतादर्शनात्। प्रपञ्चे सर्वत्र प्रवाहा एते प्रसारितगतयः। प्रकाशरूपो विद्युत्कान्तिकोर्जः भूतस्याग्नेः विशेषस्वरूपमावहन् संवर्तते इन्द्रियेषु मनसि च। भौतिकशरीरस्यावशिष्टभागनिष्ठप्रक्रियासौगम्यव्युत्पादने तु जलस्य मुख्यतमो भाग आस्थेयः येन शरीरसुस्थितिश्च समग्रतया निष्पादयितव्या।

प्रपञ्चसृष्टावाधारीभूतं तत्त्वं जीवः। द्रव्यरूपेण परिणतस्य सर्वस्य विरचनेऽयमध्यक्षः कारणशक्त्यात्मनावस्थितः चेतनाचेतनेषु विततप्रभावश्च। अद्वैतदृष्ट्या वीक्षणे यद्यपि जीवः सर्वत्रावस्थितः तथापि चेतनेष्विवाचेतनेषु तस्य व्यष्टिरूपतया भानं न संभवति। सर्वस्मिन्नपि द्रव्यविभागे शक्तेरूर्जरूपाया व्याकरणं संवृत्तं यथा क्षितेरात्मस्वरूपं तद्गतजीवरूपाणां समेषां संवर्धकमवशिष्यते। जीवेऽस्मिन्नधिष्ठिता कान्तिकशक्तिः विविधभागोपलब्धानां व्यक्तीनां समाहरणद्वारा परस्परान्वयवती क्रियते। अनयैव शक्त्या जीवानां मिथः सम्बन्धो जनितस्तथा च क्वचित्तेषां मिथः निःसारणबलानुरोधेन वैमुख्यमप्यापतितम्। कान्तिकशक्तेरस्याः प्रभावाद्विसृष्टाः वैद्युतशक्तिप्रवाहाः शरीरमखिलमवष्टभ्य वर्तते यैः शरीरगताया इव प्रपञ्चगताया अपि प्रक्रियायाः सर्वविधायाः समन्वयः कर्तुं शक्यः। एतादृशप्रक्रियाभेदविज्ञानादेवाद्वैते स्थूलशरीरवत् सूक्ष्मशरीरोऽप्यभ्युपगतः यस्य दृश्यत्वस्वाभावानतिरेकत्वं प्रमाणितम्। कान्तिकशक्तिप्रभाववान् देहः स्थूलः तथा वैद्युतशक्तिप्रभाववान् देहः सूक्ष्मश्चादिष्टः। अनेकयोनिसम्बन्धान्विते संसारचक्रावर्तने कारणशरीरस्याव्यभिचारिणी स्थितिः सङ्घटिता यद्यपि स्थूलदेहस्य तत्तद्भेदानुवृत्तिः

[14]भगवद्गीता- X.42
[15]पञ्चदशी- III.41

सुव्यक्तमनुभवमागता। एकैकस्मिन्नपि जन्मनि सूक्ष्मशरीरस्य कारणशरीराद्विशिष्टं व्याकरणं सम्प्राप्तं यत् नूतनतयोपादीयमानजन्मानुसारतया भवति। एतदेव जनितकसङ्घटनस्य मुख्यं तत्त्वमवस्थितं यत्र स्वभावसविशेषताः मुख्यं पदमलङ्कुर्वन्ति। प्रतिजन्म सञ्जायमाना विशिष्टाः स्वभावधर्मा कर्मानुरूपा अन्तःकरणगताहङ्कारानुरूपाश्चेति निरूपितमद्वैतदर्शने।

## ५. जीवः अनिरोध्यतया प्रसभमानीतः किम्?

अनिरोध्यतया बलादानीततया जीवात्मस्वरूपः विज्ञानशास्त्रे न प्रसिद्धप्रत्यय-पदमलङ्कुरुते। परिणामात्मिकां प्रक्रियां सृष्टिं मन्यमानस्य विज्ञानशास्त्रस्य दृष्टौ परिस्थितिविशेषानुरोधेन जीवस्य बहुरूपतया व्याकरणमुपादेयं विद्यते। एवं चेत्केषाञ्चन मनुष्याणामनुभवपथमागताः पूर्वजन्मसंस्काराः विशदीकरणमलभमानाः समवशिष्यन्ते इति समस्या तत्र। (Hypnotism इत्यादिद्वारा तेषामनावरणं च लोकसम्मतमद्य।) अद्वैतसिद्धान्ते वस्तुतैषा प्रागेवानुवृत्तास्ति यत् जीवात्मनः विशिष्टदेहान्वयः पूर्वजन्मार्जितकर्मनिश्चित इति। अत एवानिरोद्धव्यतया विषयेषु व्याकरणमुपगम्यते दर्शनेऽस्मिन् जीवस्य। कर्मणैव निषेधात्मकसम्बन्धादीनतिक्रम्य सत्त्वशुद्धिसम्पादनं परमतत्त्वसाक्षात्कारे भूयःसंसारप्राप्तिविमुक्त्यै च विहितमस्ति। एवं व्यावहारिकतायां स्वात्मनो भिन्नतया विषय-वर्गमाकलयति नरः। अत एव जगतो भानं जीवतत्त्वसङ्घटने न प्रत्याख्यानमर्हति। कारणभावात् जनितकविशेषावगाहिरूपं निर्माणं जीवसङ्घटने अत्यन्तमपेक्षितम्। तत्रैतस्यापि प्रश्नस्य प्रतिवचनमन्वेष्टव्यम्- कारणभावेन प्रथमतः सङ्घटितं जीवतत्त्वम् एकजन्मानुभूतजीवनचक्रान्ते कुत्र गच्छति? यद्यपि पुनर्जन्मादिसिद्धान्ताः विज्ञानशास्त्रे नाभ्युपगतास्तथापि रासिकाः भौतिकाश्चानुलोमलक्षणाः प्रक्रियाः तत्रापि स्वीकार्याः। एवंविधसमस्यापरिहाराय पूर्वजन्मविषयकसूक्ष्मदृष्ट्या अद्वैतदर्शने पूर्वजन्मार्जितकर्मणां तज्जन्यसंस्काराणां च व्यावहारिकतान्वितजीवसङ्घटनं प्रति महद्योगदानमावश्यकमस्तीति निर्णीतम्।

## ६. जीवः सर्वातीतस्वरूपः

प्रपञ्चे दृश्यमानानां सर्वेषां चेतनानामचेतनानां च व्युत्पादकत्वेन जीवः दृश्यातीत-स्वरूपः विषयी इत्युपादीयमानोऽद्वैतवेदान्तः तस्य परस्माद्ब्रह्मणोऽव्यतिरेकं समुद्घोषयति। सर्वविधविषयसङ्घटनमपि मूलभूतशक्त्या समुत्पादितमित्यतो जीवो व्यवहारातीतः संवर्तते। प्रपञ्चसर्जनभूमिकायां प्रथममुपागतमहामणिविस्फोटमनु जीवा व्याकृता इत्याशयादारभ्य प्रपञ्चनिरीक्षणपटु विज्ञानशास्त्रं कालापगमे सूक्ष्मतत्त्वनिचयान् तद्दर्शनपथगामिनः नवीनतया अभ्युपगच्छतीत्येतत् तस्य सुव्यवस्थाराहित्यं दर्शनवैकल्यं च प्रमाणयतः। यदा कदाचित् तद्गतनिगमनानि सदैकरूपे तत्त्वेऽविभक्ते प्राप्तव्यानि भवेयुरिति साध्यता चावशिष्यते

तत्र। अधुनातनगवेषणैः विज्ञानशास्त्रसम्बन्धिभिः प्रपञ्चसूक्ष्मतानिरीक्षणेऽत्यन्तमाशावह उत्कर्षः दर्शनपथमवापेत्येषा वस्तुता पण्डितानां ह्लादजनिका। अनाद्यविद्याप्रभावितमहङ्कारं परिवेष्ट्य जीवः व्यावहारिकोऽभिमतः अद्वैते। अहङ्कारस्य सर्वातीतत्वं सर्वथा नोचितं तथापि सत्त्वशुद्धिद्वारा शुद्धात्मविज्ञानसम्पादनेन जीवस्य दृश्यातीतस्वरूपमवगन्तुं पारयामो वयम्। अतः व्यावहारिकलोके जीवसङ्घटनं परया सद्देवतया ईक्षणपूर्वकमेव कृतमभ्युपेयं, तदान्वितव्याकरणस्य सर्वथा सर्वातीतत्वात्।

## ७. जीवः— सत्याभासता उपपत्तयश्च

व्यावहारिकजीवस्य परमार्थजीवस्वरूपाद्विभेदः अस्त्येव। वैयक्तिकपरिश्रमैः व्यावहारिकतामतिक्रम्य पारमार्थिकताविवेचनं क्रमेण शक्यसम्पाद्यम्। कारणभूते सत्तत्त्वेऽद्वितीये सर्वमपि प्रतिभासमानं जगदेकं भवति तत्त्वतः। सतः परमावस्था चेयम्। तथापि मनुष्यबुद्धिगम्यं तन्नागच्छति यदा तदा सत्याभासता सर्वत्रोपयाति। जीवविषये च एतदेवापतितम्। विषयाद्भिन्नस्य जीवतत्त्वस्याभ्युपगमो न निषेधार्हो लक्ष्यते तथापि तस्य सार्वलौकिकता उपादेयता च सर्वजगदभिव्यापकत्वरूपप्रकृतेर्विज्ञानादेव संबोद्धव्या। विषयी तु परमार्थतत्त्वं सर्वगतत्वेन सर्वसंस्पर्शितया तथा सर्वभूतविलक्षणतया सर्वाध्यक्षरूपेण च विभाति। देशकालवस्तुपरिच्छेदाभावादस्य सर्वथा परिच्छिन्ने प्रपञ्चे यत्र कुत्रापि स्थातुमलम्। वागाद्यपरिच्छिन्नं ब्रह्मस्वरूपत्वेनाविज्ञाय सर्वथा सत्यत्वमापेक्षिकं स्वस्य मन्यते जीवः। अनुभवपथमागच्छच्चैतन्यं जीवरूपं प्रतिभाससमर्पितप्रपञ्चे बहुधा विषयगतविभेदेन विभिन्नमवभासते। अभावाद्भावोत्पत्तिर्नेति युक्त्या श्रुत्यनुगृहीतया जीवः प्रपञ्चसृष्टावुपाधितयानीतः अद्वैतेऽभिमतः। प्रपञ्चव्याकरणं तु स्वाभाविकी प्रक्रिया अभिनिवेशरूपा वा न, किन्तु विशिष्टप्रकारकामतः समुपजाता सर्वत्रैककाले एव समरूपता-मवगाह्यावस्थितं व्यावहारिकबुध्यतीतं विशिष्टम्।

प्रायः पञ्चदशसहस्रलक्षसंख्याकवर्षेभ्यः (15 billion years) पूर्वमु-पजातमहामणिविस्फोटनादारभ्य प्रपञ्चस्य स्थितौ सर्वत्र सूत्ररूपतयानुगतत्वेन जीवस्यास्तित्वं निश्चेतुमशक्यमिति वादः विज्ञानशास्त्रपक्षत उन्नीतः। स्थिरभावोपेततया तैरङ्गीकृतपदार्थ-बाहुल्यस्य व्यावहारिकता एवानुरूपा न तु पारमार्थिकतेत्येतत् नूतनगवेषणदर्शिता वस्तुता। अनेन विषयाणामस्थिरस्वभाववत्वमुच्चैस्तरमुद्घुष्टम्। वस्तुतो निरीक्षणे जीवतत्त्वस्य सर्वत्रैकरूपेणानुगतत्वात् व्यावहारिकं किञ्चिदपि तद्ग्राह्यं न संवर्तते। निरंशत्वाच्च नात्मा विभक्तो भाति किन्तु सर्वत्र सम्पूर्णतया एव तस्योपस्थितिः। अत एव सिद्धेऽस्मिन् नरजन्मनि यद्यत्कर्मजालमभिनिर्वृत्तं सम्पद्यते तस्य सर्वस्यानागतजन्मानयने विनियोगः अद्वैताभिमतः। प्रमाणाद्यनभिगम्यमपि परमार्थमेतत् व्यावहारिकताया उपरि श्रेष्ठस्वरूपेणानुभोक्तव्यमेवेत्यतः

तत्र महानायासः त्रिकरणैः कर्तुं धीरेण भवितव्यं नरेणेत्येतदाह्वानमद्वैते।[16]

जीवः यद्यपि परमात्मनोऽभिन्नस्तथापि प्रकृतेर्नियमान् अनुल्लङ्घ्य स्थितिः तस्य। अनधिगतं प्रमाणागम्यं च जीवस्वरूपं व्यावहारिकलोके समनुभोगयोग्यकर्मादिसम्बन्धमपेक्ष्य श्रुत्यनुभवार्जितवस्तुतावधारणसामर्थ्येन विज्ञानपथमागच्छति। व्यावहारिकवत् पारमार्थिक-तत्त्वस्य सत्ताभ्युपगमे आधुनिकेषु दार्शनिकेषु विवादा आगताः। परब्रह्मणः प्रपञ्चात्मना व्याकरणं तेषां चिन्तापथि नायाति। किन्त्वद्वैते सर्वेषामेव सत्याभासानामुपरि चैतन्यरूपतया प्रकाशमानं जीवतत्त्वं सर्वथा ब्रह्मणोऽभिन्नमेवेति प्रतिज्ञातं च।

ऋतात्मकप्रकृतिनियमानां स्वरूपविनिर्णये प्राप्ते व्यावहारिकलोकस्य तद्गतजीवस्य च पारमार्थिकसत्तां विहाय या काचिच्चिन्ता प्रवर्तते तस्या असमीचीनत्वमेव विवक्षितम-द्वैतवादे। अहङ्कारस्य तथा पूर्वार्जितकर्मणां च जीवस्वरूपावरणमात्रे सामर्थ्यम्। अत एवाद्वैतवेदान्तेन एतत् बोधितं यत् सम्यग्ज्ञानेनावरकाणां सर्वेषां निवृत्तिमासाद्य जीवस्वरूपं परमार्थतया चैतन्याभिन्नमित्यनुभोक्तुं यत्नः अस्माभिः कार्य इति। अनेन भौतिकसत्ताव्यवस्थापनार्थमात्मीया पारमार्थिकी सत्ता निःसंशयमपेक्षणीया इत्यद्वैतमत-मविकलं राजते।

## ८. जीवात्मना व्याकरणम्— प्रतिलोमं विचिन्तनम्

परमार्थतले प्रकृत्यतीतवस्तुनोऽभ्युपगमो व्यावहारिकतायां तद्व्याकरणविषयान् प्रश्नान् पुरस्कुर्वन् वर्तते। विभिन्नतलगतवस्तुसंयोजनात्मके महत्यायासावगाहिनि सन्दर्भे चिन्तास्रोतसामनेकधा प्रवर्तमानानां व्यतिक्रम आपादनीयः। यथार्थ इत्यस्माभिर्जवेन विज्ञातुं शक्ये तले प्रकृतिसिद्धाः वस्तुताः जीवव्यक्तीनां स्वातन्त्र्यं च यथार्थ इत्येव गणयामासुः। एतद्विलोमचिन्ता त्वेवं प्राप्तव्या— व्यक्तीनां स्वातन्त्र्यं प्रति चिन्तने तस्य विविधप्रकरणगतत्वेन विभिन्नलक्ष्यता सर्वदाभ्युपेतव्या। जीवस्वाभाव्यादन्यं प्रकृतिसिद्धनियमानुसरणं व्यावहारिकतायामापतति च। पारिशेष्यात् परमार्थतो नित्यशुद्ध-बुद्धमुक्तस्वभावे जीवे विषयभावमागतं प्रकृतिनियमानुधावनेन। परस्य ब्रह्मणो व्याकरणं यदा व्यावहारिकलोकेऽभवत् तदा तस्य प्रकृत्यनुरोधिता युक्तिस्थिरता चायाते। तथाप्येवंविधव्याकरणस्य प्रयोजकान्वेषणे तु परमार्थतलादन्यत्र ततस्य व्यक्तित्वं नोपलभ्यते च। परमार्थतले तस्मात्परमतत्त्वादन्यन्न विद्यते इत्यतः जीवभूतादिव्याकरणे कश्चिद्धेतुः विनिश्चितः प्रत्ययगम्यो न प्रतिभाति। युक्त्यनुगृहीतः परिहारस्त्वद्वैते विषयमेतं प्रति प्रदर्शितं— 'सोऽकामयत', 'तदैक्षत' इत्यादिश्रुतिप्रतिपादितः कामः सर्वविधव्याकरणे साधनभूत इति। अयमपि परिहारः नात्र युक्ततम इति वक्तुं शक्यते, यतः परे तत्त्वे कामादीनामभावस्यैव सिद्धान्तितत्वात्। तथापि गत्यन्तराभावेन तस्य स्वीकारोऽत्र।

आत्मावगतिसम्पादने तस्य स्वीकारः अनुपेक्षणीय इति पूर्वाचार्यैः सिद्धान्तितम्।

[16]कठोपनिषत् २.१.१

लोकसिद्धस्वभावव्युदसनपूर्वकतया सृष्ट्यनुकूलविशिष्टमानसव्यापाररूपतया कामस्याभ्युपगमो विवक्षितः। अत एवात्र एतदपि विशेषतयोपादेयमस्ति यत् कारणभूतपरब्रह्मतत्त्वान्वितः कामः लोकसिद्धकामादभिमानविजृम्भितादत्यन्तं विलक्षणोऽस्तीति। ईक्षाकामादिषु नैर्मल्यं विषयभावग्रहानपेक्षं परमे तत्त्वे द्रष्टव्यम्। एवंविधेनापग्रथनात्मकेन विचिन्तनेन जीवानुविद्धं भूतभौतिकव्याकरणं तद्द्वारा तेष्वनुप्रविष्टगुणादिकं चान्योन्यसहभाविनाविति विनिश्चिनुमः। प्रसङ्गेऽस्मिन् अध्यारोपापवादन्यायः अद्वैतसिद्धान्ते विशदरूपतया विवृतः अतीव प्रसक्तः प्रतिभाति। न्यायेन तेनैतदेव दर्शितं यत् आत्मनः स्वरूपमविज्ञाय प्रथमतः तद्व्यतिरिक्तेषु विषयेष्वात्मबुद्ध्या करोत्यध्यारोपं, पुनश्च बहुनायासेनोपलब्धे अनुकूले प्रसङ्गे तद्वासनाविलयसम्पादनेन अध्यारोपाद्विनिर्मोकरूपतया अपवादस्वीकारञ्च। एवं स्थूलेभ्यो विषयेभ्यो भिन्नं विषयिगतमात्मानं तेभ्य एव सूक्ष्मनिरीक्षणपाटवेन विविच्यानुभोक्तुं यत्नः कर्तव्यः। परमार्थवस्तुविवेचने एतदेव लघूपायतयाद्वैते दर्शितम्।

## 9. जीवः— ध्रुवता वस्तुता च

प्रपञ्चे कालस्य प्राधान्यमवगाह्य एवं वक्तुं शक्यते यत् कालयाने सञ्चारी वर्तते जीव इति। स्वरूपावगतिपर्यन्तमनुविद्धैः अभिमानादिभिराविद्यकैः उद्विग्नः जीवः तेभ्यो विमुच्य शुद्धचैतन्यं लक्ष्यमभिजानन् अटति। कर्मणामहङ्कारस्य वा वक्रादपसर्पणं जीवस्य न शक्यम्। प्रकृतिनियमानां तले प्रवृत्तस्यैकैकस्यापि जीवस्य कर्मविशेषवरणे तदनुष्ठाने च स्वातन्त्र्यमस्ति। एतस्य स्वातन्त्र्यस्य विनियोगः यथा जीवेन क्रियते तथा कर्मानुष्ठानसम्भवः तत्पक्षत इत्यतः आगामिजन्मोचितयोनिनिर्णयोऽप्यनेनैव निष्पादितः। एवमस्य चक्रस्य अनुवृत्तिः स्वस्वरूपविज्ञानानुभवपर्यन्तमवशिष्यते। तं प्रकृत्य श्रुतयः— "आचार्यवान्पुरुषो वेद", "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये", "समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इत्यादयः। गुरोः सकाशात् प्रतिलब्धात्मस्वरूपनिर्णयः पुरुषः स्वान्तर्निहितस्य जीवस्य परमतत्त्वादनतिरिक्तं स्वप्रकाशस्वरूपं प्रत्यभिजानाति। तदा तद्गतजीवस्य सर्वकर्मक्षयः सकलवासनानिवृत्तिः पुनरावृत्तिरहितमुक्तिपदारोहणं चानुभवपथमायान्ति। एवं परमात्माभिन्नं जीवस्य ध्रुवं स्वरूपमिति शास्त्रतत्त्वमनुभवमात्रगम्यं वरीवर्ति।

कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः।
कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते॥

✦ ✦ ✦

# कामाद्यन्तःकरणधर्माणां केचन सदृशासदृशस्वभावविशेषाः

महेश्वरन् के.एस्.*

"कामः सङ्कल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव" इति श्रुतौ अनेकाः चित्तवृत्तय उक्ताः। "मन एव" इति सामानाधिकरण्येन प्रयोगदर्शनात् मनस एवैते परिणामविशेषाः, तथा च परिणामपरिणामिनोरभेदेन मृद्घटः इतिवद्व्यवहार इत्यवगम्यते। तत्र धीपदेन या चित्तवृत्तिरुक्ता तस्याः औपचारिकज्ञानमिति व्यवहारो वर्तते। अन्यासां चित्तवृत्तीनां ज्ञानत्वं नास्ति। यद्यपि चित्तवृत्तेर्जडत्वात् न मुख्यं ज्ञानत्वं किन्तु वृत्तिप्रतिफलितचैतन्यस्यैव तत् तथापि वृत्तिविशिष्टचैतन्यस्यैव अज्ञाननिवर्तकत्वं न तु स्वरूपचैतन्यस्य इति कृत्वा चैतन्यविशेषणत्वाद् वृत्तिरपि ज्ञानमित्यभिधीयते इत्येतत्सर्वं परिभाषायां स्पष्टम्।

आसां चित्तवृत्तीनां केचन अनुगतस्वभावाः केचन विलक्षणस्वभावाश्च अस्मिन् प्रबन्धे निरूप्यन्ते। अत्र सङ्कल्पव्यतिरिक्ताः सर्वा अपि वृत्तयः सत्तैकवेद्या भवन्ति। सत्तैकवेद्यत्वं नाम विद्यमानतादशायामवश्यज्ञानविषयत्वम्। घटादिपदार्था न सत्तैकवेद्याः। "घटो विद्यते मया तु न ज्ञात" इति अनुभवात्। सुखादीनां विषये एवं न। "मयि सुखमस्ति, मया तु नानुभूतम् " इति अनुभवाभावात् यदा सुखाकारा वृत्तिर्जायते तदा एव तद्गोचरज्ञानाकारा वृत्तिर्जायते इत्यङ्गीक्रियते।

ननु वृत्तिगोचरवृत्तिर्नाङ्गीक्रियते इत्युक्तं परिभाषायाम्। सत्यम्। ज्ञानाकारवृत्तिगोचरज्ञानाकारवृत्त्यन्तरं नाङ्गीक्रियते इत्येव तदर्थः। प्रकृते विषयरूपं सुखं नाम सुखाकारवृत्तिरेव। अतः विषयज्ञानार्थं विषयाकारवृत्त्यभ्युपगमः आवश्यक एव। ननु सुखादीनां केवलसाक्षिवेद्यत्वात् सुखप्रत्यक्षसिद्ध्यर्थं किमर्थं वृत्तिः स्वीकर्तव्या इति चेत्, अयं प्रश्नः परिभाषायामेव समाहितो यत् केवलसाक्षिवेद्यत्वं नाम न वृत्तिमन्तरा साक्षिवेद्यत्वं, किन्तु इन्द्रियजन्यवृत्तिमन्तरा साक्षिवेद्यत्वम् इति।

तथा च सुखानुभवस्थले अयं क्रमः। एकैकस्य सुखजनक एकैको विषयः। तच्च तत्तद्वासनावशात् नियम्यते। मधुरं भुक्त्वा सुखं जायते इत्यनुभवस्थले आदौ मधुरद्रव्येण सह रसनेन्द्रियसन्निकर्षः। तदा च वृत्त्यैक्यवशात् "इदं मधुरम् " इत्याकारकज्ञानाकारवृत्तिरादौ जायते। ततः परं सुखाकारवृत्तिरुत्पद्यते तयैव सह सुखाकारवृत्त्याकारज्ञानाकारवृत्तिरपि उत्पद्यते। तदा इदं सुखमिति ज्ञायते। अयमेव सुखानुभव इत्युच्यते। एवमेव दुःखभयरागद्वेषादिविषयाणामपि प्रत्यक्षमुपपादनीयम्। एते सर्वेऽपि अन्तःकरणधर्माः

---

*अध्यापकः, तमिलनाडराज्यस्थे मैलापुरस्थिते मद्रपुरीसंस्कृतमहाविद्यालये

सत्त्वैकवेद्या भवन्ति, धर्माधर्मादिकं मुक्त्वा। तेषां तु अयोग्यत्वात् न सत्त्वैकवेद्यत्वम्।

इच्छया जनयितुमशक्यत्वमपि अपरो विशेषः। अनुभवस्मृतिसाधारणं ज्ञानं, प्रमात्मकं भ्रमात्मकं संशयात्मकं चैतत्त्रयमपि न इच्छया जनयितुं शक्यते। मम प्रमा भवतु इति इच्छा प्रमोत्पत्त्यर्थं नापेक्षिता अनिच्छतोऽपि पुरुषस्य ज्ञानसामग्रीसत्त्वे ज्ञानोत्पत्तिदर्शनात्। ज्ञानसामग्र्यां सन्निहितायां सत्याम् इच्छा नोत्पन्ना इति कृत्वा ज्ञानोत्पत्तौ विलम्बादर्शनाच्च। तस्मात् सिद्धं ज्ञानसामग्र्याम् इच्छा न प्रविशतीति। अत एव कृतिरपि न प्रविशति। घटादिकं प्रति कुलालादेः कर्तृत्वं तदनुकूलज्ञानेच्छाकृतिमत्त्वेन रूपेण भवति। ज्ञानादिकं प्रति चैत्रादेः कर्तृत्वं केवलम् आश्रयमात्रेण न तु अनुकूलकृतिमत्त्वेन। अत एव चैत्रः पचति इत्यत्र पाकानुकूलकृतिमान् चैत्रः इति चैत्रो जानाति इत्यत्र ज्ञानाश्रयश्चैत्रः इति च शाब्दबोधे वैलक्षण्यमनुभूयते। एवञ्च ज्ञानेच्छाकृत्यघटितसामग्रीजन्यत्वं ध्यानभिन्नानां योग्यानां सर्वेषामन्तःकरणधर्माणां समानमिति निश्चीयते। ध्यानं तु यद्यपि अन्तःकरणधर्मः श्रुतौ सङ्कल्पशब्देन उपात्तः, तथा क्रियैव सा। ज्ञानस्यापि ज्ञाधात्वर्थत्वात् चित्तपरिणामरूपत्वात् च क्रियात्वं व्यवह्रियते तथापि गमनादिवत् विधेयक्रियात्वं नास्ति इत्याशयः।यतः या क्रिया इच्छया कृत्या च सम्पादयितुं शक्यते सैव विधेयक्रिया भवति। ज्ञानं तु न इच्छाकृतिजन्यमिति प्रागेव अवोचाम। अतः यत्किमपि ज्ञानं न विधीयते। न च निषिध्यते। ननु अमुं घटं पश्य इति केनचित् विहिते पूर्वम् अनभिमुखस्य पुरुषस्य इदानीमिच्छया अभिमुखत्वं भवति। घटं पश्यति च। इच्छाभावे तु नैव पश्यति इत्यनुभवो वर्तते। अतो ज्ञाने कथं विधिनिषेधौ न सम्भवतः इत्युच्यते? तत्रेदं बोध्यम्— उक्तस्थलेऽपि आभिमुख्यसम्पादनरूपा क्रियैव इच्छाजन्या। न तु ज्ञानम्। आभिमुख्यं नाम न इन्द्रियसन्निकर्षोऽपि। तस्यापि चक्षुषि उद्घाटिते सति स्वयमेव जायमानत्वादिच्छया नियन्तुमशक्यत्वात्। अतो न केवलं ज्ञानं; ज्ञानसामग्र्यपि न विधीयते। ज्ञानसामग्रीसम्पादनरूपक्रिया तु शक्यते विधातुमिति कृत्वा इदं जानीहि इत्यादीनि वाक्यानि ज्ञानजनकसामग्रीजनकक्रियाम् अनुतिष्ठ इत्यभिप्रायकतया योजनीयानि।

ननु स्मरणविशेषस्तु इच्छाकृतिजन्य इत्यनुभूयते। कदाचित् प्रयत्नेन मया स्मृतमित्यनुभवात्। प्रयत्नो नाम कृतिः। प्रयत्नात् प्राग् इच्छा चानुभूयते इति कृत्वा कथं स्मरणविशेषस्य इच्छाद्यघटितसामग्रीजन्यत्वमुच्यते इति चेत् श्रूयताम्। स्मरणमपि ज्ञानात्मकचित्तवृत्तिरिति कृत्वा तस्यापि ज्ञानसामान्यस्य स्वभावः अस्त्येव। तर्हि पूर्वोक्तानुभवः कथं युज्यते इति चेत् तत्रापि स्मरणसामग्रीत्वेन अभिमतसंस्कारोद्बोधादेव स्मरणं जायते। संस्कारोद्बोधो यत्र स्वभावतो न जातः, तत्र तत्कारणीभूतचित्तैकाग्र्यसम्पादनरूपक्रियायामेव इच्छाप्रयत्नजन्यत्वम्, न तु स्मरणे इति सूक्ष्मेक्षिकया अवगन्तुं शक्यते।

ननु आहार्यज्ञानस्य इच्छाजन्यत्वमस्त्येव। बाधकालीनेच्छाजन्यज्ञानमित्येव तल्लक्षणात्।बह्न्यभाववत्पर्वतो बह्निमानिति आहार्यज्ञानमिति नैयायिका उदाहरन्ति; इति चेन्न। तस्य ज्ञानत्वमेव वयं नाङ्गीकुर्मः। सङ्कल्पविशेषो ध्यानरूपः स भवितुमर्हति।

ननु सिषाधयिषाजन्या अनुमितिरङ्गीक्रियते न वा? यदि अङ्गीक्रियते तर्हि इच्छाजन्यत्वं ज्ञानस्य आगतम्। सिषाधयिषाया इच्छारूपत्वात्, अनुमितेश्च ज्ञानत्वादिति चेन्न। अनुमितेः सिषाधयिषाजन्यत्वं नाङ्गीक्रियते। पक्षतायाः किल अनुमितिहेतुत्वम्। पक्षता च न सिषाधयिषारूपा। किन्तु सिषाधयिषाविरहविशिष्टसिध्यभावरूपा। तत्र तु सिद्धिसत्त्वे सिषाधयिषा अपेक्ष्यते पक्षतानिर्वाहार्थम्। तस्मान्न दोषः।

ध्यानं तु नैवम्। तत्तु क्रियैव। अत एव ध्यानस्य विधेयत्वमस्ति। सत्तैकवेद्यत्वं च नास्ति।

ननु सत्तैकवेद्यत्वं नास्तीति कथं, अनुभूयते खलु ध्यानमिति चेत् सत्यं परन्तु न तादृशचित्तवृत्तेः उत्पत्तिकाले अनुभूयत इत्येतन्न पर्याप्तम्। यथा सुखादिषु यावत्पर्यन्तं सुखाकारवृत्तिरनुवर्तते तावत्पर्यन्तम् अहं सुखीत्यपि बुद्धिरनुवर्तते तथा अत्राप्यावश्यकम्। परन्तु ध्यानकाले यदा ध्येयैकपरं भवति अन्तःकरणं तदा ध्यानाकारवृत्तिगोचरज्ञानाकारवृत्तिर्न जायते। अहं ध्यायामि इति बुद्धिर्न भवतीति भावः।

योषा वाव गौतमाग्निः इत्यादिवाक्यबलात् योषिति जायमाना अग्नित्वप्रकारकचित्तवृत्तिः प्रयत्नेनैव जायते। बहुकालध्यानाभ्यासे सत्यपि विना प्रयत्नं न जायते। प्रयत्नन्यूनतामात्रं भवति। ननु धारावाहिकस्मृतिरेव ध्यानम्। एवञ्च ध्यानस्यापि स्मृतिरूपज्ञानत्वात् ध्यानमपि न विधीयते इत्यायातमिति चेन्न। ध्यानं न धारावाहिकस्मृतिः। स्मृतेः समानविषयकानुभवजन्यसंस्कारजन्यत्वनियमात्। योषितः अग्नित्वं न केनापि प्रागनुभूतमित्यतः योषिदग्निध्यानं न स्मृतिः।

कामः संकल्प इति श्रुतिः अल्पासामपि असंख्याकानाम् अन्तःकरणवृत्तीनाम् उपलक्षणम्। तेषां मध्ये सङ्कल्पशब्दवाच्या ध्यानात्मिका वृत्तिरेव एका विधेयक्रियारूपा भवतीत्येतावता आयातम्। तस्यैव कृतिजन्यत्वात्।

कृतिरपि न कृतिजन्या। परन्तु इच्छाजन्या भवितुमर्हति। इच्छा न इच्छाजन्या। इच्छामिच्छामीति अननुभवात्। परन्तु ज्ञानजन्या। इष्टसाधनता ज्ञानस्य इच्छाजनकत्वात्। ज्ञानं तु इच्छाकृतिजन्यं स्वप्नेऽपि न भवतीति उपपादितमधस्तात्। परन्तु ज्ञानं ज्ञानजन्यं भवितुमर्हति। व्याप्तिज्ञानस्य, पदज्ञानस्य च अनुमितिं शाब्दबोधं च प्रति करणत्वाङ्गीकारात्। एतावता सर्वमपि ज्ञानं ज्ञानजन्यमिति न प्रतिपिपादयिषितम्। प्रत्यक्षज्ञाने तदभावात्।

इत्थमल्पासामपि चित्तवृत्तीनां विशेषा विद्वद्भिः स्वयमूहनीयाः।

✦✦✦

# अद्वैतवेदान्तरीत्या सृष्टिस्वरूपविचारः

श्रीजित् टि.जि*

स्वमते शोश्रूयमाणा सृष्टिरियं केति तात्पर्यतो विचार्यते किञ्चित्। केवलमद्वितीय-ब्रह्मणि तात्पर्यं मनुते खलु वेदान्ती। तत्र च द्वितीयस्य प्रतिपादनेन कीदृशं लाभमभि-वाञ्छतीति जिज्ञासा समुदेति। तेन च कथं वा अद्वैतं स्वप्रतिष्ठामुपलभत इत्यपि। यदि शास्त्रप्रतिपिपादयिषितोऽयं विषयस्तर्ह्यपलापे तस्य शास्त्रविरोधापत्तिः। यदि वा शास्त्रानभिलषितस्तर्हि सृष्टिं प्रतिपादयताम् औपनिषद्वाक्यानां का स्याद्गतिरिति चिन्तनीया भवति। एतादृश्यः समस्याः स्वमते प्रत्यवतिष्ठन्ते। तत्र व्यवस्थाचिकीर्षया पूर्वाचार्योक्तवाक्यतात्पर्यमिह सङ्गृह्य यथामति विचार्यते।

आदावयं सृष्टिपदार्थः क इति वच्मि। स्थितस्य गतिश्चिन्तनीया इति न्यायेन सर्वलोकप्रत्यक्षस्य संसारस्य वर्णनं युक्तम्। त्रैकालिकनिषेधप्रतियोगिसर्पस्य प्रतीतिमात्रमवलम्ब्य वर्णनन्तु सम्भवति। एवं— “नेह नानास्ति किञ्चन”[1] इत्यादिभिः संसारस्य कालत्रयाभावप्रतियोगित्वं सिद्धमपि यथाप्रतीति तद्वर्णने नायुक्तिः शास्त्रविरोधो वा। सर्वसम्मतमिदं यत् स्वप्नोपलब्धव्याघ्रादीनां शतशो वर्णनम्। स्वजाग्रदवस्थायां निद्रोपप्लवादिदोषप्रयुक्तस्वाप्निकव्याघ्रस्तु सत्त्वप्रतीतिलक्षणः अनृतमात्र इति जानन्नपि स्वप्नदृक् सुष्ठु वर्णयति। नास्त्याश्चर्यं यदि तत्र, तर्हि लब्धव्यावहारिकसत्ताकस्य प्रपञ्चस्य वर्णनेन नास्ति कापि क्षतिरिति ब्रूमः। अपि चोपनिषत् खलु वर्णयत्येतज्जगत् लक्ष्यसिद्धये शिष्यशिक्षार्थं व्यवहारसिद्धभ्रान्तिमादाय केवलम्[2]। तदुक्तं पञ्चदश्याम्—

सदद्वैतं श्रुतं यत्तत्पञ्चभूतविवेकतः।
बोद्धुं शक्यं ततो भूतपञ्चकं प्रविविच्यते॥[3] इति॥

इत्थं व्यवहारसिद्धं कार्यजातं सकलमपि कर्तृकरणादिसापेक्षं तिष्ठतीति जगत्कार्यस्यापि कर्त्रादिसापेक्षत्वं लोकसिद्धप्रतीत्यनुरोधेन वर्णयेत्। तदा एव जिज्ञासूनां तर्ककुशलानां स च हृदिस्थो भवति। स्वेनार्जितसंस्कारसादृश्यमन्यत्रारोप्य खलु मानवाः सर्वेऽपि ज्ञानमर्जयन्ति। यत्र अपूर्वं कश्चिद्विषयं बोद्धुं कश्चिद् असमर्थोऽभवत्, ध्रुवं हि तत्र तद्विषयसदृशसंस्कारः तस्मिन् न विद्येत। अत एव अलौकिकविषयेषु केचिदेव मानवेषु स्वबुद्धिं

---

*अध्यापकः, संस्कृतविभागस्य, रामकृष्ण-मिशन्-विवेकानन्दविश्वविद्यालयस्य, पश्चिमवङ्गेषु हावडामण्डलस्थस्य बेलुरमठस्थस्य, email-sreegit@gmail.com

[1]क.उप २-१-११

[2]ब्रह्मणि सर्गादिकं लोकभ्रान्तिसिद्धमुपदिश्यते शुद्धब्रह्मप्रतिपत्त्यर्थमेव, न तु श्रुत्या तात्पर्येण प्रतिपाद्यते। (उप.भा.तै.व.ब्रह्म.अनु.८, पृ.५६४)

[3]प.द २-१

प्रसारयन्ति। मानवैरर्जितसंस्कारानुरोधेन कर्त्रादिसापेक्षं जगत् तत्पुरत उपस्थापयत्यनुकम्पया भगवती श्रुतिः। लोकस्तु दण्डकुलालादिकरणकर्त्रपेक्षत्वेनैव मृदः घटोत्पत्तिं साक्षयति। ततश्च यत्किञ्चित् कार्यं यद्युत्पद्येत, तर्हि तदुपादानं, तत्कर्ता च तत्र भवेतामिति तर्कतो युक्तिपराः ते निश्चिन्वन्ति। एतादृशसंस्कारवद्भ्यः मानवेभ्यः सोपादानं सकर्तृकञ्च जगत् वर्णयन्त्युपनिषद् इत्यस्ति किञ्चिद्रहस्यं स्वारस्यञ्च। अत एव खलु— सदेव सोम्येदमग्र आसीद्[4] इत्यत्र अग्रे इति कालः शिष्यशिक्षणमभिलक्ष्य बोधितः। तथा चोक्तमभिज्ञैः

कालाभावे पुरेऽत्युक्तिः कालवासनयायुतम्।
शिष्यं प्रत्येव तेनात्र द्वितीयं नहि शङ्क्यते॥[5] इति॥

लोकसिद्धभेदबुद्धिमादाय जगतः सृष्टिं वर्णयेद्यदि भवेत्तत्र स्वसिद्धान्तेनाऽविरोधः। यदि जगतः उपादाननिमित्तकारणे ब्रह्माव्यतिरेकेण स्यातां, तदा एव अद्वैतसिद्धान्तः अविरोधं तिष्ठति। उपादानकारणञ्च ब्रह्माभ्युपगन्तव्यं निमित्तकारणञ्च इति भाष्यकारेण "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् " इति सूत्रव्याख्यानावसरे समर्थितम्। इत्थञ्च ब्रह्म एव जगदाकारेण परिणमत इति वक्तव्यम्। ब्रह्मणः कूटस्थत्वेन विक्रियाभावात् विवर्ताभिप्रायकः परिणाम उक्त इति ज्ञेयम्। स्वाधिष्ठानोपमर्दं विनैव कार्यान्तरप्राप्तिः[6] विवर्तेनोद्दिश्यते[7]। यथा लोके सर्पाधिष्ठानभूता रज्जुः स्वनाशं विनैव सर्पाकारेण परिणमते। दुग्धादिकन्तु न तथा दध्यादिभावेन परिणतं कुत्रचिद् दृष्टम्। लोके कुलालः दण्डचक्रादिबाह्यसाधनमपेक्ष्यैव मृदुपादानकं घटं निर्माति, तदनपेक्ष्य निर्मातुं सामर्थ्याभावात्। ब्रह्म च बाह्यं यत्किञ्चित्साधनमनपेक्ष्यैव जगन्निर्माति। तदनपेक्ष्य निर्मातुं सामर्थ्यभावात्। तथा चोक्तं शङ्कराचार्येण, "पूर्णशक्तिकं तु ब्रह्म, न तस्यान्येन केनचित् पूर्णता सम्पादयितव्या"[8]।

"सदेव सोम्येदमग्र आसीत् "[9] इति श्रुत्या सृष्टेः पूर्वं सजातीयविजातीयस्वगतभेदरहितं ब्रह्म एवकारेणावधारितमित्यतः तदितरस्याभावात् निमित्तोपादाने[10] ब्रह्मण्येव अभिलषामहे। एतदाकारविशिष्टं घटमहं निर्मास्यामीति संकल्पपूर्वककार्यरचनामवलोकितवते तथैव प्रपञ्चरचनामपि वर्णयति, "सोऽकामयत बहु स्यां प्रजायेय"[11] इति।छान्दाग्येऽप्युक्तं समानं, "तदैक्षत बहुस्यां प्रजायेय"[12]। अत्र बहुभवनमित्यनेन कृत्स्नमपि ब्रह्म जगदाकारेण परिणतं स्यात्, अवयवाभावात्। अवयवेषु

---

[4]छा.उप ६-२-१

[5]प.द २-३८

[6]ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिर्भविष्यति। (ब्र.शां. २-१-९,२८

[7]तदसमसत्ताकोऽन्यथाभावः विवर्तः। (सि.सं १,पृ.४५)

[8]ब्र.शां. २-१-८,२५

[9]छा.उप ६-२-१

[10]यद्धि यस्मात् प्रभवति यस्मिन् च प्रलीयते तत्तस्योपादानम्। (ब्र.शां. १-४-७)

[11]तै.उप २-६-१

[12]छा.उप ६-२-३

सत्सु खलु किञ्चिद्देशेन परिणतं किञ्चिद्देशेन न परिणतमिति वक्तुं युक्तम्। तथाहि 'पादोऽस्य सर्वाभूतानि त्रिपादस्यामृतं दिवि'[13] इति॥

तथा 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्'[14] इति श्रुतिस्मृतिभ्यां पादेनैकेन जगत्तिष्ठतीति ज्ञानान्नेयं शङ्का बलवती। 'स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम्'[15] इत्यन्यत्रापि स्पष्टत्वात् शङ्कागन्धस्याऽपि नास्त्यवसरः। अंशतः परिणतमित्ययुक्तं मृदादिपरिणामपक्षे, किन्तु रज्जुसर्पादिपक्षे तु युक्तमेव विवर्तस्याङ्गीकारात्। विस्तृतं रज्जुपदार्थं कश्चन अंशतः दृष्ट्वा सर्पमारोपयतीति लोकतः सिद्धम्। रज्जौ यदंशावच्छेदेन अज्ञानमावृतं तदंशावच्छेदेन खल्वविद्या सर्पं विक्षिपति। अंशतः अवलोकितस्य रज्जुपदार्थस्य अंशत एव सर्पत्वभ्रान्तिः युक्ता।

एवमुत्पत्तेः पूर्वं घटस्य तत्समवायिकारणे मृदि कारणात्मनाऽवस्थानमिति सत्कार्यवादम् अभ्युपगच्छता वेदान्तिना प्रपञ्चस्यापि तथैव सृष्टेः प्राक् कारणात्मनाऽ-वस्थानमङ्गीकर्तव्यम्। तथा च घटाभिव्यक्तियोग्यदण्डकुलालादिबाह्यसामग्रीयोजनमात्रेण खलु तिलनिहिततैलवत् मृदि सिद्धस्यैव घटस्योत्पत्तिर्दृष्टा। यथा वा बीजनिहितशक्तिरेव नानापत्रशाखासमन्वितेन महावटवृक्षेणाऽभिव्यज्यते। एवमेव ब्रह्मणि सूक्ष्मेण स्थितं जगदेव ब्रह्मसङ्कल्पवशादभिव्यज्य नामरूपात्मना स्थूलं भवति। एतदेव ब्रह्मणः सङ्कल्पपूर्वकं बहुभवनं नाम। 'यदात्मस्थे अनभिव्यक्ते नामरूपे व्याक्रियेते तदा नामरूपे आत्मस्वरूपापरित्यागेनैव, ब्रह्मणा अप्रविभक्तदेशकाले सर्वावस्थासु व्याक्रियेते'[16]। घटं प्रति कुलालस्य केवलम् उत्पत्तिकारणत्वमेव, किन्तु प्रपञ्चस्य उत्पत्त्यादित्रितयमपि कारणं ब्रह्मणि वर्तते। तथा च श्रुतिः

यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति।
यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व तद्ब्रह्मेति॥'[17]

'जनिकर्तुः प्रकृतिः'[18] इति पाणिन्यनुशासनादत्र यत इति पञ्चम्याः प्रकृतित्वे सिद्धे तच्च ब्रह्मण्येव स्थितम्। 'यद्भूतयोनिं परिपश्यन्ति धीराः'[19] इत्यन्यत्रोपलब्धः योनिशब्दः प्रकृत्यर्थक इति 'योनिश्च हि गीयते'[20] इति सूत्रेणाचार्येण समर्थितमपि। 'कर्तारमीशं पुरुषं ब्रह्मयोनिम्'[21] इति श्रवणात् कर्तृभूतं निमित्तकारणमपि ब्रह्मण्येव स्थितम्।

---

[13] पु.सू ३
[14] भ.गी १०-४२
[15] पु.सू १
[16] तै.उप २-६,पृ.१४१
[17] तै.उप ३.१
[18] पा.सू १-४-३०
[19] मु.उप १-१-६
[20] ब्र.शां १-४-७,सू-२७
[21] मु.उप ३-१-३

अज्ञानमूलमिदं जगद्भातीत्यभिज्ञवाचमनुसृत्य[22] तस्याऽपि जगदुपानत्वमस्ति। ततश्च अज्ञानं कार्याकारेण परिणमते चैतन्यञ्च तदाकारेण विवर्तते इति अज्ञाने परिणाम्युपादानत्वं ब्रह्मणि विवर्तोपादानत्वञ्च स्थितम्। शुक्त्यवच्छिन्नं चैतन्यमेव भ्रमस्थले रजताकारेण विवर्तते, अज्ञानं तदाकारेण परिणमते[23] चेति विशेषज्ञानां लोकतः सिद्धत्वात् नास्त्यस्यापूर्वत्वम् किञ्चित्। दोषवतामेव द्वितीयवस्तुप्रतीतिर्दरीदृश्यते। दोषश्च निद्राज्ञानतिमिरादिकमिति भ्रमभेदेन भिद्यते। तथा च निद्रोपप्लवात् स्वप्नानुभवः, तिमिरेण द्वितीयचन्द्रभानं, तूलाऽविद्यया शुक्तौ रजतभानं, मूलाऽविद्यया ब्रह्मणि जगद्भानमिति विविच्य जानीमः। इत्थञ्च अज्ञानसम्बन्ध एव रजतप्रतीतिं जगतः प्रतीतिं वा उत्पादयन्ति। अज्ञानसम्बन्धाभावाद् विद्वान् जगन्नोपलभते, तद्भावाद् अविद्वान् तदुपलभते च। तिमिरग्रस्तः द्वितीयं चन्द्रं पश्यति, तत्काले एव तिमिराग्रस्तः अपर एकमेव चन्द्रं पश्यति। एवमेव जगतः प्रतीतिस्तु अज्ञानदोषवतां केवलं न तु विगतदोषाणाम्। एतदर्थपर्यालोचनया द्वितीयवस्तूत्पत्तये अस्त्यज्ञानस्य कारणत्वमिति लभ्यते।

ब्रह्मविवर्ततया जगतः तद्रूपत्वात् जगदनुभवेन अविद्या कुतो न निवर्तत इति संशयः स्यात्। स्वमते अविद्यानिवृत्तिः अधिष्ठानज्ञानादेव भवति न तु कार्यज्ञनात्। यो यदधिष्ठानाज्ञाननिमित्तं भ्रममनुभवति स तदधिष्ठानज्ञानप्रयुक्ताज्ञाननिवृत्तिद्वारैव तद्भ्रमनिवृत्तिः भवतीति क्लृप्तोऽयं नियमः। यथा वा यद्यपि रज्जुरेव सर्पत्वेन प्रतिभाति तथापि आरोप्यसर्पत्वज्ञानेन भ्रमनिवृत्तिर्नैव दृष्टा। एवमेव जगदधिष्ठानब्रह्मज्ञानमेव अविद्यां निवर्तयति। सृष्टेः पूर्वं ब्रह्ममात्रस्यास्तिता श्रुत्यवधारिता। तत्काले अज्ञानं नास्तीति कारणात्, कार्यनियतपूर्ववृत्तित्वरूपकारणत्वम् अज्ञाने अनुपपन्नमिति चेन्न, सहकारिकारणत्वादविद्यायाः, तच्च कार्यनियतपूर्ववृत्ति नास्ति, अपि तु कार्योत्पत्तिसमकालं भवति। यन्मते कपालद्वयसंयोगाद् घटः निष्पद्यते, तत्र घटोत्पत्तिहेतुः संयोगः तदुत्पत्तेः पूर्वं नास्ति, परन्तु घटोत्पत्तिसमकालम् एव भवति।

निर्विकल्पे शुद्धब्रह्मणि जगदधिष्ठानत्वं तत्कर्तृत्वञ्च न संभवतीति तदधिष्ठानं ब्रह्म व्यवहारभाक् इति स्वीकर्तव्यम्। तथा च शाङ्करगीः 'परिकल्पिते ब्रह्मणि सर्वव्यवहारविषये, न तु परमार्थतो निर्विकल्पे ब्रह्मणि कश्चिदपि विकल्प उत्पद्यते'[24] इति। एतदेव वनमालाव्याख्याने[25] स्पष्टीक्रियते 'संव्यवहारविषयत्वयोग्यं यदज्ञातं ब्रह्म तस्मिन् सर्गादिकं लोकसिद्धभ्रान्तिसिद्धमुपदिश्यते'। शुद्धब्रह्मणः अभिधानाप्रकाश्यत्वं 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह'[26] इति श्रुत्या निर्णीतञ्च। जगदचेतनं ब्रह्म चेतनञ्चेत्यत्यन्तविरोधात्तयोः

---

[22]वे.सं पृ-३९०

[23]प्रातिभासिकरजतञ्चाविद्यापेक्षया परिणामः,चैतन्यापेक्षया विर्तते इति चोच्यते।(वे.प. १,पृ-१०७)

[24]तै.उप. २-८-५ पृ-१८४

[25]वनमाला-तैत्तिरीयोपनिषद्भाष्यटीका-श्रीमदच्युतकृष्णानन्दतीर्थः

[26]तै.उप २.१

कार्यकारणानुपपत्तिरित्याशङ्का इत्थं प्रतिसमाधीयते, यत् कार्यकारणयोरत्यन्तसाजात्यमिति नास्ति कश्चिन्नियमः येन कार्यकारणभावस्य भङ्गः तद्वैजात्यप्रयुक्तस्स्यात्।

दृश्यते च हि लोके शुक्लतन्तुभ्यः शुक्लपटप्रसव इति साजात्येऽपि तन्तुगत-परिमाणादीनां पटेऽनुपलम्भात् तयोर्वैजात्यम्। उक्तञ्च भाष्यकारेण[27] महद्दीर्घाधिकरणे 'द्यणुकादणोर्ह्रस्वाच्च सतो महद्दीर्घं च त्र्यणुकं जायते नाणु नो ह्रस्वम्' एवञ्च 'चेतनाद्ब्रह्मणोऽचेतनं जगज्जनिष्यत' इति। तदुत्तरं तात्पर्यञ्च प्रकटितमाचार्यैरेव 'नह्यचेतना नाम चेतनाविरोधी किञ्चिद्गुणोऽस्ति चेतनाप्रतिषेधमात्रत्वात्' इति। चेतनविशेषात् पुरुषाद्चेतनरोमनखादीनामुत्पत्तिः, अचेतनगोमयाच्चेतनवतां कीटादीनामुत्पत्तिरिति चेतना-चेतनयोः परस्परकारणत्वं कार्यत्वञ्च लोकत एव सिद्धमिति नापूर्वं किञ्चिदिहोपन्यस्तम्।

तथाऽपि मृदुपादानकारणान्विते घटे मृद्गतरूपाद्यंशा उपलभ्यन्त इत्यत एव ब्रह्मोपादानकारणान्विते जगति ब्रह्मगतांशाः केचनावश्यं भवेयुरिति लोकोपलब्ध्यानुभवाधारेण कश्चित् जिज्ञासते, तर्हि नास्ति समाधानमिति न। तथा च लोके घटपटादिषूपलभ्यमाना सत्ता, मानवाद् ब्रह्मपर्यन्तेषु सकलेषु प्राणिषु तरतमभावेनानुभूयमानं सुखं, आब्रह्मस्तम्बपर्यन्तानां भानमित्येतत्त्रितयमपि ब्रह्मगतांशा एव। तर्हि अविद्यागतांशानामनुपलम्भात् कार्यजाते तस्याः परिणाम्युपादानत्वे नास्ति युक्तिरिति न वाच्यम्। नामरूपयोः अविद्याकल्पितत्वेनैवोपलभ्यमानत्वात्। तथा चाभिज्ञवचनम्

"अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्।
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्॥" इति॥

जगति नामरूपांशद्वयव्यवहारस्तु अविद्यापरिणामात्मकनामरूपसम्बन्धाद्[28] इति वेदान्तपरिभाषायामप्युक्तम्। अत एव "तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्"[29] इति श्रुत्या अविद्याकृतनामरूपयोः ब्रह्मज्ञानेन बाध उच्यते। अपि च प्रपञ्चे अनुभूयमानं सत्त्वरजस्तमोगुणा अविद्यागता एव। ते च गुणाः कार्यानुमेया भवन्ति। वैराग्यादिना सत्त्वं, कामक्रोधादिना रजः, तथा आलस्यादिना तमश्च[30] तत्तद्धेतुत्वेन ज्ञेया भवन्ति। 'इमानि भूतानि त्रिगुणमायाकार्याणि'[31] इति परिभाषाकारस्य वचनमस्ति। तदुक्तं साङ्ख्येऽपि

सत्त्वं लघुप्रकाशमिष्टमुपष्टम्भकं चलञ्च रजः।

---

[27]ब्र.शा २-२-२

[28]वे.परि १-पृ-३३३

[29]मु.उप ३-२-८

[30]वैराग्यं क्षान्तिरौदार्यमित्याद्याः सत्वसम्भवाः
कामक्रोधौ लोभयत्नावित्याद्याः रजसोत्थिताः॥ (प.द २-१४)
आलस्यभ्रान्तितन्द्राद्या विकारस्तमसोत्थिताः। (प.द २-१५)

[31]वे.परि १-पृ-३३७

गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥[32] इति ॥

अज्ञानन्तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकम्[33] इति वेदान्तसारेऽप्युक्तम्। एवं सर्वैः अज्ञानस्य गुणत्रयोपेतत्वमङ्गीकृतमस्ति। 'देवात्मशक्तिं स्वगुणैर्निगूढाम्'[34] इति श्रुत्यापि स्वगुणैरिति शब्देन अविद्यागतसत्त्वादिगुणत्रयं बोध्यते।

सृष्टिबोधकवाक्यानामपि अद्वैतब्रह्मप्रतिपादकत्वेनैव प्रामाण्यं व्यवस्थापनीयं भवति। अन्यथा ब्रह्मणि समन्वयाधिकरणोक्तः सर्वेषां वेदान्तानां समन्वयः[35] भज्येत। अर्थवादो-पासनापरवाक्यानामप्येवमेव व्यवस्था द्रष्टव्या। तेन च अध्यासभाष्यान्तोक्तं वचनमपि सङ्गतं भवति। तथा च आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते इत्युक्त्वा यथा चाऽयमर्थः सर्वेषां वेदान्तवाक्यानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्याम'[36] इति ग्रन्थारम्भे सूचितम्। सृष्टिविचारमकृत्वा 'नेह नानास्ति किञ्चन' इति श्रुतिबोधितः यः निषेधधीविषयप्रतियोगी प्रपञ्चः स च अत्यन्तमप्रसक्तः स्यात्। तेन च अलब्धसत्ताकस्य कस्यचित् निषेधेन अप्रसक्तप्रतिषेध इति दोषोऽप्यापद्येत। कारणाव्यतिरेकेण कार्यभूतस्य प्रपञ्चस्य वर्णनमुक्त्वा ब्रह्मण्येव प्रपञ्चोपादानत्वञ्च प्रदश्यते। अत एव वायौ निषिद्धस्य रूपस्य अन्यत्रसत्त्वाशङ्का इव ब्रह्मणि प्रपञ्चे निषिद्धे अन्यत्र सत्त्वशङ्का नोत्तिष्ठति। एवञ्च कर्तृकरणोपादानादिसर्वप्रकारेण प्रपञ्चस्य वर्णनं कृत्वा अलङ्कृत्य शिरच्छेद इव नेह नानास्ति किञ्चनेत्यादिश्रुतिभिः तन्निवार्यते। लक्ष्यसिद्ध्यर्थमेवाऽयं सृष्ट्युपायः कल्पितः। यथा वा भवननिर्माणकाले कुट्टिमस्य (floor) स्थितिमुद्दिश्य बहून् स्तम्भान् प्रकल्प्य, ततः सिद्धे च कुट्टिमे ते निवार्यन्ते।

असत्यभूतस्य रजतनिवृत्तिद्वारा यथा तदधिष्ठानशुक्त्युपलब्धिस्तद्वत् मिथ्याभूतप्रपञ्च-निवृत्तिद्वारा तदधिष्ठानब्रह्मप्राप्तिः सिध्यति। प्रपञ्चनिवृत्तिस्तु शास्त्रेण सम्भवति। किं शास्त्रेण प्रपञ्चस्य निवृत्तिः प्रतिपाद्यत इति शङ्का इष्टापत्त्या परिह्रियते, अविद्याकल्पितज्ञानज्ञातृज्ञेय-रूपभेदनिवृत्तिपरत्वात् शास्त्रस्य[37]। इह वेदान्ते अनात्मनिवृत्तिपरत्वेनैव शास्त्रस्य प्रामाण्यञ्चेष्यते, न तु अज्ञातज्ञापकत्वेनति तु रहस्यम्[38]। प्रपञ्चनिवृत्तिरूपाभावश्च आरोप्याधिष्ठानाव्यतिरेकेण तिष्ठतीति नास्त्यत्र अद्वैतभङ्गोऽपि। तथा चोक्तं परिभाषाकारेण

---

[32]सां. १३

[33]वे.सा १

[34]श्वे.उप.१-३

[35]सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येण एतस्यैवार्थस्य प्रतिपादकत्वेन समनुगतानि। (ब्र.शां १-१-४)

[36]ब्र.शां.अ.पृ-२

[37]नहि शास्त्रमिदन्तया विषयभूतं ब्रह्म प्रतिपिपादयिषति, किं तर्हि? प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदविद्याकल्पितं वेद्य-वेदितृ-वेदनादिभेदमपनयति। (ब्र.शां १-१-४)

[38]शास्त्रन्तु अन्त्यं प्रमाणम् अतद्धर्मारोपणमात्रनिवर्तकत्वेन प्रमाणत्वम् आत्मनि प्रतिपाद्यते, नतु अज्ञातार्थज्ञापकत्वेन। (भ.गी.शां २-१८)

'अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः'[39] इति। 'यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुतयस्तत्पदवाच्यार्थस्य समर्पिका इति सिद्धान्तबिन्दावादावुक्तमपि[40]।

सृष्टिमभ्युपगम्य द्वैतभाषया[41] लोकाय तत्त्वमुपदिश्य मुक्तिकाले आचार्यः शिष्यप्रश्नपरिजिहीर्षया 'न भूमिर्न तोयं न तेजो न वायुर्न खम्'[42] इत्यादिश्लोकैः कृत्स्नस्यापि द्वैतस्यापलापः कृतः। किञ्च 'न चैकं यदन्यद्द्वितीयं कुतः स्यात्' इति एकत्वमपि अपोद्यते। अस्य तात्पर्यं सिद्धान्तबिन्दौ प्रकटीचकार, यत् 'एकत्वसंख्यायोगि एकं, तदपेक्षाबुद्धिजन्यद्वित्वसङ्ख्यायोगि द्वितीयम्। तत एकाभावे द्वितीयं कुतः स्यात्' इति। अशुद्धमिदं जगत् शुद्धे ब्रह्मणि स्थितमिति तच्छुद्धिभङ्गः नाशङ्कनीयः, जगतः केवलं कल्पनामात्रत्वात्। 'नहि चन्द्रमसि तैमिरिकद्वितीयकल्पना चन्द्रमसो द्वित्वमावहति तस्माद्वास्तवी परिणामकल्पनाऽनुपपद्यमानापि न परमार्थतो ब्रह्मणि अनुपपत्तिमावहति'[43] इति भामतीकारवचनमिह स्मृत्वा उपसंहरामि।

✦✦✦

## सङ्केताक्षरसूची

| | |
|---|---|
| छा.उप.- छान्दोग्योपनिषत् | प.द.- पञ्चदशी |
| तै.उप.- तैत्तिरीयोपनिषत् | ब्र.शा.- ब्रह्मसूत्रशाङ्करभाष्यम् |
| पु.सू.- पुरुषसूक्तम् | भग.गी.- भगवद्गीता |
| वे.प.- वेदान्तपरिभाषा | वे.सा.- वेदान्तसारः |
| श्वे.उप.- श्वेताश्वतरोपनिषत् | सि.बि.- सिद्धान्तबिन्दुः |
| वे.सं- वेदान्तसन्दर्भः | भ.गी.शां- भगवद्गीताशाङ्करभाष्यम् |
| प्र.द्वा.- प्रकरणद्वादशी | ब्र.शां.सू- ब्रह्मसूत्रशाङ्करभाष्ये सूत्रम् |
| क.उप- कठोपनिषत् | सा.का-साङ्ख्यकारिका |
| पा.सू-पाणिनीयं सूत्रम् | सि.सं.- सिद्धान्तलेशसङ्ग्रहः |

ब्र.शां.परि.क.भा.- ब्रह्मसूत्रशाङ्करभाष्यं परिमल-कल्पतरु- भामतीव्याख्यासमेतम्
उप.भा.तै.व.ब्रह्म.अनु- तैत्तिरीयभाष्यटीकायां वनमालायां ब्रह्मान्दवल्ल्याः अनुवाकः

---

[39]वे.परि ६,पृ-३०४

[40]सि.बि पृ-४५३

[41]चोद्यं वा परिहारो वा क्रियतां द्वैतभाषया।
अद्वैतभाषया चोद्यं नास्ति नापि तदुत्तरम्॥ (प.द २-३४)

[42]प्र.द्वा पृ-३४५

[43]ब्र.शां.परि.क.भा. २-१-९, सू-२६,पृ-४७५

# अनुशीलितग्रन्थसूची


1. उपनिषद्भाष्यम् (श्रीमदानन्दगिर्याचार्यकृतटीकया कठादीनां प्रसिद्धाचार्यान्तर-टीकाभिः सटीकतैत्तिरीयवार्तिकेन च समलङ्कृतम्) Volume-1, Mahesh Research Institute, 2004
2. छान्दोग्योपनिषत्, गीताप्रेस , गोरखपूरम्।
3. ईशादि नौ उपनिषद्, गीताप्रेस गोरखपूरम्
4. भगवद्गीता, गीताप्रेस, गोरखपूर-2000.
5. शङ्कराचार्यः, ब्रह्मसूत्रशाङ्करभाष्यम्, Motilal Banarasidas, New Delhi, 2007.
6. अप्पय्यदीक्षितः, सिद्धान्तलेशसङ्ग्रहः, Ed. Dvivedi Parsanath, v1, Sampurnananda sanskrit Visvavidyalaya, Varanasi, 2005
7. विद्यारण्यमुनिः, पञ्चदशी (रामकृष्णकृतटीकासहिता), Chowkhamba Sanskrit series office, Varanasi, 2002.
8. धर्मराजाध्वरीन्द्रः, वेदान्तपरिभाषा, Chowkhamba Vidyabhavan,Varanasi, 2006
9. ब्रह्मसूत्रशाङ्करभाष्यम् (परिमल-कल्पतरु-भामतीविलसितम्) Krishnadas Academi, Varanasi, 2000.
10. ईश्वरकृष्णः, साङ्ख्यकारिका (तत्त्वप्रभासंस्कृतहिन्दीव्याख्याटिप्पणीविभूषिता), Tripathi Ramsankar, Chowkhamba Krishndas Academi, Varanasi, 2006
11. वेदान्तसन्दर्भः, Mahesh Research Institute, Varanasi, 1989
12. सदानन्दयोगीन्द्रः, वेदान्तसारः (भावबोधिनीसंस्कृतव्याख्या तथाहिन्दीव्याख्या-समेतः), Chowkhamba Vidyabhavan, Varanasi, 2004
13. प्रकरणद्वादशी(श्रीपद्मपाद-श्रीमद्विद्यारण्य-श्रीमन्महानन्दगिर्यादिप्राचीनाचार्यविरचित-टीकाभिः समलंकृता) Ed. Shastri S.Subrahmanya, Mahesh Research Institute, 2004
14. मधुसूदनसरस्वती, सिद्धान्तबिन्दुः, Ed Sastri Trayambakaram, Rashtriya Sanskrit Sansthan, 1989.

# धर्मराजाध्वरीन्द्रमतानुसारम् आगमप्रमाणविचारः

दिनेश रसाळः*

लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः इति खलु प्राचां वाचां सारः। वेदवेदान्तादिसमग्र-सुरभारतीविलासवैभवस्वरूपावबुबोधयिषया प्रवृत्तानां प्रमाणानामस्ति वैशिष्ट्यं दार्शनिक-जगति। तत्र च प्रत्यक्षानुमानोपमानागमार्थापत्त्यनुपलब्धिभेदेन षट् प्रमाणानि स्वीक्रियन्ते अद्वैतशास्त्रे। अद्वैतिना स्वीकृतानामेतेषां प्रमाणानां स्वरूपविवेचनपराः सन्ति बहवो ग्रन्थाः तेषु च अद्वैतानुसारं प्रमा, प्रमाणं, प्रामाण्यम् इत्यादयो विषयाः सुनिरूपिताः सन्ति। ख्यातिमत्सु अद्वैतदार्शनिकेषु सुगृहीतनामधेयाः परमप्रामाणिकाः श्रीमन्तः धर्मराजाध्वरीन्द्रमहोदयाः। नव्यन्यायप्रवर्तकस्य श्रीमतो गंगेशोपाध्यायस्य तत्त्वचिन्तामणिनामकस्य ग्रन्थस्य तर्कचूडामणिनामकं व्याख्यानं विधाय एतैः स्वकीयतर्कवैदुष्यं समेषां पुरः प्रकट्यकारि। दशटीकाविभञ्जनीनामकव्याख्यानेन यथा तर्कपाण्डित्यं स्फुटीभवति तथा वेदान्तपरिभाषानामकेन ग्रन्थेन तेषाम् अद्वैतशास्त्रगतम् अगाधं वैदुष्यं प्रकटीभवति। निबन्धेऽस्मिन् तेषाम् आगमप्रमाणविचारमधिकृत्य चर्चिष्यते।

समेषां भावाभिव्यक्तिसाधनीभूतस्य विशिष्टपदसमूहस्य वाक्याभिधस्य विश्लेषणे सर्वाण्यापि सन्ति शास्त्राणि प्रवृत्तिमन्ति। न्याय-मीमांसा-व्याकरण-वेदान्तशास्त्रेषु वाक्यविश्लेषणस्य महत्त्वं वरीवर्ति। अद्वैतवेदान्तानुसारमस्मिन् निबन्धे वाक्यविचारस्य समीक्षणं विधीयते।

प्रत्यक्षानुमानोपमानागमार्थापत्त्यनुपलब्धिभेदेन षट्प्रमाणानि वेदान्ते स्वीक्रियन्ते। तत्र आगमो नाम शब्दप्रमाणमिति। तच्च शब्दप्रमाणं वाक्यमेव। तर्हि किमिदं वाक्यस्वरूपमिति विविदिषायां तल्लक्षणमाहुराचार्याः- 'यस्य वाक्यस्य तात्पर्यविषयीभूत-संसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम्' इति। तथा च प्रमाणान्तराबाधितसंसर्ग-विषयकप्रतीतिजननयोग्यतावद् वाक्यं प्रमाणमिति फलितार्थः। एवं च अद्वैतिनां वाक्यस्वरूपं विवृण्वद्भिराचार्यैः स्पष्टमभिहितं यत् तात्पर्यविषयीभूतसंसर्गस्य अबाध्यत्वमेव वाक्यस्य प्रामाण्ये मुख्यघटकमिति वेदान्तिमतम्।

वाक्यज्ञाने च आकाङ्क्षा-योग्यता-आसत्ति-तात्पर्याख्यानां चतुर्णामपि ज्ञानं कारणं भवति। तत्र पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वम् आकाङ्क्षा। यथा 'गच्छति' इति क्रियाश्रवणे कः गच्छति, केन गच्छति इति कारकस्य आकाङ्क्षा जायते तथा च 'दण्डेन' इति कारकश्रवणे किं कृतमिति क्रियाया आकाङ्क्षा जायते। एवं च वाक्यस्थितपदार्थानां

*सहायकाचार्यः, कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य, महाराष्ट्रेषु रामटेकस्थस्य, e-mail-rasaldinesh84@gmail.com

परस्परान्वयः आकाङ्क्षया भवति इति परस्परजिज्ञासाविषयत्वयोग्यत्वं पदार्थानामपेक्षितम्।

वाक्यजन्यज्ञाने द्वितीयं कारणं भवति योग्यता। सा च तात्पर्यविषयीभूतसंसर्गाबाधरूपा। तात्पर्यविषयीभूतः यः पदार्थसंसर्गः तस्य मानान्तरेण अबाधितत्वमेव योग्यतावद् वाक्यं भवति। 'अग्निना सिञ्चति' इत्यत्र तात्पर्यविषयीभूतस्य पदार्थसंसर्गस्य प्रत्यक्षप्रमाणेन बाधितत्वाद् वाक्यस्य योग्यताऽभावाद् अप्रामाण्यम्। शास्त्रेऽस्मिन् योग्यतावतः वाक्यस्यैव प्रामाण्यं स्वीक्रियते।

वाक्यजन्यज्ञाने तृतीयं कारणं भवति आसत्तिः। आसत्तिश्च अव्यवधानेन पदजन्यपदार्थोपस्थितिः। विलम्बेन पदजन्यपदार्थोपस्थितौ अन्वयाभावात् न तत्र शाब्दबोधः जायते। तस्माद् वाक्यस्थितपदजन्यपदार्थस्य पदार्थान्तरेण समन्वयार्थमपेक्ष्यते आसत्तिः।

पदजन्यपदार्थोपस्थितिः शाब्दबोधे कारणं भवति। स च पदार्थः द्विविधः- शक्यः लक्ष्यश्चेति। तत्र शक्त्या लभ्यः अर्थः शक्यार्थः। लक्षणया लभ्यः अर्थः लक्ष्यार्थः।

यथा 'गङ्गायां घोषः' इत्यत्र गङ्गापदस्य शक्यार्थः गङ्गाजलप्रवाहः इति। यदा शक्यार्थस्य पदार्थान्तरेण अन्वयासम्भवः भवति। तत्र लक्ष्यार्थस्वीकारः क्रियते। तथा च 'गङ्गायां घोषः' इत्यत्र गङ्गापदस्य तीरम् इति लक्ष्यार्थः। एवं च यत्किमपि पदं प्रथमं शक्त्या स्वार्थं बोधयति। यदि शक्त्या बोधितः अर्थः पदार्थान्तरेण नान्वेति तदा वाक्यप्रामाण्यरिरक्षयिषया लक्ष्यार्थः स्वीक्रियते। एवं वेदान्तशास्त्रे शक्यार्थ-लक्ष्यार्थभेदेन पदार्थः द्विविधः। तत्र च शक्तिप्रतीतः शक्यार्थः। शक्तिर्नाम पदानामर्थेषु मुख्या वृत्तिः। यथा घटपदस्य पृथुबुध्नोदराकृतिविशिष्टे वस्तुविशेषे वृत्तिः। सा च शक्तिः पदार्थान्तरमिति नैयायिकमतम्। नैयायिकास्तावत् प्रमाणाभावात् सङ्केत एव शक्तिः न तु पदार्थान्तरमिति कथयन्ति। तत्र सङ्केतो नाम 'अस्मात् पदाद् अयमर्थो बोद्धव्य इति ईश्वरेच्छा संकेतः।' एवं च ईश्वरेच्छा सङ्केतः शक्तिरेव। नैयायिकमते अस्याः गुणे अन्तर्भावः भवति अतः न शक्तेः पदार्थान्तरकल्पनासम्भवः।

वेदान्तिनस्तु संकेतः न शक्तिः अपि तु अभिधा शक्तिः इति मतमुपस्थापयन्ति। सा च अभिधा पदार्थान्तरमेव इति शक्तेः पदार्थान्तरकल्पनमुचितमेवेति निर्णयः।

नैयायिकमतानुसारं शक्तेः गुणान्तर्भावः न स्वीक्रियते। अतः शक्तिः पदार्थान्तरमेव इति। सिद्धान्तेऽस्मिन् कार्यानुकूला सर्वापि शक्तिः पदार्थान्तरमेव। सर्वत्र शक्तेः कालतावच्छेदकत्वाङ्गीकारात्। मृदादौ यथा घटादिजनकतावच्छेदिका शक्तिरस्ति तथा पदेऽपि बोधजनकतावच्छेदिका शक्तिः अस्त्येव। तादृशशक्तिविषयत्वं शक्यत्वम्। तथा च शक्त्याश्रयत्वमेव शक्यत्वम् इति। शक्तम् इति पदम्। शक्यः अर्थः इत्यत्र विवेकः।

एवञ्च अद्वैतशास्त्रे यथा कारणनिष्ठा कार्यानुकूला शक्तिः पदार्थान्तरं तथा पदनिष्ठा पदार्थोपस्थित्यनुकूला शक्तिरपि पदार्थान्तरं, तस्या अपि कारणनिष्ठकार्यानुकूलशक्तित्वात्। कारणत्वात् पदार्थोपस्थितेश्च कार्यत्वात्।

पदार्थान्तरत्वेन स्वीकृता शक्तिः तत्तत्पदजन्यपदार्थज्ञानरूपकार्येण अनुमेया इति

राद्धान्तः। पदानां शक्तिः जातौ वा व्यक्तौ वा इति विचिकित्सायाम् नैयायिकास्तावत् पदानां शक्तिः जातौ अथवा जातिविशिष्ट-व्यक्तौ इति वदन्ति। अद्वैतिनस्तावत् पदानां शक्तिः जातौ इत्येव मन्यन्ते। व्यक्तौ शक्तिस्वीकारे व्यक्तीनामानन्त्यात् शक्तेरपि आनन्त्यस्वीकारः कर्तव्यः स्यात्। स च दोषः। अतः व्यक्तौ शक्तिकल्पनायाम् अनन्तशक्तिकल्पनदोषप्रसङ्गः स्यादिति जातौ शक्तिः स्वीक्रियते। जातेः एकत्वात् तत्र शक्तिकल्पने लाघवम्।

वेदान्तिनये जातिरेव शक्यार्थः। जातिश्च अनुगतो धर्म एव। व्यक्तेश्च ज्ञानमर्थापत्त्या लक्षणया वा भवति। लक्षणाऽपि केवललक्षणा, लक्षितलक्षणारूपेण द्विविधा भवति। तत्र शक्यसाक्षात्सम्बन्धः केवललक्षणा यथा गङ्गायां घोषः इत्यत्र प्रवाहसाक्षात्सम्बन्धिनि तीरे गङ्गापदस्य लक्षणा केवललक्षणा। लक्षितलक्षणा तु यत्र शक्यपरम्परासम्बन्धेनार्थान्तरप्रतीतिः तत्र स्वीक्रियते यथा द्विरेफपदस्य रेफद्वये शक्तस्य भ्रमरपदघटितस्य परम्परासम्बन्धेन मधुकरे वृत्तिः।

जहल्लक्षणादिभेदेन लक्षणा त्रिविधा भवति। जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा चेति। शक्यमनन्तर्भाव्य यत्र अर्थान्तरप्रतीतिः तत्र जहल्लक्षणा। यथा 'विषं भुङ्क्ष्व' इत्यत्र। 'शत्रुगृहे भोजनं न कर्तव्य' मिति अस्य वाक्यस्य तात्पर्यार्थः प्रकरणात् गृह्यते।

यत्र शक्यार्थमन्तर्भाव्यैव अर्थान्तरप्रतीतिः तत्र अजहल्लक्षणा। यथा 'शुक्लः पटः' इत्यत्र शुक्लशब्दस्य लक्षणया शुक्लवान् अर्थः। तादृशलक्ष्यार्थे शुक्लपदस्य शक्यार्थोऽपि अन्तर्भूत इति कृत्वा अस्मिन् स्थले अजहल्लक्षणैव।

यत्र हि विशिष्टवाचकशब्द एकदेशं विहाय एकदेशे वर्तते तत्र जहदजहल्लक्षणा। यथा 'सोऽयं देवदत्तः' इत्यत्र। एवं लक्षणाविचारः शास्त्रे वर्तते।

अन्वयानुपपत्तितः लक्षणा न प्रवर्तते। काकेभ्यो दधि रक्ष्यतामित्यादिषु अन्वयानुपपत्तिर्नास्त्येव अतः तात्पर्यानुपपत्तितः लक्षणा भवतीति सिद्धान्तः। न्यायमते लक्षणा पदमात्रवृत्तिः स्वीक्रियते परन्तु वेदान्तनये सा वाक्यवृत्तिरपि भवति। 'लक्षणा पदमात्रवृत्तिः, वृत्तित्वात्, शक्तिवत्' इत्यनुमानेन नैयायिकाः लक्षणायाः पदमात्रवृत्तित्वं स्वीकुर्वन्ति। वेदान्ते तु लक्षणा न केवलं पदमात्रवृत्तिः अपि तु वाक्यवृत्तिरपि। यथा 'गम्भीरायां गङ्गायां घोष' इत्यत्र गम्भीरपदविशिष्टगङ्गापदस्य तीरे लक्षणा भवति। पदद्वयसमुदायस्य लक्षणास्वीकारे लक्षणाया वाक्यवृत्तित्वमपि स्वीकरणीयं भवति।

शाब्दबोधकारणरूपेण स्वीकृतं तात्पर्यमपि वेदान्तनये प्रामुख्यं वहति। तत्प्रतीति-जननयोग्यत्वं तात्पर्यम्। ननु, तत्प्रतीतीच्छया उच्चरितत्वं तात्पर्यमिति नैयायिकमतं कुतः न स्वीक्रियते इति चेत् अर्थज्ञानशून्येन पुरुषेण उच्चरितात् वेदात् श्रोतुरपि अर्थज्ञानं न स्यात् तदानीम्। यतः तत्प्रतीतीच्छया उच्चरितत्वं नास्ति खलु। अतः नैयायिकमतं नाद्रियते। परन्तु यद्यपि वक्तुः अव्युत्पन्नत्वे तत्प्रतीतीच्छया उच्चरितत्वं वेदे कदाचित् न भवति तथापि सर्वस्यापि वेदस्य ईश्वरोच्चरितत्वात् ईश्वरीयतात्पर्यज्ञानादेव श्रोतुः वाक्यार्थबोध इति समाधातुं शक्यते किल इति चेन्न। ईश्वरानङ्गीकर्तुरपि वेदवाक्याद् अर्थप्रत्ययदर्शनात्।

अतः तत्प्रतीतिजननयोग्यत्वं तात्पर्यमित्येव लक्षणं वक्तव्यम्। तथा च गेहे घट इति वाक्यं घटसंसर्गप्रतीतिजननयोग्यं, न तु पटसंसर्गप्रतीतिजननयोग्यम्  इत्यतः तद्वाक्यं घटसंसर्गपरं न तु पटसंसर्गपरम्  इति सिध्यति।

ननु 'सैन्धवमानय' इति वाक्यं यदा लवणानयनार्थम्  उच्चरितं तदा अपि तस्य वाक्यस्य अश्वानयनप्रतीतिजनने योग्यत्वमस्त्येव इति कृत्वा अश्वानयने अपि तस्य वाक्यस्य तदा तात्पर्यं स्यादित्यापत्तिः। यतः सैन्धवशब्दस्य लवणम्, अश्वः इत्यर्थद्वये शक्तिरस्ति।

एतद्दोषवारणार्थं लक्षणं परिष्क्रियते। तदितरप्रतीतीच्छया अनुच्चरितत्वे सति तत्प्रतीतिजननयोग्यत्वम्  इति। तथा च तदितरप्रतीतिः प्रकृते अश्वादिप्रतीतिः, तदिच्छया अनुच्चरितत्वं 'सैन्धवमानय' इति वाक्ये वर्तते इत्यतः तस्य लवणानयने एव तात्पर्यम्। शुकादिवाक्ये (पक्षिविशेषेण अभ्यासात्  उच्चार्यमाणे) अपि अत एव नाव्याप्तिः। तदन्यप्रतीतीच्छया अनुच्चरितत्वात्  तत्प्रतीतिजननयोग्यत्वाच्च।

एवं च यद्  वाक्यं यत्प्रतीतिजननस्वरूपयोग्यत्वे सति यदन्यप्रतीतीच्छया नोच्चारितं तद्वाक्यं तत्संसर्गपरमिति लक्षितम्। तद्धि लौकिकवाक्येषु प्रकरणादिना गृह्यते।

येन वाक्येन बोधितः तात्पर्यविषयः संसर्गः न बाधितः तद्  वाक्यं प्रमाणं भवति। पदे शक्तिः वाक्ये च लक्षणा वेदान्तनये स्वीक्रियते। यदा तात्पर्यमनुपपन्नं भवति तदा लक्षणावृत्तेरवकाशो भवति। वाक्यजन्यं तात्पर्यज्ञानं च प्रकरणादिना गृह्यत इति वेदान्तमतानुसारं वाक्यविचारस्य सङ्क्षेपः।

✦✦✦

# श्रीरामकृष्णदर्शने वेदान्तत्रयसमन्वयः

(वेदान्तमधिकृत्य समायोजितायां राष्ट्रियविचारगोष्ठ्यां प्रस्तुतं समापनभाषणम्)

**राकेशदाशः***

ध्यानाभ्यासवशीकृतेन मनसा तन्निर्गुणं निष्क्रियं
ज्योतिः किञ्चन योगिनो यदि परं पश्यन्ति पश्यन्तु ते।
अस्माकं तु तदेव लोचनचमत्काराय भूयाच्चिरं
कालिन्दीपुलिनोदरे यन्नीलं महो धावति॥[1]
जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्महृदा य आदिकवये मुह्यन्ति यत्सूरयः।
तेजोवारिमृदां यदा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि॥[2]
तव कथामृतं तप्तजीवनं कविभिरीरितं कल्मषापहम्।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ये भूरिदा जनाः॥[3]

भारतधरणीरियम् अवतारसूः। अत्रैव रामश्यामादयो लोकशिक्षायै भृशं विचित्रास्तनूरधुः। अस्यामेव भूमौ प्रपञ्चहितकारि श्रुतिजातं तस्य महतो महीयसो निःश्वासभूतं सत्यद्रष्टृणामृषीणां ज्ञानविषयः बभूव।

तत्र श्रुतौ जनिमृतिचक्रस्य अविद्याहेतुकस्य तरणाय उपदेशाः कृताः। भगवत्यां श्रुतौ सर्वदुःखप्रशमनाय ये उपदेशा आम्नातास्तेषां सङ्ग्रहणं व्याख्यानञ्च भगवता बादरायणेन ब्रह्मसूत्र-पुराणेतिहासादिभिरकारि। श्रुत्यादिषूक्ता अर्थाः कथं पालनीया आचरणीया इति स्मृतिपुराणादिषूपवर्णिता विविधाभिः कथाभिः युक्तिभिश्च।

कालक्रमेण लोकस्य क्षीयमाणां मेधां विलोक्य श्रुतिसूत्रादीनामर्था आचार्यैः लोकोपकाराय स्वस्वधिया व्याख्याताः। एवं वेदान्तस्य अद्वैत-विशिष्टाद्वैत-द्वैत-शुद्धाद्वैत-द्वैताद्वैत-अचिन्त्यभेदाभेदादयो नानापक्षाः सम्भूताः। तत्तन्मतीया विद्वांसः परपक्षखण्डनपुरस्सरं स्वमतं प्रतिष्ठापयामासुः।

क्रमेण कश्चित्काल इत्थं समागतो यदा पण्डिताः केचन तत्तदाचार्याणां मतान्यालम्ब्य विचारसर्वस्वान् वादान् कुर्वाणा लौकिकानां दृष्टौ वेदवेदान्तादिशास्त्राणाम् आचारप्राधान्यं

---

*सहायकाचार्यः, संस्कृताध्ययनविभागस्य, रामकृष्ण-मिशन्-विवेकानन्दविश्वविद्यालयस्य, पश्चिमवङ्गेषु हावडामण्डलस्थस्य बेलुरमठस्थस्य

[1]गीतागूढार्थदीपिका

[2]भागवते १/१/१

[3]तत्रैव

नाशयन्तः विचारमात्रप्राधान्यं प्रतिष्ठापयामासुः।

किन्तु वस्तुतस्तु शास्त्राणि किंस्वरूपाणि भवन्ति इति चेत् शास्त्राणि अस्माकम् इतिहासरूपाणि सिन्ति इति मे स्फूर्तिः। इतिहासो नाम कासाञ्चिद् व्यक्तीनां घटनानां वा समूहमात्ररूपो न भवति। अपि तु अवरजानां मार्गदर्शनाय पूर्वजैरनुभूतानां तत्त्वानां यथार्थविवरणमेव इतिहासः।

इत्थमेव श्रुतिः सर्वापि अखण्डा सर्वब्रह्माण्ड-कल्पादिष्वपि अभिन्ना अभ्युदयनिश्श्रेयसप्राप्त्युपायभूता सत्यद्रष्टॄणां साधकानाम् अनुभवपथमारूढानां तत्त्वानां वाचा प्रकटीकृतं रूपम्। एतदर्थमेव च आगमप्रामाण्यस्य पारम्यं शास्त्रकारैः भृशं प्रत्यपादि महतैव कण्ठघोषेण। भर्तृहरिचरणानां वचनम्-

चैतन्यमिव यश्चायमविच्छेदेन वर्तते।
आगमस्तमुपासीनो हेतुवादैर्न बाध्यते॥[4]

एवञ्च शास्त्रं किम्प्रयोजनम्-

इदं पुण्यमिदं पापमित्यतस्मिन् पदद्वये।
आचाण्डालं मनुष्याणां समं शास्त्रप्रयोजनम्॥[5]

अर्थाद् आचरणे शास्त्रं प्रमाणम्। अन्यथा सर्वशास्त्रवैयर्थ्यप्रसङ्गः। अत्र श्रीरामकृष्णकथामृतस्य कश्चित् प्रसङ्गः उल्लेख्यः। कश्चित् पाषण्डी दुराचारपरायणः वेदान्तिनमन्यः पञ्चवट्यां न्यवसत्। बहुभिः तस्य विषये परमहंसानां सविधे निवेदितम्। एकद्युः परमहंसैः स पृष्टः- कथं त्वमित्थं दुराचारान् करोषि? तदा तेन उक्तम्- भोः ब्रह्म सत्यं जगन्मिथ्या- अतस्त्वया श्रूयमाणमपि मिथ्याभूतम्। मया क्रियमाणमपि मिथ्याभूतम्। तदा परमहंसा अत्यन्तरूढशब्दैस्तं ततर्जुः।

श्रुतिः कथयति-

अविद्यायामितरे वर्तमानाः स्वयं धीराः पण्डितम्मन्यमानाः।
दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः॥[6] इति।

इत्थमेव कदाचिदन्यः भक्तः साधकः परमहंसानुपसृत्य अवदत् – ब्रह्म सत्यं जगन्मिथ्या इति उपदेशः। तर्हि ईश्वरपूजनादिकं भगवन्नामजपादिकञ्च सर्वं त्यक्तुं शक्यं किल इति। तदा परमहंसैस्तु समाधानमित्थमुक्तम्- भोः! अयं भावः सरलो न भवित। यतो हि तादृक्स्थितौ वक्ता, श्रोता, वचनं सर्वं मिथ्याभूतम्। तर्हि तत्र कुतस्तव विश्वासः। पुनः सोहं, सोहम् इति सहस्रधा उच्चारयामः। किन्तु मनसि सहस्रं कामासक्तयः संशयाश्च सन्ति। तेन को लाभः। एतदेव भगवता गीतायामुकम्-

क्लेशोऽधिकतरस्तेषाम् अव्यक्तासक्तचेतसाम्।

---

[4]वाक्यपदीये ब्रह्मकाण्डे

[5]वाक्यपदीये ब्रह्मकाण्डे

[6]कठोपनिषद्

अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते॥[7]

किञ्च, या सोऽहमिति भावना त्वया उच्यते सा परमार्थदशा इति किल त्वया मन्यते। ततोऽपि उच्चतरा स्थितिर्वर्तते। परमार्थता सा न भवति। एतदेव माण्डूक्यकारिकायां पश्यामश्चेत्-

न निरोधो न चोत्पत्तिर्न बन्धो न च साधकः।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥

एवं तर्हि इदानीमनुभूयमानो भेदोऽस्ति वा न वा? भेदस्य पारमार्थिकीं सत्ताम् अङ्गीकुर्वन्तु वा न वा व्यावहारिकीं सत्तामङ्गीकृत्यैव सर्वं शास्त्रं प्रवर्तते। अतो भेदस्तु अस्त्येव। तदेव शङ्कराचार्यैः अध्यासभाष्ये- सत्यानृते मिथुनीकृत्य नैसर्गिकोऽयं लोकव्यवहारः इति लौकिका वैदिकाश्च सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि भविन्ति[8]- इत्यादीनि वाक्यानि उक्तानि।

अतः द्वैतं व्यवहारे स्वीकर्तव्यमेव। एवमेव पूर्णतामिच्छता साधकेन विशिष्टाद्वैतमप्यङ्गीकार्यम्। चिदचिद्विशिष्टम् अद्वैतं ब्रह्मेति ते मन्वते। तत्र परमहंसाः उदाहरन्ति- यथा कपित्थफलं (बिल्वफलं) केनचिदिष्टम्। स तस्य त्वचं बीजानि तन्तूंश्च त्यक्त्वा सारमात्रं ग्रहीष्यति। किन्तु तस्मै आवश्यकं तु सम्पूर्णं फलमेव। अन्यथा पूर्णता नायाति – भारेण न्यूनं भवति- किन्तु तत्त्वतः अद्वैतं तिष्ठति। भगवान् उपमां कथयति लवणप्रतिमा समुद्रस्य जलं परिमातुं गता। पुनर्न प्रत्यायाता। ब्रह्मविद् ब्रह्मैव भवति।

तर्हि येषां विग्रहाणामर्चनम् अस्माभिः क्रियते? तत्र परमहंसाः कथयन्ति सच्चिदानन्दवारिधौ भक्तिरूपहिमेन जलं तुहिनं भूत्वा आकारं गृह्णाति। ज्ञानसूर्ये उदिते पुनः सर्वमेकीभूतं भवति। किन्तु केचिदाकारा नित्याः। तदेव चिन्मयरामः, चिन्मयश्याम इति परमहंसा व्याहरन्। तस्मादेव भक्ताः साम्यरूपं मोक्षमपि नेछन्ति कदाचित्। यथा चैतन्यमहाप्रभोर्वचनम्-

न धनं न जनं न सुन्दरीं कवितां वा जगदीश कामये।
मम जन्मनि जन्मनीश्वरे भवताद्भक्तिरहैतुकी त्वयि॥[9] कुलशेखरः-
नाहं वन्दे तव चरणयोर्द्वन्द्वम् अद्वन्द्वहेतोः
कुम्भीपाकं गुरुमपि हरे नारकं नापनेतुम्।
रम्या रामा मृदुतनुलतानन्दने नापि रन्तुं
भावे भावे हृदयभवने भावयेयं भवन्तम्॥[10] शङ्कराचार्यः-
न मोक्षस्याकाङ्क्षा भवविभववाञ्छापि च न मे

---

[7]भगवद्गीता

[8]शाङ्करब्रह्मसूत्रभाष्ये अध्यासभाष्यम्

[9]शिक्षाष्टकम्

[10]मुकुन्दमालास्तोत्रम् १

न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानि रुद्राणि शिवशिवशिवानीति जपतः॥[11] मधुसूदनसरस्वतीपादाः
वंशीविभूषितकरान्नवनीरदाभात् पीताम्बरादरुणबिम्बफलाधरोष्ठात्।
पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात् कृष्णात्परं किमपि तत्त्वमहं न जाने॥[12] एवञ्च आचरणे भक्तिः- द्वैतं सर्वेषाम् आचार्याणाम् अभिप्रेतम्।

तस्मात् तत्त्वविचारस्तु कर्तव्यः। किन्तु तदपेक्षया प्रधानं शास्त्राचरणम्। अन्यथा वाग्वैखरी शब्दझरी भुक्तये न तु मुक्तये भविष्यति। गीतायामपि अत एव भगवता उक्तम् –

यः शास्त्रविधिमुत्सृज्य वर्तते कामचारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥[13]

किमपि तत्त्वं- द्वैतं, विशिष्टाद्वैतम्, अद्वैतं वा- अङ्गीक्रियताम्। ततः कतरत् सत्यमिति सुधियो विभावयन्तु। वयं तु न जानीमः। यथा पद्मलोचनः विष्णुशिवयोः कतरो ज्यायान् इति पृष्टः अन्यतरमपि न दृष्टवान् को ज्यायानिति कथं वदेयम् इति उदतरत्।

एवमेव सर्वं तत्त्वं सत्यम्। अनन्तं सच्चिदानन्दसागरं यो यथा दृष्टवान् स तथा वर्णयति। यथा कृकलासं कश्चन रक्तं दृष्टवान्, कश्चन नीलं दृष्टवान्, कश्चन पीतं दृष्टवान्- यः तं सर्वदा पश्यति स जानाति सर्वे वर्णा अस्य सम्भवन्ति।

एवं यः सच्चिदानन्दसमुद्रं जानाति स जानाति सर्वं सत्यम्। किन्तु न कथयति। नारदः दृष्टवान्, शुकः स्पृष्टवान्, महादेवस्तु गण्डूषत्रयं पीत्वा मग्नस्तत्रैव समाहितः इति रामकृष्णपरमहंसाः। आचार्यास्तु सर्वे शद्धेयाः परमप्रामाणिकाः। अतः स्वीये भावे स्थित्वा साधनपथमवतरामः। स्वीये भावे निष्ठा स्यात्, अन्यस्य विद्वेषो न कार्यं। उद्धारस्तु भविष्यति। भगवानेव प्रतिजानीते-

ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः।
अनन्येनैव योगेन मां ध्यायन्त उपासते॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।
भवामि न चिरात्पार्थ मय्यावेशितचेतसाम्॥[14] अत ऊर्ध्वं न संशय इति प्रतिज्ञायते भगवता। तद्वचसि विश्वस्य आचर्यताम्। वेदान्तः अनुष्ठीयताम्- इति विवेकानन्दश्रीचरणाः।

तर्हि एवम्भूतस्य अपूर्वदर्शनस्य अभिधान्तरं कल्पयित्वा नवीनवादः उपदिशयते वा? नैव। वस्तुतस्तु नेदं नवीनं तत्त्वम्। इयमेव सनातनी परम्परा। अतोऽस्य

---

[11] अन्नपूर्णास्तोत्रम्

[12] गीतागूढार्थदीपिका

[13] भगवद्गीता

[14] भगवद्गीता

किमपि अभिधान्तरमपि न कल्प्यते। एतद्विचारणीयं नास्ति, आचरणीयम्। अतः श्रीरामकृष्णजीवनदर्शनमित्येव अस्य परिचयः। विवेकानन्दश्रीचरणाः कथितवन्तः एतस्मिन्नवतारे भगवान् शास्त्रादिकम् यथाविधि न पठितवान्। किन्तु तस्य अनुभवाः सर्वे शास्त्रमर्यादामनुल्लङ्घ्य वर्तते। अतः शास्त्राणां याथायथ्यप्रख्यापनमेव अस्य अवतारस्य प्रयोजनम्। अतः शास्त्रवचस्सु श्रद्धधानैरस्माभिः वेदान्त आचरणीयः तेनैव च आत्मनो मोक्षः जगतश्च हितं भविष्यति इत्यपि मन्यामहे।

क्षीरसागरतरङ्गशीकरा
सारतारिकतचारुमूर्तये।
भोगिभोगशयनीयशायने
माधवाय मधुविद्विषे नमः॥ [15]

✦ ✦ ✦

[15] मुकुन्दमालास्तोत्रम्

# योगसूत्रोक्तः एकतत्त्वाभ्यासः- एकः विमर्शः
## (योगसूत्राणां साम्प्रदायिकव्याख्यानां परिशीलनेन कृतमध्ययनम् )

म. जयरामः*

## १. उपोद्घातः

योगशास्त्रं जगते भारतस्य विशिष्टं योगदानम् इति परिगण्यते। योगशास्त्रस्यानुवक्ता मुनिः पतञ्जलिः। तेन प्रणीतानि योगसूत्राण्येव योगशास्त्रस्य आधारग्रन्थः। तेषु योगसूत्रेषु मनसः प्रशमनाय, चित्तवृत्तिनिरोधाय अनेके उपायाः कथिताः। तत्र योगसूत्राणां प्रथमे पादे द्वात्रिंशं सूत्रं 'तत्प्रतिषेधार्थम् एकतत्त्वाभ्यासः' इति। अस्मिन् सूत्रे चित्तविक्षेपाणां निवारणार्थम् एकतत्त्वाभ्यासः इत्येकः मुख्यः योगोपायः सूचितः। तत्र एकतत्त्वाभ्यासो नाम कः इति विषये विवदन्ति विद्वांसः। योगसूत्रस्य उपलभ्यमानासु अनेकासु टीकासु व्याख्यानेषु च एकतत्त्वाभ्यासस्य अर्थविषये ऐकमत्यं न वर्तते। अतः तस्य अर्थनिर्णयः प्रमुखस्य अस्य योगोपायस्य अनुष्ठाने सौकर्यं कल्पयेदिति विभाव्य तद्विषये विचारः अस्मिन् लेखे प्रवर्त्यते।

## २. विचारसङ्गतिः

योगसूत्रेषु नव चित्तविक्षेपाः[1] उल्लिखिताः ये च योगमार्गे अन्तरायाः इति कथितं सूत्रकारेण। तत्सहभुवामपि आवलिः प्रदत्ता तत्रैव[2] तेषां प्रतिषेधाय पतञ्जलिना सूत्रितं- तत्प्रतिषेधार्थम् एकतत्त्वाभ्यासः[3] इति। अन्तरायाणां तत्सहभुवां च प्रतिषेधाय एकतत्त्वाभ्यासः कर्तव्यः इति सामान्यतः सूत्रस्य अस्य अर्थः। एकतत्त्वाभ्यास इत्यत्र एकं, तत्त्वम्, अभ्यासः इति त्रीणि पदानि वर्तन्ते। चित्तविक्षेपाणाम् उपशमनाय एकस्य एव तत्त्वस्य चित्ते अभ्यासः, आवृत्तिः कर्तव्या इति तु स्पष्टमस्ति। किन्तु किं तत् एकं तत्त्वमिति जिज्ञासा वर्तते। सूत्रे एतद्विषये न काऽपि सूचना वर्तते। अतः व्याख्याः शरणीकरणीयाः सूत्रस्यास्यार्थावबोधाय।

## ३. व्याख्यानाम् अभिप्रायाः

योगसूत्राणां प्रधानं व्याख्यानमस्ति व्यासप्रणीतं 'साङ्ख्यप्रवचन'भाष्यम्। तदुपरि

---

*उपनिर्देशकः, संशोधनविभागस्य, कृष्णमाचार्ययोगमन्दिरे चेन्नैस्थे

[1]व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्त्वानि चित्तविक्षेपास्तेऽन्तरायाः यो.सू.१.३०

[2]दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः यो.सू.१.३१

[3]यो.सू.१.३२

अनेका व्याख्या रचिता वाचस्पति-विज्ञानभिक्षु-भोज-हरिहरानन्दारण्यप्रभृतिभिः। सदाशिव-ब्रह्मेन्द्रेणापि योगसुधाकराख्या एका स्वतन्त्रा व्याख्या कृता वर्तते। एषु ग्रन्थेषु एकतत्त्वाभ्यास-विषये किमुक्तमस्तीति परिशील्यते अधुना।

## ३.१. व्यासः

'विक्षेपप्रतिषेधार्थम् एकतत्त्वालम्बनं चित्तमभ्यसेत्' इत्येतावन्मात्रं कथितमस्ति व्यासेन एकतत्त्वाभ्यासविषये। अग्रे च व्यासभाष्ये चित्तस्वरूपविषये बौद्धानां विचारखण्डनं विधीयते। विक्षेपस्य प्रतिषेधः यदि कर्तव्यः एकस्य एव तत्त्वस्य (न तु अनेकेषां) अभ्यासः कर्तव्यः येन चित्तं विक्षेपरहितं कर्तुं शक्यते इत्ययमभिप्रायः व्यासवचनात् अवगम्यते। किं तद् एकतत्त्वमिति व्यासेन न प्रपञ्चितम्।

व्यासस्य वचनप्रपञ्चार्थानाम् उपव्याख्यानां विचाराः अत्र प्रस्तूयन्ते।

### ३.१.१. वाचस्पतिमिश्रः[4]

'एकतत्वम् ईश्वरः प्रकृतत्वात्'। व्यासवचनस्य विवरणम् ईश्वरः, प्रकृतत्वात् इति पदाभ्यां करोति वाचस्पतिमिश्रः। अस्याभिप्राये तद् एकं तत्त्वम् ईश्वरः। तस्य विषय एव उपक्रान्त ईश्वरप्रणिधानाद्वा[5] इत्येतस्मात् सूत्रादारभ्य ततः प्रत्यक्चेतनाधिगमः अप्यन्तरायाभावश्च[6] इत्येतत्सूत्रावधि। अतः तद् एकं तत्त्वम् ईश्वर एव भवितुमर्हति इति वाचस्पतिमिश्रस्य आशयः।

### ३.१.२ भोजः[7]

एकस्मिन् कस्मिंश्चित् अभिमते तत्त्वे अभ्यासः चेतसः पुनः पुनः निवेशनं कार्यम्।' अत्र भोजमतानुगुणम् अभिमतं यत्किञ्चिद्वस्तु एकतत्त्वं भवितुमर्हति यस्य विषये चेतः पुनः पुनः निवेशनीयं भवेत् विक्षेपनिवृत्त्यर्थम् इत्ययमर्थः पर्यवस्यति।

### ३.१.३ विज्ञानभिक्षुः[8]

'एकं स्थूलादि किञ्चित्। यत्तु एकतत्त्वशब्देन परमेश्वर एव उक्त इति तत् न। बाधकं विना सामान्यशब्दस्य विशेषपरत्वानौचित्यात्, पूर्वसूत्रप्राप्तत्वेन पौनरुक्त्यापत्तेश्च। सर्वमेव चित्तमेकाग्रं, नास्त्येव विक्षिप्तम् इति आगामिभाष्यानुपपत्तेश्च'।

---

[4]अनेन तत्ववैशारदी इति व्याख्या प्रणीता व्यासभाष्यस्योपरि

[5]यो.सू.१.२३

[6]यो.सू.१.२९

[7]भोजवृत्त्याख्या राजमार्तण्डापरनामधेया व्याख्या भोजेन प्रणीता व्यासभाष्यस्योपरि

[8]योगवार्त्तिकाख्या व्याख्या विज्ञानभिक्षुणा प्रणीता

अस्य अभिप्रायः भोजस्य मतस्य अनुसरणं करोति। अनेन एकतत्त्वं स्थूलत आरभ्य यत् किञ्चिदपि ध्येयं वस्तु भवितुमर्हति इति सिद्धं भवति। पुनश्च मुक्तकण्ठतया ईश्वरः एकतत्त्वपदवाच्यः न भवति इत्यपि कथितम्। तदर्थञ्च त्रयो हेतव उपन्यस्ताः।

१) सामान्यशब्दस्य बाधकमन्तरा विशेषार्थपरत्वाशक्यत्वम्- एकतत्त्वमिति पदं यत् किञ्चिद् एकं तत्त्वम् इत्येव बोधयति। यदि तद् ईश्वरपरतया एव स्वीकरणीयं तर्हि तत्र सामान्यार्थस्वीकारबाधकं किञ्चित् कारणं दर्शनीयं भवेत्। अस्मिन् प्रसङ्गे तादृशं बाधकं नास्ति किमपि। अतः तत्त्वसामान्यबोधकस्य तत्त्वपदस्य ईश्वर इति विशेषार्थपरत्वं न साध्यमिति विज्ञानभिक्षुणा विचार उपस्थापितः।

२) पौनरुक्त्यं- पूर्वसूत्रेषु विवृतस्य ईश्वरस्य, तदभ्यासस्य च विषये एव पुनरत्रापि अनुवर्त्यते इति चेत् नूतनं किञ्चिदत्र नास्ति इति सिद्धं भवति, अयं च शास्त्रे दोषत्वेन परिगणितः।

३) तृतीयं च कारणम् उच्यते आगामिभाष्यानुपपत्तेश्च इति- व्यासभाष्यस्य अग्रिमे भागे बौद्धानां विचारः खण्ड्यते। बौद्धानाम् अयमस्ति विचारः यत्- सर्वमेव वस्तु क्षणिकं चित्तमप्यन्तर्भाव्य। प्रतिक्षणं विनश्यत् चित्तं यत्किञ्चिद् एकं वस्तु चिन्तयदेव विलीनं भवति। अतः चित्तं सर्वदापि एकाग्रमेव भवति। तेन चित्तविक्षेपप्रसक्तिरेव नास्ति। अतः नास्ति बौद्धपक्षे ध्यानादीनामवसर इति खण्ड्यते व्यासेन। तदिदं वचनं प्रकृते प्रसङ्गे अपि अन्वितं भवेत् इत्यभिप्रैति विज्ञाभिक्षुः। तद्यथा- ईश्वरस्याभ्यासः समाहितचित्तैः अनुष्ठातृभिः एव कर्तुं शक्यः, ईश्वरतत्त्वस्य सूक्ष्मत्वात्। यदि अनुष्ठातारः समाहितचित्ताः तदैव ईश्वराभ्यासरूपे एकतत्त्वाभ्यासे तेषां प्रवृत्तिः भवेदिति वक्तुं युक्तं स्यात्। यदि अनुष्ठातारः समाहितचित्ताः तर्हि चित्तविक्षेपः एव नास्ति तेषामित्यर्थः। अतश्च एकतत्त्वाभ्यासादीनाञ्च आवश्यकतापि न भवति। एवञ्च बौद्धानां यथा तथा अत्रापि ध्यानादीनामप्रसक्तिरूपः दोषः भवति इत्ययमाशयः विज्ञानभिक्षोः। अत एकतत्त्वपदं न ईश्वरबोधकम् इत्येनं विषयं हेतुत्रयविन्यासेन स्फुटं निराकरोति विज्ञानभिक्षुः।

### ३.१.४ हरिहरानन्द-आरण्यः[9]

यस्मिन् ध्येयविषये एकतत्त्वात्मकं न अनेकेषु भावेषु विचरणस्वभावकं तादृशविषयकं चित्तमभ्यसेत्। ईश्वरप्रणिधाने आदौ चित्तमनेकेषु विषयेषु विचरति। यथा- यः क्लेशादिरहितो यः सर्वज्ञो यः सर्वव्यापीत्यादिषु भावेषु सञ्चरणं नैकतत्त्वालम्बनता चेतसः। अभ्यासबलात् तान् सर्वान् समाहृत्य यद् एकस्वरूपध्येयालम्बनं चित्तं क्रियते तदा तादृशाभ्यासात् कायेन्द्रियस्थैर्यं क्षिप्रं प्रवर्तते। ततश्च विक्षेपा दूरीभवन्ति। एकतत्त्वालम्बनाय अहंभावः श्रेष्ठो विषयः।...

आरण्यवर्यस्य अभिमतेन अपि एकतत्वम् ईश्वर एव। अथापि ईश्वरविषयक एक

---

[9]भास्वती इत्यस्ति नाम हरिहरानन्द-आरणयस्य व्यासभाष्यव्याख्याया नाम

एव विचारो ध्येयः। अहमेव ईश्वरः इति विभावयन् स्वात्मनः क्लेशकर्मादिशून्यतां चिन्तयन् कायेन्द्रियाणां स्थैर्यं विन्देद् इति स्वस्य एकतत्त्वाभ्यासविषयकम् अभिप्रायं प्रकटयति सः।

### ३.१.५ सदाशिवब्रह्मेन्द्रः

'एकतत्त्वस्य ईश्वरस्य अभ्यासः कर्तव्यः। पूर्वोक्तम् ईश्वरप्रणिधानमेव अस्मिन् अंशे स्मार्यते।' सदाशिवब्रह्मेन्द्रः स्वस्य स्वतन्त्रायां (पूर्वोद्धृताः अन्याः सर्वाः व्याख्याः व्यासभाष्यस्य टीकाः) योगसुधाकरवृत्त्यां वाचस्पतिमिश्रस्य मतमेव उपष्टम्भयति। अपि च विस्पष्टमपि एकतत्त्वाभ्यास ईश्वरप्रणिधानमेव इति कथयति इत्यवधेयम्।

## ४. विचारविमर्शः

सर्वेऽपि पूर्वोल्लिखिता आचार्या ज्ञानिनः अनुष्ठातारः च एव। तेषां विचाराः साधव एव स्युः तत्तदनुभूत्यनुगुणम्। तथापि प्रसङ्गस्य परिशीलनेन, व्याख्यानां च परामर्शेन च एकतत्त्वाभ्यासः नाम क इति अवश्यमेव चिन्तनीयं भवेत् सर्वेणापि चित्तविक्षेपैः मोमुह्यमानेन योगानुष्ठात्रा स्वबोधशुद्धये ततः अनुष्ठाने प्रवृत्तये च। अतः तद्दिशि यथामति चिन्तनं विधीयते।

पूर्वोल्लिखिता व्याख्या एवं वर्गीकर्तुं शक्यन्ते

१) यस्य कस्यचन अभिमतस्य वस्तुनः एकाग्रतया ध्यानमेव एकतत्त्वाभ्यासः(व्यासः, भोजः)

२) एकतत्त्वाभ्यासः नाम ईश्वरप्रणिधानमेव। (सदाशिवब्रह्मेन्द्रः)

३) एकतत्त्वाभ्यास ईश्वरध्यानमेव किन्तु, तद् एकविचारयुक्तमेव भवेत्- यथा अहमेव ईश्वर इति। (हरिहरानन्द-आरण्यः)

४) एकतत्त्वाभ्यासः स्थूलादेः कस्यचनापि वस्तुनः ध्यानम्। ईश्वरः एकतत्त्वं भवितुं नार्हति। (विज्ञानभिक्षुः)

५) एकतत्त्वम् ईश्वरः (तत्र एक-पदस्य औचित्यं किमिति न प्रपञ्चितम्, स च अभ्यासः कथं कार्य इत्यपि न प्रपञ्चितम्) (वाचस्पतिमिश्रः)

अतः अत्र परस्परं विरुद्धौ द्वौ पक्षौ दृश्येते।

१.एकतत्त्वाभ्यास ईश्वरप्रणिधानमेव नान्यत् (सदाशिवब्रह्मेन्द्रमतम्)

२. एकतत्त्वाभ्यासः अन्य एव, ईश्वरप्रणिधानं तु सर्वथा न (विज्ञानभिक्षोः मतम्) इति साक्षाद् विरुद्धौ द्वौ पक्षौ आदौ परिशील्येते।

### ४.१ एकतत्त्वाभ्यासविषयिका सदशिवब्रह्मेन्द्रस्य धारणा

१) पतञ्जलेः कृतिरियं सूत्रग्रन्थः। अतः पौनरुक्त्यं स्वीकार्यं न भवति। अतः केवलं स्मारणार्थम् एकतत्त्वाभ्यासपदं प्रयुक्तमिति अभ्युपगन्तुं न शक्यते।

२) पुनश्च विज्ञानभिक्षोः मतानुगुणम् [10] एकतत्त्वपदम् ईश्वरबोधकं तर्हि एकतत्त्वाभ्यासः इत्यपेक्षया ईश्वराभ्यासः इत्येव कथनं विचारे असन्दिग्धतां कर्तुं शक्नोति स्म। तच्च सूत्रकारैः नैव कृतम्। अतः ईश्वरप्रणिधानाद् विलक्षणः अयमभ्यासः। अत एकतत्त्वाभ्यासपदस्य च स्वारस्यं चिन्तनीयमिति भाति।

३) पुनश्च सर्वैः आद्रियमाणे व्यासभाष्ये चित्तस्य एकतत्त्वालम्बनता भवेत् इति स्पष्टं कथितं वर्तते। स चार्थविशेषः अपि न प्राप्यते यदि एकतत्त्वाभ्यास ईश्वरप्रणिधानाद् अभिन्न इति स्वीक्रियमाणे। अतः पूर्वोक्तैः कारणैरेकतत्त्वाभ्यास इत्यत्र कश्चन अर्थविशेषः अस्तीत्येव स्वीकरणीयं भवेदिति भाति।

वाचस्पतिमिश्रस्य मते एकतत्त्वम् ईश्वर इति कथितम्। किन्तु तदतिरिच्य अनुष्ठानविशेषः न कथित एतत्सूत्राधारेण। अत उक्तस्य सदाशिवब्रह्मेन्द्रस्य, वक्ष्यमाणस्य हरिहरानन्द-आरण्यस्य वा मतस्य परिशीलनेन वाचस्पतिमिश्रस्य विचारः अपि परिशीलित इति भावनीयम्। सदाशिवब्रह्मेन्द्रः, हरिहरानन्द-आरण्य इत्येतावुभौ अपि एकतत्त्वम् ईश्वर एव इति अभ्युपगच्छतः इति स्मरणार्हम्।

## ४.२ विज्ञानभिक्षोः मतम्

यदि हरिहरानन्द-आरण्योक्तदिशा ईश्वरविषयकस्य एकस्य विचारस्य पुनः पुनः अभ्यासः क्रियते केनचित्, तेनैव च यदि चित्तविक्षेपाणां निवृत्तिः सिद्धा भवति, तर्हि ईश्वरस्य एकतत्त्वत्वेन निषेधः यः कृतः विज्ञानभिक्षुणा स च अयुक्तः भवितुमर्हति। पुनश्च विज्ञानभिक्षुणा ईश्वरस्य एकतत्त्वरूपेण अभ्युपगमे अनेके दोषा उद्भाविताः, किन्तु ईश्वरभिन्नस्य यस्य कस्यचन तत्त्वस्य अभ्यासे कः गुणः स्यादिति नैव प्रपञ्चितम्। अतः विज्ञानभिक्षुविचारः अपि पूर्णतया उपादेयो वा इति चिन्त्यम्।

## ४.३ हरिहरानन्द-आरण्यस्य विचारः

विरुद्धयोः पक्षयोः सेतुनिर्माणे प्रयत्नं कृतवतः हरिहरानन्द-आरण्यस्य विचारः चिन्त्यते। यदि विज्ञानभिक्षूक्तरीत्या कस्यचन स्थूलादिवस्तुनः एकतत्त्वत्वेन अभ्यासं विधाय कश्चिच्चित्तविक्षेपराहित्यं प्राप्नुयात् तर्हि, आरण्यवर्यस्य विचारः अपि पुनः चिन्तनीयो भवेत्।

## ४.४ व्यासः भोजश्च

मूलव्याख्यातुः व्यासस्य, तद्व्याख्यासु अन्यतमायाः कर्तुः भोजस्य च विचारः अन्ते परामृश्यते। व्यासस्य वचनावलोकनेन- तद् एकं तत्त्वम् ईश्वर एव भवेदिति आग्रहो नास्ति, ईश्वरः न भवेत् अन्यदेव तत्त्वं भवेदित्यपि आग्रहः नास्ति- इति भाति। भोजः अपि

[10] यदि हीश्वरप्रणिधानमेव केवलमन्तरायाभावहेतुरिति वक्ष्यमाणसूत्रार्थः स्यात् तदा एकतत्त्वाभ्यास इति सामान्योपसंहारो न युज्येत, निस्सन्देहार्थम् ईश्वराभ्यास इत्येव वक्तुं युक्तत्वादिति भावः।

'अभिमत'पदप्रयोगेण एतत्तुल्यमेव स्वाभिप्रायं प्रकटयति। 'लोको भिन्नरुचिः' इत्यस्ति उक्तिः। अतः प्रत्येकं मनुष्यस्य सामर्थ्यानुगुणम् अभिरुच्यनुगुणं च ध्येयं वस्तु ईश्वरमपि अन्तर्भाव्य यत्किमपि भवितुमर्हति इति एतयोः विचारस्य विमर्शेन पर्यवस्यति।

# ५. उपसंहारः

अस्य अभ्यासस्य लक्ष्यं योगमार्गे प्रवृत्तस्य चित्तविक्षेपैः चेखिद्यमानचेतोवतः एकाग्रतासम्पादनद्वारा विक्षेपनिवारणम्। उपर्युक्तविचाराणां परामर्शेन इदं कथयितुं युक्तं स्याद् यद् व्यास-भोज-विज्ञानभिक्षूणां मतानुगुणं ध्यातुः "अभिमतं वस्तु" अत्र एकतत्त्वाभ्यासघटकीभूत-एकतत्त्वपदवाच्यं भवितुमर्हति। किन्तु अभिमतवस्तुकोटौ हरिहरानन्दारण्य-वाचस्पतिमिश्र-सदाशिवब्रह्मेन्द्राभिप्रेतस्य ईश्वरस्यापि अन्तर्भावः युक्त एव। नहि कश्चिद् ईश्वरः कस्यचिद् अभिमतवस्तु भवितुं नार्हतीति वक्तुं शक्नोति। इदम् एकतत्त्वपदविषयकं चिन्तनम्।

अस्य च एकतत्त्वस्य अभ्यासः- व्यास-हरिहरानन्दोक्तदिशा ध्येयत्वेन स्वीकृतस्य वस्तुन एकस्य एव अंशस्य चेतसि आवृत्तिरूपः भवितुम् अर्हति इति भाति। तदेव हि तुल्यप्रत्ययसन्ततिद्वारा चित्तविक्षेपनिवारणं भवति।[11] अतः च एकस्मिन् एव स्वाभिमते वस्तुनि (ईश्वरमपि अन्तर्भाव्य), तत्रापि ध्येयवस्तुनः एकस्मिन्नेव अंशे, चित्तस्य पुनः पुनः संस्थापनस्य प्रयत्नेन चित्तविक्षेपा निवारयितुं शक्यन्ते इति तत्प्रतिषेधार्थम् एकतत्त्वाभ्यास इत्यस्य सूत्रस्य अर्थः स्यात् इति शम्।

✦ ✦ ✦

## ग्रन्थसूची


1. साङ्गं योगदर्शनम्, अर्थात् पातञ्जलं दर्शनम्, पतञ्जलिरहस्य-तत्त्ववैशारदी-योगवार्त्तिक-भास्वती-व्याख्याभिः समलङ्कृतं योगसूत्रस्य व्यासभाष्यम्, संपादकः गोस्वामी दामोदरशास्त्री, चौखम्बा संस्कृतभवनम्, वाराणसी, १९९२
2. योगसुधाकरः (योगसूत्रवृत्तिः),सदाशिवब्रह्मेन्द्रः. आङ्ग्लानुवादेन सह, अनुवादकः एस्.कोदण्डरामः, कार्कोटक-वयलोर्-ट्रस्ट्, चेन्नै, १९९३
3. योगसूत्रव्यासभाष्यम्, भोजवृत्तिसहितम्, हिन्दीभाषानुवादसमेतम्, स्वामी विज्ञानाश्रमः, अजमेर, १९३१


[11] अत्र प्रकृतस्य एकतत्त्वाभ्यासस्य अग्रे योगसूत्रेषु वक्ष्यमाणस्य यथाभिमतध्यानस्य (यो.सू१.३९) च कः भेदः, अभिमतवस्तु स्वेच्छाविषयीभूतं वा तत्र गुरुशास्त्रसम्मातिरपेक्षिता वा इत्यादयः विचाराः प्रकृताश्चेदपि ते नात्र विचार्यन्ते लेखविस्तरभिया।

# प्रक्रियाक्रमः पाणिनीयव्याकरणञ्च

## गोपीकृष्णन् रघुः*

## १. भूमिका

त्रिमुनिव्याकरणप्रणेत्रा भगवता पाणिनिना सूत्ररूपेण शास्त्रमिदं निरमायि। कालान्तरे यदा सूत्राणामर्थावगमने क्लेशः जातः तदा तेषां सुलभावगमनाय सूत्राणां वृत्तयः परिकल्पिताः। वृत्तिः नाम सूत्रार्थविवरणवाक्यं भवति। इयं च संक्षिप्तव्याख्या भवति सूत्राणाम्। सद्यःकाले वृत्तिग्रन्थानाश्रित्यैव शास्त्रपठनपाठनपरम्परा प्रचलति।

व्याकरणशास्त्रे एषां वृत्तिग्रन्थानां द्विधा परम्परा दृश्यते। प्रथमा अष्टाध्यायीक्रमानुसारिणी, द्वितीया प्रक्रियाक्रमानुसारिणी इति। अष्टाध्याय्यां येन क्रमेण सूत्राणां पाठः वर्तते तेनैव क्रमेण यत्र सूत्राणां वृत्तिः भवति सा अष्टाध्यायीक्रमानुसारिणी। यथा- काशिकावृत्तिः, भागवृत्तिः, दुर्घटवृत्तिः इत्यादयो ग्रन्थाः।

द्वितीयक्रमः भवति प्रक्रियाक्रमः। अत्र च अध्येतृसौलभ्याय एकस्य रूपस्य निष्पत्त्यर्थं यानि सूत्राण्यपेक्षितानि तानि एकत्र संगृहीतानि वर्तन्ते। यथा सन्धिकार्यसम्बद्धानि सूत्राणि सर्वाणि सन्धिप्रकरणे संगृहीतानि। तथैव समाससम्बद्धानि सूत्राणि समासप्रकरणे। एवं तत्तद्विषयसम्बद्धानां सूत्राणामेकत्र सङ्ग्रहणं क्रमस्यास्य वैशिष्ट्यम्। अयञ्च क्रमः, अष्टाध्यायीक्रमाद् भिन्नः। अत एव क्रमेऽस्मिन् कदाचित् "पूर्वत्रासिद्धम्" "विप्रतिषेधे परं कार्यम्" इत्यादीनां नियमानामवगमे प्रयोगे च क्लेशः जायते। किन्तु अनेन क्रमेण अध्ययने तु सुलभतया प्रक्रिया अवगम्यते। तथैव अपेक्षितांशानामेव पठनमपि सुकरम्। अत एव प्रक्रियाक्रमस्य कालेऽस्मिन् प्रचारबाहुल्यं दृश्यते।

## २. प्रक्रियाक्रमस्य प्रादुर्भावः

वस्तुतः प्रक्रियाक्रमः पाणिनीये व्याकरणे नारब्धः। क्रमस्यास्य आविर्भावः पाणिनीयेतरव्याकरणेष्वभवत्। ततः प्रक्रान्तः अयं क्रमः पाणिनीये। सूर्यकान्तबालिमहोदयानुसारं क्रिस्तोः परं प्रथमशतके अस्य क्रमस्य प्रादुर्भावः जातः। अस्यारम्भः कातन्त्रव्याकरणेनाभूत्। ततश्च क्रमशः संवर्धितः पाणिनीयेऽपि प्रविष्टः।

### २.१. कातन्त्रव्याकरणम्

कातन्त्रशब्दस्य अर्थः भवति लघुतन्त्रम् इति। अस्य च कर्ता शर्ववर्मा इति

---

*अध्यापकः(नियतकालिकः), संस्कृतविभागस्य, रामकृष्ण-मिशन्-विवेकानन्दविश्वविद्यालयस्य, पश्चिमवङ्गेषु हावडामण्डलस्थस्य बेलुरमठस्थस्य

कथ्यते। युधिष्ठिरमीमांसकानां मते तु अयं केवलं सङ्ग्रहणकर्ता एव। स्वयं न रचितवान्। अस्य व्याकरणस्य नामान्तराणि भवति कौमारं, कलापकम् इति च। अत्र ग्रन्थे शर्ववर्मा उत्सर्गापवादसरणीं परित्यज्य विषयविभागानुसारिणीं सरणीं स्वीचकार। अयं क्रमः अनेनैव प्रप्रथमतया प्रयुक्तः वर्तते। ग्रन्थस्य प्रथमभागे संज्ञापादः, सन्धिपादः, निपातपादश्च विद्यते। द्वितीयभागे नामप्रकरणाख्ये नामरूपाणां निष्पत्तिः, तद्धितप्रत्ययाः, समासाः, स्त्रीप्रत्ययाश्च वर्तन्ते। तृतीयभागे आख्यातानां विषये उल्लेखः वर्तते। चतुर्थः भागः कृदन्तभागश्च भवति।

प्रायः अयमेव क्रमः कालेऽस्मिन्नपि प्रक्रियाग्रन्थेषु दृश्यते। अतः अयमेव प्रक्रियाक्रमस्य पितृस्थानीयः इति मन्तव्यम्।

## २.२. हैमव्याकरणम्

यद्यपि शर्ववर्मणा प्रक्रियाक्रमः प्रथमशतके एव प्रवर्तितः तथापि बहोः कालादनन्तरमेव तस्य अनुसरणं केनचिदन्येन कृतमुपलभ्यते। आचार्यहेमचन्द्रसूरिणा स्वीये सिद्धहैमशब्दानुशासनम् इत्याख्ये ग्रन्थे प्रायः प्रक्रियाक्रम एव अनुसृतः। अयं च हेमचन्द्रसूरिः जैनसम्प्रदाये श्वेताम्बरसम्प्रदायानुसारी आसीत्। अनेन च गुर्जरराज्ञः सिद्धराजस्य आदेशानुसारमेव ग्रन्थोऽयं निरमायि। युधिष्ठिरमीमांसकमते अस्य कालः 1196-1199 मध्ये भवति। ग्रन्थे चास्मिन् एकादशप्रकरणानि सन्ति। तानि च क्रमशः- संज्ञा, स्वरसन्धिः, व्यञ्जनसन्धिः, नाम, कारकम्, षत्वम्, स्त्रीप्रत्ययः, समासः, आख्यातः, कृदन्तः, तद्धितः च।

अतः अयमेवात्र प्रक्रियाक्रमे द्वितीयः प्रयासः इति वक्तुं प्रभवाम। अस्य ग्रन्थस्य अयमपि विशेषः यत् संस्कृतेतरभाषाणामपि चर्चा ग्रन्थान्ते कृता वर्तते।

## २.३. मुग्धबोधव्याकरणम्

आचार्यहेमचन्द्रसूरेः अनन्तरं प्रक्रियाक्रमे प्रयासः विहितः बोपदेवेन। अनेन च मुग्धबोधनामकं व्याकरणं प्रणीतम्। अस्य च कालः 1325-1370 मध्ये इति स्वीक्रियते। अस्य पितुः नाम केशवः, गुरोर्नाम धनेश्वरश्च आसीत्। संज्ञाप्रकरणतः आरभ्य कृदन्तपर्यन्तं हेमचन्द्रस्य सर्वेऽपि विभागाः स्वीकृताः ग्रन्थेऽस्मिन्।

पाणिनीयपरम्परायां प्रक्रियाग्रन्थानां प्रवृत्त्यर्थम् इमे ग्रन्थाः आसन् कारणीभूताः। एतेषां प्रचुरप्रचारं दृष्ट्वा तदानीन्तनाः आचार्याः स्वशास्त्ररक्षणार्थं प्रचारार्थञ्च नवीनामिमां पद्धतीमनुचक्रुः।

# ३. पाणिनीये प्रक्रियाक्रमः

पाणिनीये प्रक्रियाक्रमस्य आरम्भः प्रायः द्वादशशताब्द्यां भवति। ततः प्रभृति

तदा तदा प्रक्रियाग्रन्थाः समुद्भूता बहवः। किन्तु तेषु सर्वेष्वपि ग्रन्थेषु साम्प्रतिके काले उत्तमोत्तमस्थानं भजते श्रीमता विदुषा भट्टोजीदीक्षितेन विरचितः वैयाकरणसिद्धान्तकौमुदी नामकः ग्रन्थः। ततः प्रागपि केचन ग्रन्थाः समुद्भूताः सन्ति। तान्यत्र प्रतिपाद्यन्ते।

## ३.१. रूपावतारः

पाणिनीयव्याकरणे प्रक्रियाक्रमः अनेन ग्रन्थेन प्रारब्धः। अस्य च ग्रन्थस्य कर्ता भवति धर्मकीर्तिः। अयं च बौद्ध आसीदिति श्रूयते। अस्य कालः प्रायः वैक्रमसंवत् 1140 परिसरे भवति। अनेन पाणिनीयव्याकरणं सरलावबोधनाय पुनर्व्यवस्थापितम्। अस्य ग्रन्थः अवताराख्येषु अध्यायेषु विभक्ताः। ते च यथा- संज्ञावतारः, विभक्त्यवतारः, अव्ययावतारः, स्त्रीप्रत्ययावतारः, कारकावतारः, समासावतारः, तद्धितावतार इति पूर्वार्धः, तथा धातुप्रत्ययपञ्चिका इत्युत्तरार्धश्च। अनेन तु न सम्पूर्णानां सूत्राणां सङ्कलनं कृतम्। किन्तु रूपसिद्ध्यर्थम् अपेक्षितानामेव सूत्राणामत्र व्याख्या कृता। स्वरविधायकसूत्रादिकं तु त्यक्तवानेव। अतः नेयं सम्पूर्णाष्टाध्याय्या व्याख्या।

## ३.२. प्रक्रियारत्नम्

सायणस्य धातुवृत्तौ अयं ग्रन्थः बहुधा उद्धृतः किन्तु सद्यः नोपलभ्यते। तथैव दैवम् इत्यस्य कृष्णलीलाशुकमुनिविरचितायां पुरुषाकाराख्यायां व्याख्यायामपि अस्योल्लेखः वर्तते। युधिष्ठिरमीमांसकमते कृष्णलीलाशुकमुनिरेव अस्यापि ग्रन्थस्य कर्ता। स च वैक्रमसंवत् 1250-1350 मध्ये जीवितः आसीत्।

## ३.३. रूपमाला

प्रक्रियाक्रमे तृतीयोऽयं ग्रन्थः विमलसरस्वत्या विरचितः। अयं च प्रक्रियाकौमुदीकर्तृ रामचन्द्रस्य किञ्चित्पूर्वं समकाले वा आसीत्। अस्य कालः 1400 वैक्रमाब्दपरिसरे भवतीति विदुषां मतम्। अनेन च मालाख्येषु अध्यायेषु ग्रन्थः विभक्तः। ते च यथाक्रमं- संज्ञामाला, स्वरसन्धिः, प्रकृतिभावः, व्यञ्जनसन्धिः, विसर्गसन्धिः, अजन्तमाला, हलन्त्यमाला, सर्वनाममाला, संख्याभागः, नियततिङ्माला, छान्दसमाला, अव्ययमाला, स्त्रीप्रत्ययमाला, कारकभागः, सार्वधातुकमाला, भावकर्मप्रक्रिया, लुट्-भागः, लृट्-भागः, लङ्-भागः, लिट्-भागः, पञ्चमभागः, सनादिभागः, लकारार्थमाला, लणादिनियमभागः, कृन्माला, तद्धितमाला, समाससमाला चेति।

अस्मिन्नपि ग्रन्थे सम्पूर्णानां पाणिनीयसूत्राणां सङ्कलनं नास्ति। अपेक्षितप्रक्रिया-नुसारिणामेव सूत्राणां ग्रहणं वर्तते।

## ३.३. प्रक्रियाकौमुदी

पाणिनीयव्याकरणस्य प्रक्रियाक्रमानुसारिग्रन्थेषु प्रमुखं स्थानं भजते प्रक्रियाकौमुदी। सिद्धान्तकौमुद्याः प्राक् प्रक्रियाक्रमस्य प्रचारे अस्यैव प्रामुख्यमासीत्। अस्य ग्रन्थस्य कर्ता भवति शेषवंशीयः रामचन्द्राचार्यः। अस्य पितुः नाम कृष्णमाचार्यः इति पुत्रस्य नाम नृसिंह इति चासीत्। अस्य कालः क्रैस्ताब्द1514 तः प्रागिति युधिष्ठिरमीमांसकाः।

प्रक्रियाकौमुदी पूर्वग्रन्थानामपेक्षया विस्तृता सरला च वर्तते। अस्मिन् ग्रन्थे एवं विभागः दृश्यते- सन्ध्युपयोगिसंज्ञाप्रकरणम्, स्वादिप्रक्रिया, अव्ययानि, स्त्रीप्रत्ययः, विभक्त्यर्थः, समासः, तद्धितः, द्विरुक्तप्रत्ययः, गणप्रक्रिया, उणादिः, वैदिकप्रक्रिया, स्वरप्रक्रिया च।

अस्य ग्रन्थस्य तु प्रायशः दशाधिका व्याख्याः समुपलभ्यन्ते। तेनैवास्य प्रचारः ज्ञातुं शक्यः। तथैव सिद्धान्तकौमुदीरचनायामस्य प्रभावः दरीदृश्यते।

## ३.४. प्रक्रियासर्वस्वम्

पाणिनीयप्रक्रियाग्रन्थमालायामन्यतमं पुष्पं भवति प्रक्रियासर्वस्वम्। अस्य च कर्ता केरलवास्तव्यः नारायणभट्टतिरीति प्रख्यातः पण्डितः। तेन च विदुषा देवनारायणाख्यस्य राज्ञ आज्ञया ग्रन्थोऽयं प्रणीतः। अस्य ग्रन्थस्य टीकाकर्तुः केरलवर्मदेवस्य मतेन षष्ठ्या दिनैः ग्रन्थस्यास्य निर्माणमभूत्। नारायणभट्टोऽयं मेल्पत्तूर ग्रामे जनिमलभत। नैकशास्त्रानिपुणेनानेन मीमांसशास्त्रे मानमेयोदयः इति ग्रन्थो व्यरचि। अस्यैव इतरकृतयः वर्तन्ते अपाणिनीयप्रमाणता, धातुकाव्यम्, नारायणीयम् इत्यादयः। प्रायः अष्टत्रिंशद् ग्रन्थाः अनेन निर्मिताः संस्कृतजगति राराजन्ते। अयं भट्टोजीदीक्षितानां समकालिक इति श्रुतिः। तत्र एवं श्रूयते यत् श्रीभट्टोजीदीक्षितः नारायणभट्टं साक्षात्कर्तुं काशीतः प्रस्थितः किन्तु मध्ये नारायणभट्टानां मृत्युवृत्तान्तं श्रुत्वा प्रतिनिवृत्त इति। यदि कथनमिदं सत्यं तर्हि अस्य कालः षोडशशताब्दी भवति। युधिष्ठिरमीमांसक एवमपि लिखति यद् अस्य मीमांसागुरुः माधवः यदि सायणभ्राता भवति तर्हि अस्य कालः पञ्चदशशताब्द्यपि भवितुमर्हति इति।

प्रक्रियासर्वस्वाख्यस्य ग्रन्थस्य विभागः विंशत्यध्यायेषु कृतो वर्तते। ते च यथा- संज्ञा, परिभाषा, सन्धिः, कृत्, तद्धितः, समासः, स्त्रीप्रत्ययः, सुबर्थाः, सुब्विधयः, आत्मनेपदपरस्मैपदविभागाः, तिङ्, लकारार्थः, सन्, यङ्, यङ्लुक्, सुब्धातुः, धातुः, उणादिः, छान्दसम् इति। अत्र ग्रन्थे उदाहरणानि श्लोकरूपेण दत्तानि। तथैव शास्त्रचर्चा अपि कारिकारूपेण विहितानि। ग्रन्थकर्ता स्वयमेव ग्रन्थलेखनकारणं ग्रन्थारम्भे ददाति। सिद्धान्तकौमुद्या इव अस्मिन् ग्रन्थेऽपि समग्रपाणिनीयसूत्राणां सन्निवेशो दरीदृश्यते।

## ३.५. वैयाकरणसिद्धान्तकौमुदी

कालेऽस्मिन् व्याकरणाध्ययनस्य प्रवेशद्वारं भवति कौमुद्या अध्ययनम्। व्याकरणविषये प्राथमिकज्ञानावाप्त्यर्थं जना एनमेव ग्रन्थं समाश्रयन्ति। आचार्यः भट्टोजीदीक्षितः भवति कर्ता ग्रन्थस्यास्य। अयमाचार्यः काशीवास्तव्य इति सुविदितमेव। किन्तु एतेषां परम्पराविषये विद्वत्सु मतिभेदो दृश्यते। केचन विद्वांसः अयं तैलङ्गब्रह्मण आसीत्, तत्र च चित्तूरूप्रान्ते अस्य मूलस्थानं वर्तते इति ब्रुवन्ति। अन्ये तु एनं महाराष्ट्रियं सारस्वतब्राह्मणं कथयन्ति। विषयेऽस्मिन् इदानीमपि निर्णयः सम्यक् न वर्तते। अस्य पितुः नाम लक्ष्मीधरः इत्यासीत् इति कौस्तुभे स्वयमेव वदति। दीक्षितस्य कालः षोडशशताब्द्या अन्तिमे पादे भवतीति निर्णयः पण्डितानाम्। युधिष्ठिरमीमांसकः अस्य कालः वि.सं1570-1650 मध्ये भवतीति वदन्ति।

ग्रन्थोऽयं द्विधा विभक्तः। पूर्वार्धः, उत्तरार्धश्चेति। स च विभागः विषयानुसारी एव। पूर्वार्धे नामरूपाणां विषये चर्चा भवति उत्तरार्धे धातुरूपाणां विषये। तत्स्वयं ग्रन्थकर्त्रा सूचितमुत्तरार्धारम्भे

पूर्वार्धे कथितास्तुर्यपञ्चमाध्यायगोचराः।
प्रत्यया अथ कथ्यन्ते तृतीयाध्यायगोचराः॥ इति।

पूर्वार्धे एवं प्रकरणविभागः दृश्यते- संज्ञा, परिभाषा, सन्धिः, शब्दाधिकारः, अव्ययम्, स्त्रीप्रत्ययप्रकरणम्, कारकप्रकरणम्, समासप्रकरणं, तद्धितप्रकरणम्, द्विरुक्तप्रकरणम् चेति। तत्र सन्धि-शब्दाधिकार-समास-तद्धितेषु अवान्तरप्रकरणानि विद्यन्ते।

उत्तरार्धे तु दशगणी, णिच्-सन्-यङ्-यङ्लुक्-नामधातु-कण्डवादि-आत्मनेपदि-परस्मैपदि-भावकर्म-कर्मकर्तृ-लकारार्थप्रकरणानि, पूर्वकृदन्तप्रकरणम्, उणादिः, उत्तरकृदन्तप्रकरणम्, वैदिकप्रक्रिया, स्वरप्रक्रिया च भवति। एभिः प्रकरणैः सम्पूर्णस्यास्य पाणिनीयस्य प्रतिपादनं कृतं श्रीमता भट्टोजीदीक्षितेन।

एवञ्चास्मिन् काले व्याकरणान्तरादुपक्रान्तोऽयं क्रमः पाणिनीये च प्रसिद्धिमवाप्य व्याकरणाध्ययनस्य द्वारीभूतो राजतेतराम्॥

✦ ✦ ✦

# ज्यौतिषशास्त्रे रोगचिन्तनम्

दिनकर मराठे*

## १. भूमिका

जन्मान्तरकृतं पापं व्याधिरूपेण बाधते[1] इति वचनमनुसृत्यैव त्रिस्कन्धात्मकज्यौतिषस्य होरास्कन्धे रोगविषया निरूपिता वर्तन्ते। रव्यादयो ग्रहा मेषादयो राशयश्च मानवशरीरस्य विविधानि अङ्गानि धातून् दोषान् च प्रतिनिधीकुर्वन्ति। यदि ग्रहादयः अनिष्टदा भवन्ति तर्हि तदुक्ताङ्गेषु धातुदोषवशात् रोगान् समुत्पादयन्ति। ते एव यदि सुस्थाः तर्हि तत्तदुक्ताङ्गेषु प्राबल्यमेव जनयन्ति। अतः रोगाऽरोगत्वज्ञानं तु ग्रहभावराश्यादीनां योगाधीनं भवति। अतो रोगचिन्तनावसरे ग्रहाणां योगा, दृष्टिः, मित्रत्वादि, बलाबलम्, भावविचार इत्यादिमूलभूतांशानां विवेचनपुरस्सरमेव रोगचिन्तनं कार्यम्।

भारतीयदर्शनानुसारं भगवता ब्रह्मणा निर्मितेयं सत्त्वरजस्तमोगुणात्मिका प्रकृतिः। तथैव ज्योतिश्शास्त्रेऽपि ग्रहाः सत्त्वरजस्तमोरूपा विवृताः। यथोक्तं जातकतत्त्वे

'चन्द्रार्कज्याः सात्त्विका ज्ञाच्छौ राजसौ शेषास्तामसाः'[2] इति।

ग्रहाणां सत्त्वरजस्तमोगुणात्मककिरणानामाश्रयेणैव ग्रहाणां शुभाशुभत्त्वनिर्णयः कृतोऽस्ति। सत्त्वरजस्तमोगुणाधिकाः ग्रहाः स्वस्वगुणोक्तकिरणान् विकीर्य स्थाने काले च स्वप्रभावान् प्रदर्शयन्ति। ज्योतिश्शास्त्रे रोगविचारः षष्ठाष्टमव्ययभावैः, तद्भावस्थितग्रहैः, तद्भावस्वामिभिः, षष्ठेशयुक्तैरथवा तद्दृष्टग्रहैः चिन्त्यते। उक्तञ्च फलदीपिकायाम्

रोगस्य चिन्तामपि रोगभावस्थितैर्ग्रहैर्वा व्ययमृत्युसंस्थैः।
रोगेश्वरेणाऽपि तदन्वितैर्वा द्वित्र्यादिसंवादवशाद्वदन्तु॥ इति॥[3]

एवं प्रकारेण स्थितैः ग्रहैः भावैश्च रोगचिन्तनं भवति। एतदतिरिच्य पापप्रभावयुक्तो राशिः, भावः, नीचराशिगतश्चास्तङ्गतः ग्रहः, लग्नं, लग्नेशः, अवरोही ग्रहः, क्रूरषष्ठ्यंशगतग्रहः, मारकग्रहः तथा बालारिष्टकारकग्रहाश्च रोगसूचका भवन्ति। एतेषां ग्रहाणां भावानाञ्च शुभाशुभत्वं बलाबलञ्च सम्यग् विमृश्य रोगः निर्णेतव्यः। ज्यौतिषे ग्रहाणां रोगकारकहेतवः एवं वर्तन्ते। १. रोगभावस्य प्रतिनिधित्वम्। २. अष्टमस्य तथा व्ययभावस्य प्रतिनिधित्वम्। ३. रोगभावे(षष्ठे भावे) ग्रहस्थितिः। ४. लग्नेशात् लग्नाश्रितग्रहात् वा रोगचिन्तनम्। ५. पापग्रहैः प्रभावितो ग्रहः।

---

*सहायकाचार्यः, कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य, महाराष्ट्रेषु रामटेकस्थस्य

[1]प्रश्नमार्गः, अ.१३.श्लो.सं.३९

[2]जातकतत्त्वम् अ.१.सू.३७

[3]फलदीपिका, अ.१४, श्लो.सं. १

## १.१ रोगभावस्य प्रतिनिधित्वम्

षष्ठो भावः रोगभाव इति व्यपदिश्यते। यतो हि षष्ठेशो रोगसूचको भवति। रोगस्थाने संस्थितो रोगाधिपः स्वां प्रकृतिमाश्रित्य स्वकारकत्वधर्मानुगुणं रोगं प्रददाति। यथा षष्ठे स्थितः चन्द्रः कफविकारं शीतज्वरं नेत्रारोगञ्च सूचयति। षष्ठेशः परिवर्तनयोगे यस्मिन् भावे भवति तत्सूचकाङ्गे अथवा तत्सम्बद्धजने रोगं सूचयति। षष्ठेऽथवा अष्टमे स्थितः रोगेशः अन्यग्रहेण युक्तश्चेद् एवं रोगं सूचयति। यथा

| | | |
|---|---|---|
| १. | रविः | शिरसि |
| २. | चन्द्रः | मुखे |
| ३. | कुजः | कण्ठे |
| ४. | बुधः | नाभिदेशे |
| ५. | गुरुः | नासिकायाम् |
| ६. | शुक्रः | नेत्रयोः |
| ७. | शनिः | पादयोः |
| ८. | राहुकेतू | उदरे। |

एवं रव्यादयः तत्तद्ग्रहोक्तस्थानेषु व्रणमुत रोगमुत्पादयन्ति।

तेषामपि व्रणं वाच्यमादित्येन शिरोव्रणम्।
इन्दुना च मुखे कण्ठे भौमेन ज्ञेन नाभिषु॥
गुरूणा नासिकायाञ्च भृगुणा नयने पदे।
शनिना राहुणा कुक्ष्यां केतुना च तथा वदेत्॥[4]

## १.२. अष्टमस्य तथा व्ययभावस्य प्रतिनिधित्वम्

अष्टमव्ययस्थाने अपि रोगकारके भवतः। अतः तत्स्वामिनावपि रोगकारकौ। रविचन्द्रमसोः अष्टमस्थानाधीशत्वे दोषो न विद्यते। “न रन्ध्रेशत्वदोषस्तु सूर्याचन्द्रमसोर्भवेत् ” इति पाराशरवचनात् स्पष्टम्। सूर्याचन्द्रमसौ लग्नाष्टमयोः स्वामिनौ भवतश्चेदपि अशुभफलं न यच्छतः। अतः एतत्सर्वं विचार्य एव अष्टमव्ययभावयोः चिन्तनं विधेयम्।

## १.३. रोगभावे ग्रहस्थितिः(षष्ठभावे)

षष्ठभावे यो ग्रहः सोऽपि रोगकारकः। तत्र रोगचिन्तनं कथमित्युक्तौ षष्ठस्थाने स्थितः ग्रहः यस्य राशेः भावस्य वा अधिपः स राशिः भावो वा कालपुरुषस्य यदङ्गं सूचयति तत्रैव रोगसम्भव इति। ग्रहो रोगसूचकः, राशिभावौ स्थानसम्बन्धसूचकौ यदि तत्रैव रोगोत्पत्तिः

[4]बृहत्पाराशरहोराशास्त्रम् अ.१८, श्लो.सं. ४, ५

वक्तव्या। कस्यचित् भावस्य स्वामी षष्ठाष्टमव्ययभावेषु स्थित्वा तद्भावफलं नाशयति। उक्तञ्च

यद्भावनाथो रिपुरिःफरन्ध्रे
दुःस्थानयोर्यद् भवनस्थितो वा।
तद्भावनाशं कथयन्ति तज्ज्ञाः
शुभेक्षितश्चेत् फलमन्यथा स्यात्॥ इति।[5]

## १.४. लग्नेशात् लग्नाश्रितग्रहात् च रोगचिन्तनम्

लग्नं तनुस्थानमित्युक्तत्वात् लग्नात् सम्पूर्णशरीरस्य ग्रहणम्। अतः लग्नं तथा लग्नेशः पापैः दृष्टः युतो वा न शुभप्रदः। अपि च स्वाथ्यहानिकरः भवति। लग्नस्थो ग्रहः शुभदृष्टश्चेत् स्वोक्तधातुं पुष्टीकरोति। पापदृष्ट्या च धातुक्षयं करोति। यथा

| लग्नस्थः ग्रहः | धातुः |
|---|---|
| सूर्यः | अस्थि |
| चन्द्रः | रक्तम् |
| कुजः | मांसम् (मज्जा) |
| बुधः | त्वक् |
| गुरुः | वसा |
| शुक्रः | वीर्यम् |
| शनिः | स्नायुः। |

## १.५. पापग्रहैः प्रभावितो ग्रहः

पापग्रहैः युतिः अथवा पापदृष्टिः ग्रहं प्रभावयति। यस्य भावस्य अधिपो ग्रहः पापप्रभावितः स तद्भावसम्बद्धे अङ्गे रोगं सूचयति।

पराशरमतानुगुणम् अष्टमतृतीयस्थाने आयुस्स्थाने भवतः। अनयोः क्रमशः सप्तमं द्वितीयञ्च स्थानं मारकमिति कथ्यते। मारकग्रहाः स्वान्तर्दशायाम् आयुर्दायसमाप्तिकाले मृत्युं यच्छन्ति। यथोक्तम्

अष्टमं ह्यायुषस्स्थानम् अष्टमादष्टमञ्च यत्।
तयोरपि व्ययस्थानं मारकस्थानमुच्यते॥
तदीशास्तु तत्र गताः पापिनस्तेन संयुताः।
तेषां दशाविपाकेषु सम्भवे निधनं नृणाम्॥ इति॥[6]

अष्टमस्थानस्थितः ग्रहः यदा पापप्रभावयुक्तो भवति तदा तस्यापि मारक इति संज्ञा।

---

[5]जातकपारिजातः, अ ११, श्लो.सं. ४

[6]लघुपाराशरी, अ. ३, श्लो.सं. १, २

जातकपारिजाते रव्यादिग्रहाणां मारकत्वे विभिन्नमृत्युयोगाः प्रतिपादिताः।

त्रिकस्थानसम्बन्धः- षष्ठाष्टमव्ययस्थानानि त्रिकस्थानानीत्यभिधीयन्ते। तेषु षष्ठः रोगकारकः अष्टमः आयुष्कारकः व्ययश्च हानिकारको भवति। त्रिकस्थानेषु स्थितः ग्रहः भावनाशं करोति। उक्तञ्च

षष्ठाष्टरिः केशा भावपरिभवः शुभाश्च भाववाहनः।
भावतदीश्वरकारकदुर्बलता चास्ति तद्वदाप्तवचः॥[7]

एवं प्रश्नमार्गे त्रिकस्थानसम्बद्धराशिरथवा भावः अनिष्टफलदायक इति प्रतिपाद्यते।

राशिस्वामिनां दुःस्थितिः- अनिष्टभावोऽथवा राशिस्थितः ग्रहः दुष्टफलदो भवति। राशिभावयोः अधिपतयः शुभाशुभाश्चेति द्विधा विभक्ताः। तत्र शुभाग्रहाः तृतीयषष्ठाऽष्टमद्वादशस्थानेषु अनिष्टा भवन्ति। तथैव पापाः तृतीयषष्ठैकादशस्थानानि विहाय सर्वेष्वपि स्थानेषु अनिष्टा एव। जातके यः भावः दुर्बलः अथवा तद्भावनाथः दुर्बलस्तर्हि तत्सम्बद्धे अङ्गे रोगः वाच्यः। भावभावेशयोः निर्बलता तद्भावफलं नाशयति। लग्नादिभावेषु मेषादिराशयः मानवशरीरे विविधाङ्गेषु प्रतिनिधयः भवन्ति। यदि कश्चिद् राशिः पूर्वोक्तरोगकारकग्रहेण सम्बद्धः भवति तर्हि तद्राशिसम्बद्धे अथवा तद्भावोक्ते अङ्गे रोगं जनयति।

## २. रोगाणां वर्गीकरणम्

ज्यौतिषे रोगाः मुख्यतया निजागन्तुकभेदेन द्विधा विभक्ताः। तद्यथा

रोगस्तु द्विविधाः ज्ञेयाः निजागन्तुकभेदतः।
निजश्चागन्तुकश्चापि प्रत्येकं द्विविधाः पुनः॥
निजाः शरीरचित्तोद्धा दृष्टादृष्टनिमित्तजाः।
तथैवागन्तुकाश्चैवं व्याधयस्युश्चतुर्विधाः॥
वातपित्तकफोद्भूताः पृथक् संसर्गजास्तथा।
सन्निपातभवाश्चैते शारीराः कीर्तिता गदाः॥
अष्टमेन तदीशेन तद्दृष्टास्तद्गतेन वा।
विज्ञातव्याः स्युरेतेषां वीर्यतस्तकृतागदाः॥
क्रोधस्वाध्वसशोकादिवेगजातास्तु मानसाः।
ज्ञेया रन्ध्रमनोनाथमिथोयोगेक्षणादिभिः॥
शापाभिधाराघाताहि जाता दृष्टनिमित्तजाः।
ज्ञेयाः षष्ठतदीशाभ्यां तद्दृष्टास्तद्गतेन वा॥
रन्ध्रेशषष्ठसम्बन्धे शापाद्याः प्रबलाश्च ते।
अदृष्टहेतुजा ज्ञेया बाधकग्रहसम्भवाः॥ [8]

[7]प्रश्नमार्गः अ. १४, श्लो.सं. २८

[8]प्रश्नमार्गः अ.१२ श्लो१८-२४

एतच्चात्र चित्रतः स्फुट्यते।



## २.१ सहजरोगः

ज्योतिषे नैकेषु ग्रन्थेषु जन्मजातरोगा बहुचर्चिताः। जन्मजातरोगाणां विचारः अष्टमस्थानं, अष्टमभावः, अष्टमाधिपः एवम् अष्टमे दृष्टिः इत्यादिना क्रियते। अनेन नेत्रहीनत्वं पङ्गुत्वं, कुब्जत्वं बाहुहीनत्वमित्यादिरोगा उच्यन्ते।

## २.२. दृष्टनिमित्तजन्यरोगाः

दृष्टनिमित्तजन्यरोगाः प्रत्यक्षतया द्रष्टुं शक्या भवन्ति। भयं, शारीरिकपीडा, घातः, महामारीत्यादिरोगा अस्मिन्नन्तर्भवन्ति। दृष्टनिमित्तजरोगाः षष्ठभावेन, षष्ठेशेन तथा तत्स्थानदृष्टग्रहैः जायन्ते।

## २.३. अदृष्टनिमित्तजन्यरोगः

आगन्तुकः रोगः द्विविधः। दृष्टनिमित्तजन्योऽदृष्टनिमित्तजन्यश्चेति। अदृष्टनिमित्त-जन्यरोगस्य कारणं प्रत्यक्षतो द्रष्टुं नैव शक्यते। ज्यौतिषज्ञानामाशयो विद्यते यद् अदृष्टनिमित्त-जन्यरोगाणां मुख्यं कारणं बाधकग्रहाणां प्रभावः। उक्तञ्च प्रश्नमार्गे

रन्ध्रेशषष्ठसम्बन्धे शापाद्याः प्रबलाश्च ते।
अदृष्टहेतुजा ज्ञेया बाधका ग्रहसम्भवाः॥[9]

रव्यादयो ग्रहाः मानवशरीराणामङ्गानि धातून् दोषांश्च प्रतिनिधीकुर्वन्ति। जातके यः ग्रहः बाधकः भवति स शरीरे यस्मिन् अङ्गे धातून् दोषांश्च प्रतिनिधीकरोति तत्र बाधा अथवा विकारो जायते इति शम्।

✦✦✦

[9]प्रश्नमार्गः अ. १२, श्लो.सं. २४

# षोडशसंस्कारेषु पूर्वसंस्कारविचारः

जयकृष्णन् नम्पूतिरि एन्. डि.*

## 1. भूमिका

वेदस्य चक्षूरूपमन्यतमं स्थानं ज्योतिषेण, कालविधानशास्त्रम् इत्यनेन सम्प्राप्तम्। वैदिककर्मणां यागादीनाञ्च अभीष्टफलप्राप्तये सुमुहूर्ते एव एतानि करणीयानि भवन्ति। अतः ज्योतिषस्य स्कन्धत्रयेषु होरास्कन्धे विद्यमानं मुहूर्ताङ्गम् अन्यतमं स्थानमावहति। अङ्गेऽस्मिन् मुहूर्तानां ज्ञानाय अनेकैः आचार्यैः अनेके ग्रन्थाः विरचिताः वर्तन्ते। यथा- मुहूर्तचिन्तामणिः, मुहूर्तमार्तण्डः, मुहूर्तपदवी, कालविधानम् इत्याद्याः। एषु ग्रन्थेषु प्रत्येकस्यापि कर्मणः शुभफलप्राप्तये करणीयः कालः दृश्यते।

मुहूर्तशब्दस्यार्थः कः इति जिज्ञासायां दिनशुद्धिविशेषविचारः इति सामान्यरूपेणोच्यते। शब्दोऽयं पुल्लिँङ्गे नपुंसकलिङ्गे च प्रयुक्तो दृश्यते। शुभाशुभकर्मणां फलप्राप्तये स्वीकृतः कालः तथा दिनस्य रात्रेर्वा पञ्चदशो विभागाश्च मुहूर्तशब्देन स्वीक्रियन्ते। तदेवं रत्नमालायामुच्यते।

"दिनस्य यः पञ्चदशो विभागो रात्रेस्तथा तद्धि मुहूर्तमानम्।" इति।

मानवजीवने समयस्य प्रत्येकोंऽशः अमूल्यः भवति। तथा च तस्य समयस्य यथार्थता यथाकालता यथादेशता यथापात्रता च मुहूर्तेन निर्णीयते। मुहूर्तगणनाद्वारा कदा कीदृशं कार्यं सहजं सुकरं च भवति इति निर्णयः क्रियते। कस्मिन् मुहूर्ते कीदृशं कर्म विधेयम्? कार्यारम्भस्य कः शुभकालः? कदा च विसर्जनं करणीयम्? तथैव वाणिज्यारम्भः, विद्यारम्भः, गृहारम्भः, गृहप्रवेशः, होमयज्ञकर्मारम्भादिसकलकार्याणां च शुभाशुभसमयनिर्धारणार्थं मुहूर्तः निर्दिष्टो भवति।

मानवस्य सांसारिक-सामूहिक-आध्यात्मिकविकासाय अस्मदाचार्यैः ऋषिभिः मानवजीवने अनुष्ठेया बहवः संस्कारा निर्दिष्टाः। यथा मनुस्मृतौ गर्भाधानादित्रयोदशसंस्कारा मनुना निर्दिश्यन्ते। तथैव व्यासः षोडश, याज्ञवल्क्यः द्वादश, विष्णुस्मृतौ पञ्चदश, संस्कारप्रकाशे एकचत्वारिंशत्, गौतमः चत्वारिंशत्, बौधायनः त्रयोदश, आश्वलायनः पञ्चदश च संस्कारान् निर्दिशति। एते संस्कारा व्यक्तेः मानसिक-शारीरिकशुद्धतायै अनुष्ठेया भवन्ति। यतो हि संस्कारपदस्यार्थो भवति संस्क्रियन्तेऽनेन श्रौतेन स्मार्तेन वा कर्मणा पुरुष इति। संस्कारश्च मनुष्यम् अन्येभ्यः जीविभ्यः पृथक् करोति। यतः गुणाधानकरणं

*अतिथि-अध्यापकः, संस्कृतविभागस्य, केरलेषु पथनमथित्तमण्डलस्थस्य परुमळजनपदस्य डि.बि.पम्पामहाविद्यालयस्य, email-jayakrishnanndjn@gmail.com

भवति संस्कारः। यथा द्रव्यान्तरेषु सुवर्णादयः मृण्मलिनयुक्ताः संस्कारेण शुद्धतामाप्नुवन्ति। यथा वा घटादयः संस्कृताः कार्योपयोगिनो भवन्ति। मनुष्योऽपि संस्कारेण संस्कृता धर्माचरणयोग्यस्सन् इतरजन्तुभ्यो विशेषतां प्राप्नोति। एते च संस्काराः सामान्येन षोडश इति स्वीक्रियन्ते। ते च मुहूर्तपदव्याम्

आधानं तनयस्य पुंसवविधिस्सीमन्तजाताह्वयाः
निष्क्रामोऽन्नविधिः क्षुरोपनयने त्रीणी व्रतानि क्रमात्।
गोदानञ्च समापनं व्रतविधेः पाणिग्रहोऽग्न्याहुतिः
विप्रादौ विहिताः श्रुतौ निगदिताः कार्याः क्रियाः षोडश॥

गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनं, जातकर्म, नामकरणम्, निष्क्रमणम्, अन्नप्राशनम्, चौलम्, उपनयनम्, चत्वारि वेदव्रतानि (होतारम् औपनिषदम्, शुक्रियम्, गोदानम्), समावर्तनम्, विवाहः, अन्त्येष्टिः इत्येते षोडशसंस्कारा भवन्ति। तेषु शिशोः जननात् पूर्वं क्रियमाणाः गर्भाधानपुंसवनसीमन्ताः पूर्वसंस्काराः अन्ये उत्तरसंस्काराश्च भवन्ति। एभिश्च संस्कारैः संस्कृतस्सन्नेव मानवो ब्रह्मैक्यपात्रं भवति। एषां संस्काराणां समुचितफलप्राप्तिस्तु तदा एव भवति, यदा एते युक्तकाले विधीयन्ते। तादृशश्च कालनिर्णयः ज्योतिश्शास्त्राधीनम् इत्यतः शास्त्रेऽस्मिन्नपि संस्कारमुहूर्तनिर्णयविषये महती चर्चा विहिता। सर्वेषामपि संस्काराणां यथायथं मुहूर्तानां विधानं सर्वेष्वपि मुहूर्तग्रन्थेषु दृश्यते। तेषु पूर्वसंस्काराणां प्राधान्यं, समयः, मुहूर्ताश्च पत्रेऽस्मिन् प्रस्तूयते।

# २. गर्भाधानसंस्कारः प्राधान्यञ्च

भारतीयाः प्रकृत्या एव आध्यात्मिकचिन्तनोत्सुका भवन्ति। तेषाम् आध्यात्मिकविचारे उन्नतिर्भवतु तथा ह्रासो मा भवतु इति बुद्ध्या एव सर्वास्वपि क्रियासु कश्चन विधिः निर्दिष्टो वर्तते। विवाहेऽपि तादृशः कश्चन विचारो दृश्यते। यतो हि विवाहः सुपुत्रप्राप्तये क्रियते। सुपुत्रप्राप्तिस्तु गर्भाधानकालमाश्रित्य भवति। कथमिति चेज्जातके विद्यमाना ग्रहस्थितिः जातकस्य पुरुषस्य स्वभावप्रकृत्यादिकं सूचयति। तज्जातकं चतुर्धा विभज्यते, आधानम्, ऊरूष्कं, शीर्षोदयः, भूजातमिति।

## २.१ आधानम्

संयोगकाले स्त्रियां यदा बीजस्य क्षेपः भवति, स आधानकालः। अर्थात् स्त्रियः रक्ते पुरुषबीजस्य संयोगः यदा जायते, स कालः आधानलग्नमिति कथ्यते।

## २.२ ऊरूष्कम्

गर्भाधानानन्तरं रक्तबीजसंयोगाद् यद् घनवस्तु उत्पद्यते, प्रत्येकस्मिन् मासे तस्य वस्तुनः क्रमिकविकासः जायते। वराहमिहिराचार्यः तदेवं कथयति- गर्भाधानाद् एकैकस्मिन्

मासे कललघनाङ्कुरास्थिचर्माङ्गजचेतनताः भवन्तीति। तथा षण्मासेषु अङ्गुल्यस्थिचर्माङ्गजाः गर्भस्थशिशोः उत्पद्यन्ते। सप्तमे मासे तस्मिन् गर्भस्थे शिशौ चेतनायाः आविर्भावः जायते। स कालः ऊरूष्कमित्यभिधीयते।

## २.३ शीर्षोदयः

प्रसवे, यदा शिशोः शिरसः दर्शनं बहिः भवतिः, सः कालः शीर्षोदयलग्नमित्यभिधीयते।

## २.४ भूजातम्

जनन्या यदा शिशुः पूर्णतया बहिरायाति, भूमौ आयाति, स कालः भूजातमिति कथ्यते।

एतेषु चतुर्षु जातकेषु भूजातस्य अत्यन्तं प्राधान्यं लोके दृश्यते। एतानि त्रीणि जातकान्यपि (आधानजातकं विहाय) आधानकालाश्रितानि भवन्ति। शिशोः मातुः उदरे स्थितिः, वृद्धिः, जननकालः, मातुः शिशोः च आरोग्यम् इत्यादयः बहवो विषयाः गर्भाधानमुहूर्ताश्रिताः भवन्ति। बृहज्जातके विषयोऽयमेवं दृश्यते

उदयास्तगयोः कुजार्कयोः निधनं शस्त्रकृतं वदेत्तदा।
मासाधिपतौ निपीडिते तत्काले श्रवणं समादिशेत्॥[1]

आधानमुहूर्तस्य लग्ने सप्तमे च रविकुजौ भवतः तर्हि गर्भिण्याः शस्त्रेण मरणं सम्भवति। आधानमासात् एकैकस्य मासस्य एकैकः ग्रहः अधिपः भवति। आधानमासस्य अधिपः शुक्रः, ततः क्रमेण कुजः, गुरुः, रविः, चन्द्रः, शनिः, बुधः, आधानलग्नस्याधिपः, चन्द्रः, सूर्यश्च दशमासानामधिपाः भवन्ति।

कललघनाङ्कुरास्थिचर्माङ्गजचेतनदाः
सितकुजजीवसूर्यचन्द्रार्किबुधाः परतः।
उदयपचन्द्रसूर्यनाथाः क्रमशो गदिताः
भवति शुभाशुभञ्च मासाधिपतेः सदृशम्॥[2]

तेषां दशमासाधिपतीनां ग्रहाणां बलाबलमाश्रित्य गर्भस्थशिशोः गर्भिण्याश्च शुभाशुभफलानि ज्ञेयानि। यदि मासेश्वरस्य मासे मासेशः अस्तङ्गतः वा पराजितः तर्हि तस्मिन् मासे गर्भनाशः वाच्यः।

# ३. जननकालविचारः

तत्कालमिन्दुसहितो द्विरसांशकोय-

[1]बृहज्जातकम् 4.9
[2]बृहज्जातकम् 4.16

स्तत्तुल्यराशि सहितेपुरतश्शशाङ्के।
यावानुदेति दिनरात्रिसमानभाग-
स्तावद्गते दिननिशोः प्रवदन्ति जन्म॥[3]

गर्भधारणकाले चन्द्रः यस्मिन् द्वादशांशे स्थितः भवति, दशमे मासे तत्सङ्ख्यासमानराशौ चन्द्रः यदा आयाति तदा प्रसवः सम्भवति। तथैव गर्भाधानलग्नस्य त्रिंशांशकसंख्या या भवति, दिने वा रात्रौ तत्सङ्ख्यासमाननाडिकायां शिशोः जन्म भवति। एवमेव आधानलग्नं दिवाराशयः चेद् दिवा, रात्रिराशयश्चेद् रात्रौ च जन्म भवति।

गोऽजाश्विकर्किमिथुनाः समृगा निशाख्याः॥[4]

मेषवृषभमिथुनकर्कोटकधनुमकरराशयः रात्रिराशयः, सिंहकन्यातुलावृश्चिककुम्भ-मीना दिवाराशयश्च भवन्ति।

गर्भिण्या गर्भस्थशिशोः च आरोग्यम्, उदरे गर्भस्थशिशोः स्थितिः, शिशूनां संख्या इत्यादयो बहवो विषया गर्भाधानमुहूर्तलग्नाद् विचारयितुं शक्यन्ते। इत्थं गर्भाधानकालविचिन्तनेन कदाचित् परिहारक्रियाभिः औषधैश्च दोषान् न्यूनीकर्तुं शक्येत। उपशमान्निरोधो वर इति आयुर्वेदविदामभिप्रायः। रोगचिन्तने यथा इदं वाक्यमुच्यते तथा तद् गर्भदोषदूरीकरणाय सुपुत्रप्राप्तये च स्वीकर्तुं शक्यते। तदित्थम्- सुपुत्रप्राप्तये गर्भाधानमुहूर्तगणनां कृत्वा तस्मिन्नेव मुहूर्ते विधिवद् गर्भाधानसंस्कारः यैः क्रियते तेषां निश्चयेन समीचीनसन्तानलाभः वाच्यः। अतः विभिन्नानामाचार्याणां मतानुसारं गर्भाधानमुहूर्ते अवधेयाः अंशाः प्रतिपाद्यन्ते।

माधवीये

विभावरी षोडश भामिनीनाम्
ऋतूद्गमादेर्ऋतुकालमाहुः।
नाद्याश्चतस्रोऽत्र निषेकयोग्याः
पराश्च युग्मास्सुतदाः प्रशस्ताः॥[5]

स्त्रीणामार्तवदर्शनात् षोडशदिनानि ऋतुकालः भवति। तेषु षोडशरात्रिषु प्रथम-चतस्रः निशाः निषेकयोग्याः न भवन्ति। पञ्चमरात्रेः षोडशरात्रिं यावद् युग्मदिवसेषु गर्भाधानेन पुत्रः, अयुग्मरात्रिषु गर्भाधानेन स्त्रीप्रजाश्च जायते।

तत्र वराहमिहिराचार्यस्य मतमेवं दृश्यते

रक्ताधिक्ये स्त्री पुरुषस्तु शुक्ले नपुंसकं शोणितशुक्लसाम्ये॥ इति।
शीतज्योतिषि योषितोऽनुपचयस्थाने कुजेनेक्षिते
जातं गर्भफलप्रदं खलु रजस्स्यादन्यथा निष्फलम्।

---

[3]बृहज्जातकम् 4.21
[4]बृहज्जातकम् 1.10
[5]6.3

दृष्टेऽस्मिन् गुरुणा निजोपचयगे कुर्यान्निषेकं पुमा-
नत्याज्ये च समूलभे शुभगणे पूर्वादिकालोज्झिते॥[6]

स्त्रिया जन्मकालीनचन्द्रात् तत्कालचन्द्रः अनुपचयस्थानेषु (१, २, ४, ५, ७, ८, ९, १२ राशिषु) कुजदृष्ट्या तिष्ठति काले रजोदर्शनं भवति चेत् स ऋतुकालः गर्भधारणयोग्यो भवति। तथैव पुरुषस्य जन्मचन्द्रात् तात्कालिकचन्द्रः उपचयस्थानेषु (३, ६, १०, ११ राशिषु) गुरुदृष्ट्या भवति चेत् स कालः निषेकयोग्यो भवति। पर्वकालः, एकादशी, सूर्यसङ्क्रान्तिः, श्राद्धदिनम् इत्यादीनि तथा एतेषां पूर्वदिनानि च निषिद्धानि भवन्ति।

मुहूर्तचिन्तामणौ गर्भाधाने त्याज्यविषयान् एवं निर्दिशति।

गण्डान्तं त्रिविधं त्यजेन्निधनजन्मर्क्षे च मूलान्तकं
दास्रं पौष्णमघोपरागदिवसान् पातं तथा वैधृतिम्।
पित्रोः श्राद्धदिनं दिवा च परिघाद्यर्धं स्वपत्नीगमे
भान्युत्पातहतानि मृत्युभवनं जन्मर्क्षतः पापभम्॥[7]

त्रिविधं गण्डान्तम्[8] जन्मनक्षत्रम्, निधननक्षत्रम् (जन्मनक्षत्रात् सप्तमम्) मूला, भरणी, अश्विनी, रेवती, मघा इत्येतानि नक्षत्राणि, ग्रहणदिनम्, व्यतीपात-वैधृतियोगौ, श्राद्धदिनम्, दिवाकालः, परिघयोगस्य पूर्वार्धः, जन्मराशेः अष्टमराशिः, पापग्रहसहितराशिलग्नं च त्याज्यं भवति।

रात्रिकाले एव निषेकः कार्यः इति प्रश्नोपनिषदि सूचयति। दिवाकाले यः रत्या संयुज्यते तस्य आयुषो नाशः जायते। किन्तु सङ्गमः रात्रिकाले चेत् तद् ब्रह्मचर्यमेव भवतीति।

प्राणं वा एते प्रस्कन्दन्ति ये दिवा रत्या संयुज्यते।
ब्रह्मचर्यमेव तत् यद्रात्रौ रत्या संयुज्यते॥[9]

कालविधाने निषेकमुहूर्तस्य शुभाशुभानि नक्षत्रादीनि एवम् उल्लिख्यन्ते

वेदागमोक्तसमये रुचिरे प्रदेशे
वाजीकृतेन जितरोषभयेन पुंसा।
मन्त्रौषधप्रवरतीर्थजलोज्ज्वलेषु
कान्ताजनेष्वथ निषेकविधिर्विधेयः॥

वेदेषु तन्त्रशास्त्रेषु स्मृत्यादिषु च उक्ते सुमुहूर्ते काले, रमणीये प्रदेशे, मन्त्रेण औषधेन पुण्यतीर्थस्नानेन च परिशुद्धे, गर्भधारणसामर्थ्ययुक्तायां कामिन्यां स्त्रियां, भयं क्रोधं च विजित्य वाजीकृतेन (औषधमन्त्रादिभिः उत्तेजितेन) पुरुषेण विधिवद् गर्भाधानसंस्कारः कार्यः।

---

[6]बृहज्जातकम् 6.4

[7]5.5

[8]नक्षत्रतिथिलग्नानां गण्डान्तं त्रिविधं स्मृतम् इति रत्नमालायाम्।

[9]प्रश्नोपनिषद् 1.13

विष्णुप्रजेशरविमित्रसमीरपौष्ण-
मूलोत्तरावरुणभानि निषेककार्ये।
पूज्यानि पुष्यवसुशीतकराश्विचित्रा-
दित्याश्च मध्यमफलान्यशुभास्स्युरन्ये॥

श्रवणा, रोहिणी, हस्ता, अनुराधा, स्वाती, रेवती, मूला, उत्तराफाल्गुनी, उत्तराषाढा, उत्तराभाद्रपदा, शतभिषा इत्येतान्येकादशनक्षत्राणि गर्भाधाने उत्तमानि भवन्ति। पुष्या, धनिष्ठा, मृगशिरा, अश्विनी, चित्रा, पुनर्वसुः च मध्यमानि। अन्यानि भरणी, कृत्तिका, आर्द्रा, आश्लेषा, मघा, पूर्वाफाल्गुनी, विशाखा, ज्येष्ठा, पूर्वाषाढा, पूर्वाभाद्रपदा इत्येतानि नक्षत्राणि गर्भाधानसंस्काराय अशुभानि च वर्तन्ते।

षष्ठ्यष्टमीं पञ्चदशीं चतुर्थीं
चतुर्दशीमप्युभयत्र हित्वा।
शेषाश्शुभास्स्युस्तिथयो निषेके
वाराश्शशाङ्कार्यसितेन्दुजानाम्॥

श्लोकेऽस्मिन् शुभाशुभतिथयो वासराश्च उच्यन्ते। गर्भाधानसंस्कारे शुक्लकृष्णपक्षयोः षष्ठी अष्टमी चतुर्थी चतुर्दशी पूर्णिमा अमावास्या इत्येतान् तिथीन् त्यक्त्वा अन्यास्तिथयः, चन्द्रगुरुशुक्रबुधवासराः च शुभदाः भवन्ति।

वृषभकमृगकर्किसिंहकन्या-
तुलघटचापझषाश्शुभावहास्स्युः।
यदि शुभबलशालिनोऽनुकूलो
निधनविशुद्धियुतो निषेककार्ये॥

गर्भाधानसंस्कारे वृषभः मकरः कर्किः सिंहः कन्या तुला कुम्भः धनुः मीनः एषु राशिषु लग्नं शुभम्। तथैव लग्ने बलिष्ठस्य शुभग्रहस्य स्थितिः, लग्नादष्टमभावशुद्धिः च भवेत्। स्त्रियः पुरुषस्य च जन्मानुजन्मनक्षत्राणि(जन्मनक्षत्रं, तस्माद्दशमम् ऊनविंशं च नक्षत्रम्) च वर्ज्यानि।

स्त्रिया रजोदर्शनात् षोडशदिनानि ऋतुकालः। अयमेव कालः गर्भधारणयोग्यः भवति। रजोदर्शनात् प्रत्येकस्यामपि रात्रौ क्रियमाणस्य आधानस्य फलान्येवं वर्तन्ते

अस्नानदिवसादर्वाग्दोषं वक्ष्यामि सङ्गमे।
प्रथमेऽहन्यादौ प्राप्ते निषेकं यः करिष्यति॥
शीघ्रं स मृत्युमाप्नोति द्वितीये स्त्री मरिष्यति।
तृतीयेऽह्नि निषिक्तस्य गर्भस्य मरणं भवेत्॥
चतुर्थे जायते पुत्रो ह्यल्पायुर्धनवर्जितः।
विद्याहीनः स्थानशून्यो दुःखी चाचारवर्जितः॥
पितुरिन्द्रियनाशश्च तस्माच्चत्वारि वर्जयेत्।

पञ्चमे जायते पुत्री षष्ठे पुत्रस्सपौत्रकः॥
सप्तमे च प्रजा वन्ध्या चाष्टमे चेश्वरस्सुतः।
नवमे सुन्दरी पुत्री दशमे प्रवरस्सुतः॥
एकादशे विरूपा स्त्री द्वादशे पुरुषोत्तमः।
त्रयोदशे भवेत् पापाधर्मशीलश्चतुर्दशे॥
कन्या मृता पञ्चदशे सर्वज्ञः षोडशे स्मृतः।
तस्मादुक्तेषु कालेषु ऋतुस्नातां स्त्रियं व्रजेत्॥

इत्येवं दिङ्मात्रेण गर्भाधानमुहूर्तविचारः क्रियते। तस्मिन् यथाक्रमं कामिन्याः शुद्धाशुद्धदिनानि, गण्डान्तादिनिषिद्धकालः, स्त्रीपुरुषयोः चारवशात् शुभाशुभकालः, अन्तिमे पञ्चाङ्गशुद्धिः लग्नं ग्रहस्थितिश्च चिन्तनीयानि। एवमुपर्युक्तानां सर्वेषामपि विचारं कृत्वा तेन मार्गेण पुत्रोत्पत्तिः भवति तर्हि स सज्जनः लोकोपकारी च भवति। एवं सुकाले कृतेनाधानेन कदाचिदनपत्यतादुःखादपि जनान् मोचयितुं शक्येत। लोककल्याणाय भारतीयाचार्यैः दर्शितमिमं मार्गमाश्रयेम।

# ४. पुंसवनसंस्कारः

संस्कारेषु द्वितीयोऽयम्। गर्भधारणस्य निश्चयानन्तरं गर्भस्थशिशोः पुंसवनाख्य-संस्कारः क्रियते। पुंसवनसंस्कारानुष्ठानस्य अयमेवाभिप्रायो यत् पुमान् येन संस्कारेण जायेत तत्पुंसवनमिति। तथोक्तं शौनकेन- पुमान् प्रसूयते येन कर्मणा तत्पुंसवनमीरितम् इति।

संस्कारोऽयं तृतीये मासे कर्तव्यः। मासगणना गर्भाधानात् कार्या। गर्भाधानकालाज्ञानेन आर्तवदर्शनानन्तरं पञ्चमदिनात् मासस्य गणना कार्या।

मासादिगर्भहोमेषु गर्भाधानदिनाद् भवेत्।
यत् चेदनिश्चितं पुष्पदर्शनात् पञ्चमं दिनम्॥ इति।

गर्भरक्षा स्थूला सूक्ष्मा च भवेत्। तयोः सूक्ष्मस्याधिकप्राधान्यं देयं वर्तते। गर्भिण्याः तत्परिवारस्य च मानसिकस्थितिः सूक्ष्मशब्देन गृह्यते। गर्भाधानात् तृतीये मासे, आधानेन मिश्रितशुक्लरक्तादुत्पन्नवस्तुनः वृद्धिः आरभ्यते। अतः मासेऽस्मिन् गर्भिण्याः मानसिकशारीरिकस्थितिं द्रढीकर्तुं संस्कारोऽयं निर्दिष्टः। आचार्यैः संस्कारस्यास्य मुहूर्तविचारः एवं क्रियते।

माधवीये

कुर्यात् पुंसवनं रमारमणभे पुष्येऽपि वा सद्ग्रहे
लग्नस्थे निधने ग्रहेण रहिते मासे तृतीये बुधः।
तत्स्थौ दृष्ट्युदयौ सितामृतरुचोरत्र क्रमात् कीर्तितौ

वीणाकर्कटकन्यकाः न शुभदाः पुंराशयोऽन्ये शुभाः॥[10]

गर्भाधानदिनात् तृतीये मासे, पुष्ये वा श्रवणनक्षत्रे, शुभग्रहयुक्ते लग्ने, मिथुनकन्याकर्कटकान् त्यक्त्वा अन्येषु ओजराशिलग्नेषु, अष्टमशुद्धिसहिते काले च पुंसवनसंस्कारः कार्यः। तस्मिन् शुक्रचन्द्रयोः दृष्टिः वा उदयः शुभायेति कथयन्त्याचार्याः।

कालविधाने

कुर्यात् पुंसवनं प्रसिद्धिविषये गर्भे तृतीयेऽथवा
मासि स्फीततनौ तुषारकिरणे पुष्येऽथवा वैष्णवे।
हित्वा कर्कटकं नृयुग्ममबलामन्येष्वरिक्ते तिथौ
शुद्धे नैधनधामनि शुक्रशशभृद्गुर्विन्दुजानां दिने॥

गर्भः अस्ति इति यदा ज्ञायते, तदनन्तरं तृतीये मासि, शुक्लपक्षे(चन्द्रस्य पक्षबलत्वं वाच्यं), पुष्ये वा श्रवणे नक्षत्रे, रिक्तातिथीः वर्जयित्वा अन्यासु तिथिषु, कर्काटकमिथुनकन्याः त्यक्त्वा अन्येषु अष्टमशुद्धियुक्तेषु लग्नेषु, शुक्रचन्द्रगुरुबुधवासरेषु च पुंसवनसंस्कारः कार्यः।

इत्येवं गर्भिण्या गर्भरक्षणाय तथा शिशोः सुष्ठु विकासाय च पुंसवनसंस्कारः निर्दिष्टः। कालेऽस्मिन् तत्रोपस्थितानां गुरुजनानां ज्येष्ठानां च आशीर्वादैः तस्या गर्भिण्या मानसिकारोग्यस्य दृढता सञ्जायते।

# ५. सीमन्तसंस्कारः

संस्कारोऽयमपि गर्भरक्षणाय, गर्भिण्याः क्लेशरहितप्रसवाय च क्रियते। तस्य कालः आचारसङ्ग्रहे एवं दृश्यते।

चतुर्थे मासि सीमन्तं कुर्यात्तन्नैव पञ्चमे
पुंसवानन्तरं चैतत् प्रथमे गर्भ एव च
शुक्लपक्षत्वनियमो भवत्यत्र विशेषतः॥

गर्भाधानात् चतुर्थे मासे संस्कारोऽयं कार्यः। पञ्चमो मासो निषिद्धः। प्रथमे गर्भे एव सीमन्तसंस्कारः कार्यः। शुक्लपक्ष एव स्वीकर्तव्य इत्यपि निर्दिशति। आधुनिकवैद्यशास्त्रज्ञा अभिप्रयन्ति यत् प्रथमे गर्भे शस्त्रक्रिया जाता चेत् द्वितीयगर्भे प्रसवः साधारणतया न सम्भवति, तत्रापि शस्त्रक्रिया अपेक्षिता इति। वयं चिन्तयामो यत् विषयोऽयं पूर्वमेव ज्ञात्वा ऋषिभिः, गर्भिण्याः प्रसवकाले यावद् धैर्यमपेक्ष्यते तन्निमित्तं संस्कारोऽयं निर्दिष्ट इति। संस्कारस्यास्य मुहूर्तविचार एवं भवति।

व्यासमतानुसारम्

पुरुषग्रहवाराः स्युः शुभाः सीमन्तकर्मणि।

---

[10] 6-7

मध्यौ स्त्रीग्रहवारौ तु वर्जयेत् नपुंसकौ॥

पुरुषग्रहाः रविकुजगुरवः। एतेषां वासराः शुभाः। चन्द्रशुक्रवारौ मध्यमौ, बुधशनिवारौ अधमौ च भवतः। विषयोऽयमेव काश्यपेनोक्तं दृश्यते

अर्कभूसूनुसुरेज्यानां च वासरे॥ इति।

कालविधाने

चतुर्थषष्ठाष्टममासभाजि सौरेण गर्भे प्रथमे विधेयम्।

सीमन्तकर्मद्विजभामिनीनां मासेऽष्टमे विष्णुबलिं च कुर्यात्॥

सौरमानानुसारेण चतुर्थे षष्ठे अष्टमे वा मासे, प्रथमगर्भे एव सीमन्तकर्म कुर्यात्। ब्राह्मणस्त्रीणांम् अष्टमे मासे विष्णुबलिं च कुर्यात्।

सीमन्ते तिष्यहस्तादितिहरिशशभृत्पौष्णवेदोत्तराख्याः

पक्षच्छिद्रां च रिक्तां पितृतिथिमपहायापरेस्युः प्रशस्ताः।

सिंहालीं वर्जयित्वा शुभबलसहिता राशयोऽन्ये दिनानि

श्रेष्ठानि श्वेतरोचिर्भृगुबुधधिषणानां विशुद्धेऽष्टमेऽपि॥

सीमन्तसंस्काराय पुष्या हस्ता पुनर्वसुः श्रवणा मृगशिरा रेवती रोहिणी उत्तराफाल्गुनी उत्तराषाढा उत्तराभाद्रपदा एतानि नक्षत्राणि, पक्षछिद्रा-रिक्ता-अमावास्या-तिथीः त्यक्त्वा अन्याः तिथयः, सिंहवृश्चिकौ त्यक्त्वा अष्टमशुद्धियुक्तानि शुभबलसहितानि लग्नानि, सोमशुक्रबुधगुरुवासराः च योग्यानि भवन्ति। मुहूर्तस्यालब्धावसरे

श्रवणाश्विकराः पुनर्वसुनिऋतिभं च सुपुष्यको मृगः।

रविभूसुतजीववासराः कथिताः पुंसवनादिकर्मसु॥

पुंसवनसीमन्तसंस्कारयोः उत्तममुहूर्तानि पूर्वोक्तानि। तस्य शुभमुहूर्तस्य अलब्धावसरे मध्यमरूपेण एतानि नक्षत्रादीन्यपि स्वीकार्याणि।

यदा पूर्वोक्तरीत्या उत्तममुहूर्त्ताः न प्राप्यन्ते, तस्मिन् काले मध्यमरूपेण एतानि नक्षत्रादीनि स्वीकर्तव्यानि। श्रवणा अश्विनी हस्ता पुनर्वसुः मूला पुष्या मृगशिरा इत्येतानि नक्षत्राणि, रविकुजगुरुवासराः च पुंसवनादिकर्मसु (आदिशब्देन सीमन्तोऽपि) मध्यमरूपेण स्वीकर्तुं योग्यानि भवन्ति। अर्थात् श्रवणनक्षत्रं रविवासरे, मूलानक्षत्रं गुरुवासरे इत्येवं रीत्याऽयाति चेत् मध्यमरूपेण स्वीकरणीयः।

## ५.१ त्याज्यकालः

नक्तं च विष्टिर्गुलिकश्च नेष्टं रिक्तोऽष्टमीपर्वकुजार्किवाराः।

वर्ज्याश्च जन्मत्रितयं बुधैश्च सीमन्तकर्मण्यशुभं च नेष्टम्॥

सीमन्तकर्मणि रात्रिकालः, विष्टिकालः, गुलिककालः, रिक्ता अष्टमी पूर्णिमा अमावास्या च तिथयः, कुजशनिवारौ जन्मानुजन्मनक्षत्राणि च अधमानि भवन्ति। कदापि

न स्वीकर्तव्यानि इत्यर्थः। श्लोकेऽस्मिन् वासरविचारे मतभेदः दृश्यते। पुरुषग्रहस्य कुजस्य वासरः योग्यः इति पूर्वमुक्तम्। कालविधानलेखकस्य मते कुजवासरः त्याज्यः इति।

सीमन्तलग्नादेकोऽपि क्रूरः पञ्चाष्टरिःफगः।
निहन्ति लग्ने जीवोऽपि तद्गर्भं च न संशयः॥

सीमन्तमुहूर्त्तलग्नात् पञ्चम-अष्टम-द्वादशभावेषु एक एव पाप आयाति चेदपि गर्भस्य नाशो वाच्यः। लग्ने गुरुः भवति चेदपि उपर्युक्तस्थानेषु पापेन गर्भनाश एव जायते। ग्रन्थेऽस्मिन् कालविधाने मुहूर्तस्य दोषान् गुणान् च विचार्य मुहूर्तचिन्तनस्यान्तिमे ग्रन्थकार एवं निर्दिशति

दिवसो गुणदोषाभ्यां विमिश्रस्स्यात् परस्परं
केवलं गुणसंयुक्तो देवानामपि दुर्लभः।
दोषान् सर्वान् परित्यक्तुमशक्यं बहुवत्सरैः
तस्मात्परीक्ष्य कुर्वीत स्वल्पदोषगुणाधिके॥

एकैको दिवसो गुणदोषसम्मिश्रो भवति। केवलगुणयुक्तमहोरात्रं देवानामपि दुर्लभं वर्तते। बहुवत्सराणि यावत् प्रतीक्षां कृत्वाऽपि सर्वदोषविवर्जितो गुणमात्रयुक्तः मुहूर्त्तः न प्राप्येत। अतः मुहूर्त्तस्वीकरणावसरे स्वल्पदोषविशिष्टोऽधिकगुणसम्पन्नश्च कालः यदा भवति, स स्वीकरणीयः।

आदिमध्यान्तरहितः कालो नाम विभुः स्वयम्।
सदा सदोषस्सगुणो निर्दोषः कोऽपि नास्ति हि॥

कालपुरुषः सर्वत्र व्याप्तः, आदिमध्यान्तरहितः च इत्यतः सर्वदा गुणदोषयुक्तः भवति। अतः दोषान् वा गुणान् विहाय कोऽपि कालो न प्राप्यते। अतो मुहूर्त्तचिन्तनसमये स्वल्पदोषयुक्तोऽधिकगुणयुक्तश्च यः कालः प्राप्यते, स स्वीकरणीयः।

मासप्रोक्तेषु कार्येषु समौढ्यजीवशुक्रयोः।
अधिमासाधिके दोषा न स्युः कालविधेर्बलात्॥

मासाधिष्ठितकर्मसु (मासनियमेन करणीयेषु कार्येषु, यथा-तृतीयमासे पुंसवनम् इत्यादि) गुरुशुक्रयोः मौढ्यम्, अधिमासः इत्यादीनां विचारो महता यत्नेन न कार्यः, कालविधेरेव बलीयस्त्वात्। यथा पुष्य-श्रवणनक्षत्रयोः एव पुंसवनसंस्कारः कार्यः इत्यतः तयोर्नक्षत्रयोर्मध्ये अधिकगुणसम्पन्नः कालः परीक्ष्य स्वीकरणीय इति।

गुणैरेव युक्तः कालो देवानामपि दुर्लभो भवति। अस्माकं मानवानामेकं वर्षं तेषां देवानामेकं दिनमेव भवति। तावन्ति दिनानि सन्ति चेदपि केवलगुणयुक्तो मुहूर्तो दुर्लभस्तेषां, का कथा पुनरस्माकम्। अतः मुहूर्तविचारे स्वल्पदोषाधिकगुणसम्पन्नकालः मुहूर्तरूपेण स्वीकरणीयः।

इत्येवं रीत्या सुपुत्रप्राप्तये क्रियमाणसंस्काराणां विचारा आचार्यैः प्रस्तुताः। सीमन्तसंस्कारानन्तरम् अष्टमे मासे विष्णुबलिरपि करणीयः। पत्रेऽस्मिन् पूर्वसंस्काराणां

दिङ्मात्रं विचारः क्रियते। गर्भाधानादिसंस्काराणामनुष्ठानेन उत्पन्नाः संस्कृताः शिशव आगामिकाले सर्वेषां जनानाम् उन्नत्यर्थँ प्रयत्नं कुर्युः। यतो हि कश्यपप्रजापतेः सन्ध्याकाले कृतेन गर्भाधानेन उत्पन्नौ पुत्रौ भवतः हिरण्याक्षः, हिरण्यकशिपुश्च। निषिद्धे सन्ध्याकाले कृतेन आधानेन तौ द्वौ दुष्टौ हिंसाशीलौ च सञ्जातौ। अतः संस्काराणामेतेषां प्राधान्यमवगम्य, तस्याचरणेन संस्कारयुक्तानां मानवानां समूहो निर्मातुं शक्यते। तेन सर्वेषां जनानां जीवनम् आनन्दमयं भवतीति शम्।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्॥

✦✦✦

## अनुशीलितग्रन्थसूची


1. कालविधानम्(व्याख्याता टि.एन्.नाणुपिल्ल आशान्), एस्.टि.रेट्टियार् एण्ड सण्स्, विद्याभिवर्धिनी पब्लिकेशन्स्, कोल्लम्, केरला, 1998
2. स्वामिपरमेश्वरानन्दः, षोडशसंस्कारङ्ङल्, विश्वहिन्दुबुक्स्, कलूर्, एरणाकुलम्, केरला, 2004
3. माधवीयम् (व्याख्याता पि.एस्.पुरुषोत्तमन् नम्पूतिरि), एस्.टि.रेट्टियार् एण्ड सण्स्, विद्याभिवर्धिनी पब्लिकेशन्स्, कोल्लम्, केरला, 1987
4. मुहूर्तपदवी (सर्वार्थबोधिनी व्याख्या), पुलियूर् पि.एस्.पुरुषोत्तमन् पोट्टि, 1911
5. मुहूर्तपदवी(व्याख्याता करालिक्कल् ए.वेलुपिल्ला), देवी बुक् स्टाल्, कोटुङ्ङल्लूर्, केरला, 2009
6. ज्योतिषनिघण्डु (वाचस्पत्यम्), ओणक्कूर् शङ्करगणकन्, करण्ट् बुक्स्, कोट्टयम्, केरला, 1999
7. रामदैवज्ञः, मुहूर्तचिन्तामणिः(व्याख्याता डा.रामचन्द्र पाठक), चौखम्भा संस्कृत संस्थान्, वाराणसी, 2001
8. वराहमिहिरः, बृहज्जातकम्(व्याख्याता केदारदत्त जोशी), मोतीलाल् बनारसीदास्, वाराणसी, 1985
9. मनुस्मृतिः(व्याख्याता सिद्धिनाथानन्दस्वामी), श्रीरामकृष्णमठम्, पुरनाट्टुकरा, तृश्शूर्, केरला, 1999

# वेदमन्त्राणां काव्यात्मना पुरुषार्थतत्त्वोपदेशः

वेङ्कटरमणो भट्टः*

## १. भूमिका

अपौरेषेयशब्दराशिलक्षणो वेदः सकलविधशास्त्रप्रभव इति सुधियामविप्रतिपन्नं मतम्। स हि इष्टप्रतिपत्त्यनिष्टनिवृत्योरलौकिकसाधनभूतः कार्याकार्यविधिप्रतिषेधात्मना प्रवृत्तिलक्षणं निवृत्तिलक्षणञ्च धर्ममधिकारभेदोपनिबन्धनतया विधत्ते। शिक्षाव्याकरणज्योतिष-मीमांसावेदान्तप्रभृतीनि शास्त्राणि वेदार्थप्रतिपत्तिसाहाय्याचरणावधीनि भवन्ति, न तु तद्बहिर्भूतार्थमुखराणि। तानि पुनः वास्तवार्थमात्रशरीराणि न तु कविभणितिवत् कल्पितार्थाभिधायीनि भवन्ति। तैरुपसेव्यमानो वेदः स्वतःप्रामाण्यप्रतिष्ठः धर्मादिमोक्षान्ततत्त्व-प्रतिपादनापरमभूमिरित्युपश्लोकितः। सोऽयं वेदः तत्त्वोपदेशे कल्पनारञ्जितार्थसुभगं कान्ता-सम्मितलक्षणं कवीनां काव्यमार्गं कामं जुषतीति परमं वास्तवं स्फूर्तमेव खलु सद्भावताम्। वचने कल्पना तु प्रतिपाद्यविषयसुग्राहणप्रयोजना। वेदवचनेष्वपि काल्पनिकार्थनिबन्धनेन प्रतिपाद्यार्थप्रतिपत्तिसौष्ठवं प्रत्यवतिष्ठते। तथाविधवचनस्थले वेदः काव्यमार्गावलम्बीति युक्तमभिधातुम्। तदिदानीं काव्यीयकल्पितार्थस्वरूपमुपवीक्ष्य वेदेऽपि तथाविधोदाहरणानि समासार्थविवृत्या वाचा प्रपञ्च्यते।

## २. काव्ये कल्पितार्थस्य स्वरूपम्

रमणीयशब्दार्थलक्षणं काव्यमिति आलङ्कारिका व्याचक्षते। रमणीयत्वञ्च काव्यानुभवकालिकः सहृदयानामनुभवसाक्षिकः चमत्कारलक्षणः सौन्दर्यापरपर्याया-नन्दानुभवविशेषः। ततः कवयो नवनवार्थोन्मेषशालिप्रज्ञालक्षणया प्रतिभया लौकिकानेवार्थान् कल्पनाकमनीयतया अलौकिकत्वेनाविष्कुर्वते। यत्किञ्चित्प्रयोजनवशादतथाभूतस्य तथाभूत-त्वेनाहरणं कल्पना नाम भवति। कल्पितार्थोऽपि आहार्य एव। अतः कल्पने वास्तविकार्थः न दुष्यति अपि तु अलं पुष्यति। न खलु कल्पनं नाम गगनकुसुममालाधारी पुरुषः शशशृङ्गनिर्मितेन त्रिचरणेनाश्वेन सञ्चरतीत्यादिवत् उत्प्रेक्षामात्रजल्पितं प्रतिपादनम्। अस्ति तत्र वास्तवार्थसुष्ठुप्रतिपत्त्यैकविश्रान्तिधामत्वम्। समुचितकल्पनाविशिष्टः अर्थः काल्पनिकोऽपि वास्तवे पर्यवस्यति। तथाविधवाक्यप्रयोगेण श्रोतारो वक्तृविवक्षां हृद्यतयाऽ-कलयन्ति। तस्माद् गङ्गायां घोषः, मञ्चाः क्रोशन्ति, अग्निर्माणवकः, मुखं चन्द्रः,

---

*अध्यापकः, संस्कृतविभागस्य, रामकृष्ण-मिशन्-विवेकानन्दविश्वविद्यालयस्य, पश्चिमवङ्गेषु हावडामण्डलस्थस्य बेलुरमठस्थस्य

स्मितज्योत्स्ना, पादकमलम्, वचनामृतम् इत्यदयो वा मूर्खे मनुष्येऽपि गर्दभोऽयमिति, शूरे सिंहोऽयम् इत्येवमादयः सहस्रशः प्रयोगाः शास्त्रे काव्ये व्यवहारे च कामं प्रथन्ते कल्पितार्थोच्छ्वासिभिः यैः हृदयङ्गमतया विवक्षितार्थप्रतिपत्तिः अनुभववेद्या। यथा शूरोऽयमिति वास्तवार्थकवाक्यापेक्षया सिंहोऽयमिति कल्पितार्थपरामृष्टं वाक्यं स्वदतेतराम्। तथा स्वदमानतया प्रतिपादनीयार्थहृदयङ्गमतानिष्पादका एतादृशा वाक्यप्रयोगाः कामम् उपादेया भवन्ति। ते च लाक्षणिकाः गौणा इति शास्त्रविदुष आतिष्ठन्ते। किन्तु काव्यमार्गीयकल्पितार्था न लक्षणामात्रोपलीढा वाच्यव्यङ्ग्यरूपेणाऽपि तेषां कामं घटमानत्वात्।

एतादृशकाव्यमार्गोपजीविनः तत्त्वोपदेशकाः वेदमन्त्राः सहस्रश उपलभ्यन्ते। अत्र तत्त्वं नाम प्राधान्येन प्रसिद्ध्या च वेदान्तविचार इति मोक्षपुरुषार्थः मुख्यतया विवक्ष्यते। धर्मादिपुरुषार्थत्रयप्रतिपादकमन्त्रापेक्षया मोक्षप्रतिपादकमन्त्राणां काव्यमार्गोपजुष्टत्वस्य दर्शनेन काव्यस्यापि पुरुषार्थोपदेशकतां लोकः अलमभ्युपगच्छेदिति तत्र प्रवरीवृतीमः। ततः तत्त्वोपदेशकमन्त्राणां कतिपयान्युदाहरणानि उपस्थाप्यन्ते।

१. अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्॥[1]

ऋग्वेदप्रथममन्त्रोऽयम् अग्निदेवतास्तुतिलक्षणः काव्यमार्गानुयायी। अत्र रत्नधातमम् इति अग्नेः विशेषणम्। रत्नपदस्य यज्ञफलरूपार्थः व्याख्यायते। तथा चऽह तत्रभवान् सायणः "रत्नधातमम् यागफलरूपरत्नानाम् अतिशयेन धारयितारं पोषयितारं वे"ति। अर्थात् अनर्घत्व-आह्लादकत्वादिसाधरणधर्मवशात् रत्न-यागफलानाम् अभेदमध्यवस्य रत्नपदेन यागफलानि विविक्षाविषयीकृतानीति प्रतिपत्तव्यम्। अनर्घत्व-आह्लादकत्वादिसादृश्यदर्शनेन रत्न-यागफलानामभेदाध्यवसायः रमणीया कल्पनैव न वस्तुस्थितिः। तथा कल्पनादेव यागफलानाम् उपायदेयत्व-सुखमयत्व-श्रमोपार्जनीयत्वादयोऽन्ये विषया व्यञ्जनाव्यापार-प्रतिपन्नाः स्फुरन्तः प्रतिपाद्यार्थस्य हृदयङ्गमतां निष्पादयन्ति। तदेवम् ऋग्वेदप्रथममन्त्र एव काव्यमार्गपरिणतो दृश्यते।

२. यथा सम्पुष्पितस्य वृक्षस्य दूराद् गन्धो वात्येवं
पुण्यस्य कर्मणो दूराद्गन्धो वाति॥[2]

अत्र पुण्यकर्मणः प्रशंसनाय पुष्पितवृक्षोपमा पर्यग्राहि। अलं पुष्पितस्य वृक्षस्य तत्पुष्पपरिमलः यथा सुदूरं प्रसरति तथा पुण्यकर्मणः सत्प्रभावोऽपि सर्वत्र व्याप्नोतीति उपमालङ्कारघटनया वाक्यभङ्गी पर्यकल्पि। वस्तुतः सत्कर्मणः प्रभावप्रसरः

[1]ऋग्वेदः १/१/१

[2]तै.आ.६/८/६

पुष्पितवृक्षगन्धप्रसरश्च भिन्नावेव। अथापि सत्परिणामशालिता-लोकाह्लादकत्वादि-साधारणधर्मनिबन्धनं सादृश्यं परिभाव्य पुष्पितवृक्ष-सत्कर्मणोरुपमानोपमेयभावाविष्कारेण वचोविन्यास उपमालङ्कारहृद्यः सन् अभिधित्सितमर्थं सुष्ठु ग्राहयति। अस्य मन्त्रस्य काव्यलक्षणं को नु प्रत्याख्यातुमीष्टे।

३. हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये॥[3]

अत्र पूषाणं प्रति आदित्यान्तर्गतब्रह्मादिजिगमिषया प्रार्थना क्रियते। आदित्यमण्डले सत्यलक्षणं ब्रह्म वरीवर्ति। तच्च मण्डलम् आदित्यस्य महाज्योतिषा समावृतं भवति। अतः सत्यमपि तेन समावृतं स्यादेव। तदादित्यमण्डलतेजोराशिः हिरण्मयं पात्रमिति पर्यकल्पि रोरुच्यमानत्व-आवारकत्वादिसादृश्यनिबन्धनादभेदाध्यवसायात्। अन्यथा कथं नु सत्यस्य मुखं पिधीयेत? कथं सूर्यज्योतिः कनकलोहभाजनं स्यात्? सादृश्यतन्त्रतया अभेदकल्पनासमारोपे सत्यस्य मुखवत्त्वं सूर्यज्योतिषः हिरण्मयपात्रत्वञ्च कामं सिद्ध्यति येन विवक्षितार्थः परं पुष्यति। इदञ्च साध्यावसानलक्षणापरिग्रहात् उपमानवाचकहिरण्मय-पात्रशब्देन उपमेयस्य ज्योतीराशेः निगीर्णत्वात् अतिशयोक्त्यलङ्कारोल्लासेन अर्थस्य श्रोतृहृदयङ्गमत्वमिति मन्त्रोऽयं निश्चप्रचं काव्यमार्गानुरणनेन तत्त्वप्रतिपादक इति स्थितिः।

४. द्वा सुपर्णा सयुजा सखायौ
समानं वृक्षं परिषस्वजाते।
तयोरेकः पिप्पलं स्वाद्वत्ति
अनश्नन्नन्यो अभिचाकशीति॥[4]

अत्र सामग्र्येण काव्यपद्धतिः प्रफुल्ला विषयिणा विषयस्य निगरणात्। जीवात्म-परमात्मानौ इति वक्तव्ये सहावस्थायिनौ पक्षिणाविति, शरीरमिति वक्तव्ये वृक्ष इति, कर्मफलमिति वक्तव्ये पिप्पलमिति, कर्मफलभोग इति वक्तव्ये अदनमिति, तदभोग इति वक्तव्ये अनश्नन्निति तत्तदवाचकपदैरपि सादृश्यनिबन्धनाभेदाध्यवसायकल्पनात्तत्तदर्थवाचकीकृतैः सुपर्णवृक्षादिपदैः उपमानभूतैः जीवात्मपरमात्मशरीरादीनां प्रतिपादनीयार्थानां प्रतिपत्तिः व्यवतिष्ठते। ईदृशे साध्यावसानलक्षणोल्लासितातिशयोक्तिस्थले उपमानवाचकपदजन्य-शक्यतावच्छेदकप्रकारकलक्ष्यविशेष्यकशाब्दबोध इति नयात् असुपर्णादीनां जीवात्मपरमात्म-शरीरादीनां सुपर्णादिपदैः प्रतिपत्तिः उपपद्यते। अतः मन्त्रोऽयम् आलोचनामृतकाव्यायमानः जीवात्मपरमात्मनोः बद्धत्वमुक्तत्त्वादिस्वरूपं हृदयङ्गमतया संवेदयति।

[3]ई.उ. १५
[4]श्वे.उ ४/६

५. पश्य देवस्य काव्यं न ममार न जीर्यति।[5]

अत्र विषयः जगत्। तस्मिन् प्रतिपादनीये तद्वाचकमनुपादाय रमणीयत्व-आनन्दरस-गर्भत्वादिसाधारणधर्मोत्थसादृश्यतन्त्रतया जगत्काव्ययोरभेदमाहार्यमध्यवस्य तयोरैक्यं संसाध्य काव्यपदेन जगदभिप्रेयते। एवञ्च जगद् देवस्य काव्यमिति तु आनन्दगर्भित्व-अनन्तवैचित्र्यशालित्वादिनानार्थव्यञ्जनवती परमोदाररमणीया कल्पनैवेति मन्त्रोऽयं काव्यमार्गघनाकृतिः प्रत्यवतिष्ठते।

६.आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च॥
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥[6]

अत्र ब्रह्माधिगमोपाये अभिधेये कल्पितकाव्यकमनीयसरणिरुपाहिता। तत आत्मा रथीति, शरीरं रथ इति, बुद्धिः सारथिरिति, मनः प्रग्रह इति, इन्द्रियाणि वाजिन इति उभयेषाम् उपमानोपमेयभावपरिकल्पनया शब्दान्निश्चीयमानः अभेदो रूपकालङ्कारलक्षणः समुल्लसति। अभेदे तु सादृश्यं ध्वन्यते। न खलु वस्तुत आत्मा रथी भवेत्, नापि शरीरं रथः, बुद्ध्यादयः सारथ्यादयो वा। तेषामाहार्याभेदकल्पने तु आत्मादीनां रथ्याद्यभेदः शक्यग्रहणः। अत्र विद्याऽविद्ययोरधिकृतो मोक्षगमनाय संसारगमनाय च तस्य तदुभयगमने साधनं रथः कल्प्यत इति भाष्ये ब्रुवाणाः शङ्करभगवत्पादाः मन्त्रार्थस्य कल्पितत्वं व्याचचक्षिरे। समानन्यायेन एतादृशे स्थले सर्वत्र कल्पितत्वं भगवत्पादाभिमतमिति प्रतिपत्तौ न कश्चिद्विपश्चिद्विप्रतिपद्येत। एवञ्च अभीष्टस्थानगमनादिसाधारणधर्मकृतशरीररथाद्यभेदपरिकल्पनान्मन्त्रोऽयं काव्यमार्ग-मुखर इति प्रतीयते।

७. धनुर्गृहीत्वौपनिषदं महास्त्रं
शरं ह्युपासानिशितं सन्धयीय।
आयम्य तद्भावगतेन चेतसा
लक्ष्यं तदेवाक्षरं विद्धि॥
प्रणवो धनुश्शरो ह्यात्मा
ब्रह्म तल्लक्ष्यमुच्यते।
अप्रमत्तेन वेद्धव्यं
शरवत्तन्मयो भवेत्॥[7]

---
[5]अ.वे. १०/८
[6]क.उ. १/३/३-४
[7]मु.उ. २/२/३-४

अत्र प्रणवोपासनाविधिना ब्रह्मप्राप्त्यनुष्ठानरीतिः प्रस्तूयते। तदर्थमुपेयं ब्रह्म बाणवेद्धव्यं लक्ष्यमिति निरिरूपयिषितम्। अतः प्रणवः धनुः, आत्मा शरः, ब्रह्म लक्ष्यमिति प्रणवधनुरादीनाम् अभेदाध्यवसायकल्पनया वचनं दृश्यते। प्रथममन्त्रे अतिशयोक्त्यलङ्काराश्रयणेन धनुराद्युपमानवाचकैरेव प्रणवाद्युपमेयानां प्रतिपत्तिः। द्वितीयमन्त्रे ततोऽपि स्फुटप्रतिपत्तये प्रणवधनुष्ट्वादिप्रतिपादनेन रूपकालङ्कारक्रमेण वचनम्। ततो मन्त्रोऽयं रमणीयसमुचितकाल्पनिकार्थप्राणित एव। अतः काव्यत्वोन्मेषः।

८.तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद
नान्तरमेवमेवाऽयं पुरुषः प्रज्ञानेनात्मना सम्परिष्वक्तो
न बाह्यं किञ्चन वेद नान्तरम्।[8]

आनन्दघनेन ब्रह्मणा तादात्म्यं प्रतिपद्य बाह्याभ्यन्तरभावनाविगलनमुपेयुषो भावं हृदयङ्गमतया ग्राहयितुं प्रियकान्तापरिष्वङ्गविगलितबाह्याभ्यन्तरस्थौल्यकार्श्यसुखित्वदुःखित्वादि-भावो जन उपमानतया उपाहितः। तत उपमेयतया प्रतिपाद्यस्य ब्रह्मपरिष्वङ्गविगलित-बाह्याभ्यन्तरभावस्य स्वरूपं चारुस्फुरणं भवति। एवं मन्त्रोऽयं ब्रह्मानुभूतिदशाप्रतिपादकोऽपि उपमालङ्कारझङ्कृतः श्रृङ्गारभावपरिमलितः काव्यमार्गोच्छ्वासी पर्यवतिष्ठते इति सुवेद्यम्।

९.अहं वृक्षस्य रेरिवा कीर्तिः पृष्ठं गिरेरिव।
ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि।[9]

अत्र त्रिशङ्कुदर्शनात्मके मन्त्रे अमृतात्मभूतः त्रिशङ्कुः जगाद संसारस्य प्रेरयिता अहमिति विषये वक्तव्ये वृक्षस्य रेरिवा अहमिति विषयिवाचकपदेन विषयं लक्षयति वृक्षसंसारयो उच्छेद्यत्वादिसादृश्यनिबन्धनाभेदाध्यवसायनिगरणेन। अपि च तस्य ख्यातिः गिरेः पृष्ठमिव समुन्नता इत्युपमालङ्कारेण चारुता, ततः अर्थसौभगञ्च निरपादि। एवञ्च अतिशयोक्ति-उपमालङ्काररविचन्द्रविद्योदितोऽयं मन्त्रः काव्यमार्गमुखरः।

१०. यथा नद्यस्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्॥[10]

अत्र आत्मविदुषः अनानाभावो विषयः। स च उपमालङ्कारपरिग्रहेण सुग्रहीकृतः। उपमेयभूतस्य आत्मविदः परमपुरुषस्य च क्रमश उपमानभूतौ नदीसमुद्रौ। नदी समुद्रं प्रविष्टा निजनामरूपरहिता समुद्रैकलक्षणा यथा भवति तथा परब्रह्मानुभवी आत्मा अविद्याकृतनाम-रूपोपाधिपरिक्षयात् ब्रह्मैव भवतीति भावार्थः। तस्मात् मन्त्रोऽयं रमणीयकाव्यलक्षण

[8]बृ.उ. ४/३/२१
[9]तै.उ. ३/२/१
[10]मु.उ. ३/२/८

इत्यवगम्यत इति दिक्।

## ३. उपसंहारः

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिषेवणम्॥[11]

इति भामहवचनानुसारं काव्यं पुरुषार्थविषयकव्युत्पत्त्याधायकमिति प्रथितमेतदालङ्कारिकसमये। तत्र पुरुषार्थप्रतिपत्तिमूलमार्गभूतानि वेदशास्त्राणि वास्तवार्थप्रतिपादनद्वारा उपदेशकानि भवन्ति। काव्यं तावत् समुचितरमणीयकल्पितार्थोपन्यासपूर्वकं वास्तवार्थाभिव्यञ्जनविश्रान्तिधामभिर्वचनैः पुरुषार्थबोधप्रतिपत्तिमादधाति। विषयोऽयं वेदः प्रभुसम्मितः काव्यं कान्तासम्मितमिति प्रकाशकारादिपूर्वालङ्कारिकसन्दर्भपरम्परायां प्रथते इति सर्वविदितमेव। अत्र काव्यं कल्पितार्थपरिकलितमिति तस्य यत्किञ्चित्पुरुषार्थबोधकत्वं निराकुर्वतां वस्तुतत्त्वज्ञापनाय स्वतःप्रमाणतया सकलशास्त्रमौलिभूतो वेद एव काव्यात्मना तत्त्वोपदेशं विधत्ते इति वेदोपनिषदाम् अग्निमीळे पुरोहितम्, हिरण्मयेन पात्रेण इत्येवमादीनि उदाहरणानि स्थालीपुलाकन्यायेन विचित्य उपस्थापितानि। तेषूदाहरणेषु काव्यात्मकमन्त्राणामर्थप्रतिपत्तिसौष्ठवं तदितरमन्त्रैः न भवतीत्यनुभूयते। यथा ब्रह्म वेद ब्रह्मैव भवतीति वचनापेक्षया यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय तथा विद्वान् इति वचनेन नदीसमुद्रौपम्येन कल्पनानिबन्धनाज्जीवब्रह्मतादात्म्यभावावगमनसौष्ठवं श्रोतृहृदयसंवेद्यम्।

एवञ्च समुचितकल्पनाभिः वास्तवार्थप्रतिपत्तिः वेदेन आधीयते चेत् कल्पितार्थसङ्घटनेन वस्तुस्थितिः शक्याभिधाना इति वेदप्रमाणितमेव भवति। एतन्नयेन काल्पनिकार्थरमणीयकाव्यमार्गः पुरुषार्थव्युत्पत्तौ अलं साधनमिति दिक्।

✦ ✦ ✦

[11]काव्यालङ्कारः १/२

# गणेशस्तोत्राणां रसग्रहणम्

पराग जोशी*

## १. भूमिका

खर्वं स्थूलतनुं गजेन्द्रवदनं लम्बोदरं सुन्दरं
प्रस्यन्दन्मदगन्धलुब्धमधुपव्यालोलगण्डस्थलम्।
दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरं
वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम्॥

प्रपञ्चस्य सर्वेष्वऽपि धर्मेषु ईशस्तवनं तस्य महिमागानं च उपासनाया एकम् अविभाज्यमङ्गमिति स्मर्यते। अनादिकालात् नैके भक्ताः, साधकाः, उपासकाश्च ईश्वरप्रेम्णि लग्नमनस्काः, तल्लीनतया, उत्कटया अन्तःप्रेरणया प्रचोदिता विविधस्तोत्रैरीश्वरस्य भावपूर्णं गुणगानं कुर्वन्ति, आकुलाः प्रार्थनाः उपस्थापयन्ति तथा ईशसम्मुखम् आत्मनो हृदयस्य व्यथाम् आर्तिं च निवेदयन्ति। एतै रचितानि स्तोत्राणि तत्समकालीनेभ्यः परवर्तिभ्यश्च मानवेभ्यः चित्तप्रशान्तये, विमलानन्दप्राप्तये, तथा आध्यात्मिकोन्नतये साधनरूपाणि सन्ति। एतादृशस्तोत्रवाङ्मयः सर्वासु भाषासु प्रचुरतया प्राप्यते तथापि संस्कृतवाङ्मये नूनं विद्यते स्तोत्राणां किञ्चित् स्वतन्त्रं स्थानं महत्त्वञ्च।

स्तूयते अनेन इति स्तोत्रम् इति निर्वचनात् ज्ञायते यत् स्तुतिपरं वचः नाम स्तोत्रम्। महाकवेः कालिदासस्य “स्तोत्रं कस्य न तुष्टये” इति वचनानुसारं स्फुटमस्ति यत् प्रपञ्चे न कोऽपि जीवः वर्तते यः स्तुत्या तुष्टः न भवति इति। इयं स्तवनपरम्परा वेदकालादारभ्य निरन्तरं प्रवहन्ती भक्तान् देवान् च आर्द्रयति स्वरसबलेन। वेदेषु स्तुतयः सूक्तनाम्ना प्रसिद्धा आसन्। तत्र सूक्तेषु अध्यात्मभावः प्रतिपाद्यते स्म। क्वचित् आयुः-आरोग्यं-बलं-धनधान्यादिसुखसमृद्धये याचनाः क्रियन्ते स्म। कुत्रचित् सूक्तेषु ईश्वरस्य स्तुतिः वर्तते। एवं प्रेयश्रेय-अभ्युदयप्राप्तिः, निःश्रेयसप्राप्तिः च प्रार्थ्यते स्म। तदनु पौराणिककाले स्तोत्रेषु विविधता समागता। पौराणिकवाङ्मये स्तोत्रेषु गेयता, छन्दोबद्धता, सुकुमारशैल्याः च विकासः दृश्यते। एकश्लोकात्मकस्तोत्रम्, ध्यानस्तोत्रम्, प्रणामस्तोत्रादेः आरभ्य पञ्चकम्, अष्टकम्, दशकम् इत्यादि प्रकाराः उदयमागताः। पौराणिककाले स्तोत्रेषु भौतिकसमृद्ध्यपेक्षया आत्मकल्याणस्य भावः अधिकतया दृश्यते। विशिष्टदेवतासम्बन्धिस्तोत्रेषु तस्या देवतायाः स्वरूपं, गुणमहिमा, लीलावर्णनं च कृतं दृश्यते। देवतायाः कृपाप्रसादस्य प्रार्थना च दृश्यते।

---

*सहायकाचार्यः, कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य, महाराष्ट्रेषु रामटेकस्थस्य

साधकमहापुरूषैः विरचितानि स्तोत्राणि। अतः रचयितुः आध्यात्मिकव्यक्तित्त्वस्य, तस्य महापुरूषस्य साधनाया अनुभूतेश्च शक्तिः स्तोत्रेषु अन्तर्निहिता भवति येन च पाठकानां श्रोतृणां हृदये अनुकूला भावाः संक्रमन्ति। एतादृशभावसञ्चारस्य सामर्थ्यं स्तोत्रेषु भवति। अतः स्तोत्राणां पठनं श्रवणं वा चित्तस्य शान्तये, मनसः प्रसन्नतायै, पावनतायै च एकः अमोघः उपायः। शास्त्रेषु वर्णितासु कायिक-वाचिक-मानसिकोपासनासु वाचिकोपासनायां जप एवं स्तोत्रपाठः अन्तर्भवति। जप इव स्तोत्रपाठोऽपि आध्यात्मिकोन्नतेः सुलभः तथा सुनिश्चितः मार्गः। ननु उच्यते खलु "कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यात्!" इति। अत्रोक्तकथनानुसारम् आध्यात्मिकोन्नतये विद्यमानेषु अन्यमार्गेष्वऽपि भक्तेः मुक्तेश्च अयं सरलः सुनियोजितः पन्थाः केन वा न पथीक्रियेत!

पिनाकिनः प्रसादात् सर्वकार्येषु सर्वपूजासु आद्यस्थानं सम्प्राप्य गणाधीशः लम्बोदरः भजति प्रथमस्थानं सर्वत्र। स्तोत्रेष्वऽपि एवमेव आद्यत्वेन स्तुतः वक्रतुण्डः असीमकृपाकटाक्षेण तरति भक्तान् दुःखसागरात्। अत एव विघ्नहर्ता विघ्ननाशकः, निवारक इति सर्वकार्याणाम् आदौ गणेशं पूजयन्ति। स्वीकृते कार्ये सम्भूयमानान् विघ्नान् नाशयतु सः इति प्रार्थयन्ति। यथा

वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ।
निर्विघ्नं कुरू मे देव सर्वकार्येषु सर्वदा॥

इत्ययं श्लोकस्तु आबालवृद्धं नित्यं गायन्ति। एवमेव कृष्णपिङ्गाक्षस्य नैकानि स्तोत्राणि भूरिश उपलभ्यन्ते संस्कृतभाषायाम्। गणाधिपस्य स्तोत्रसङ्ख्याऽपि अस्य विशालकाय इव सुविशाला वर्तते। तत्रादौ वेदेषु कृता गणाधीशस्य स्तुतयः किञ्चिदालोडयामः।

न केवलं भारतीयेभ्यः अपि तु सर्वेषां कृते प्राचीनतमो वाङ्मयो विद्यते वेदः। वेदप्रामाण्येन एव भारतस्य आध्यात्मिकप्रपञ्चः सुस्थिरः वर्तते अचलवत्। अनादिकालात् आगतेऽस्मिन् वेदे "गणानां त्वा गणपतिं हवामहे" इति मन्त्रेण सर्वप्रथमं शूर्पकर्णस्य स्तवनं कृतं वर्तते। एवं वेदकाले हेरम्बस्य स्तोत्राणि भूरिश आसन् यत्र जनमनसि विद्यमानं, सर्वैः सुविज्ञातं स्तोत्रमस्ति गणपत्यथर्वशीर्षम्। एतस्य स्तवनस्य रसग्रहणात् प्राग् ईषद् रसग्रहणं नाम किमिति अवलोकयामः।

रसस्य ग्रहणम् रसग्रहणम् इति। को नाम रस इति चेद् अत्र साहित्ये काव्यतत्त्वविद्भिः कृता रसव्याख्या न तथा प्रासङ्गिकताम् आवहति यथा उपनिषत्सु कृता रसव्याख्या स्तोत्राणां रसग्रहणे प्रासङ्गिकतां वहति इति मे मतिः। वदति खलु भगवती श्रुतिः " रसो वै सः। रसं ह्येवायं लब्ध्वा आनन्दी भवति" इति।

भाष्ये च शङ्कराचार्यैः अपि एतदेव प्रतिपादितं यत् तस्य निर्गुणात्मकस्य, निराकारस्य, परमात्मनः यथार्थस्वरूपम् एव रसः। स इति पदेन अत्र ब्रह्मणः स्वरूपज्ञानमेव बुध्यते तच्च ग्रहणीयम्। उक्तञ्च साहित्यदर्पणे आचार्यविश्वनाथेन

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥

अस्य रसस्य ब्रह्मानन्दसहोदरः इति निर्वचनं तेन कृतम्। एतादृशस्य रसस्य वर्णनं 'गणपत्यर्थवशीर्षे' स्फुटतया कृतम् अस्ति। आरम्भे एव तत्र प्रोक्तं-

नमस्ते गणपतये। त्वमेव प्रत्यक्षं तत्त्वमसि। त्वमेव केवलं कर्तासि। त्वमेव केवलं धर्तासि। त्वमेव केवलं हर्तासि। त्वमेव सर्वं खल्विदं ब्रह्मासि। त्वं साक्षादात्मासि नित्यम्।

एवं श्रुत्यनुसारं प्रोक्तस्य रसस्य उपस्थानमत्र दृश्यते। अत्र च गणेशः परमात्मनः स्वरूपेण उपस्थापनम्। न केवलं स्वरूपोपस्थानम् अथवा गुणमहिमावर्णनमत्र कृतमपि तु करुणापरतया याचनाऽपि कृता यत् लम्बोदरः न केवलं माम् एव अवतु अपि तु, स वक्तारं, श्रोतारं, दातारं, अनूचानं, शिष्यं, सर्वान् रक्षतु इति। यथा-" अव त्वं माम्। अव वक्तारम्। अव श्रोतारम्। अव दातारम्। अव धातारम्। अवानूचानम्। अव शिष्यम्।" इति। विस्मयप्रकाशकः त्वम् अद्भुतः असि, आश्चर्यकारकः वर्तसे, अयम् एकदन्तः प्रपञ्चस्य अणुरेणोः आरभ्य सर्वत्र चकास्ति इति। यदुक्तं तत्रैव- "त्वं वाङ्मयस्त्वं चिन्मयः। त्वमानन्दमयस्त्वं ब्रह्ममयः। त्वं सच्चिदानन्दाद्वितीयोऽसि। त्वं प्रत्यक्षं ब्रह्मासि...।" इति। ज्ञानमयत्वेन विज्ञानमयत्वेन वर्णितः गजवक्त्रः अद्भुतरसं नूनं प्रवाहयति भक्तानां मनसि स्वलीलया। सृष्टिस्वरूपानुगुणं कृतं गौरीपुत्रस्य वर्णनं विस्मयं जनयति पाठकमनस्सु। यथा दृश्यते अत्र- "त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः स्वरोम्।"

अत्र जल-वह्नि-चन्द्र-सूर्य-आकाश-पृथ्वीरूपेण, ब्रह्मादिभगवतः रूपेण च युक्तः सर्वप्रसिद्धः प्रत्यक्षमनुभूयमानमाहात्म्यातिशयः भगवान् व्रातपतिः सर्वेभ्यः भद्रं वितरत्विति भावः प्रकाशितः।

संस्कृतस्तोत्रसाहित्ये आद्यश्रीशङ्कराचार्याणां स्थानं तु अद्वितीयमिति निश्चप्रचम्। आचार्याणाम् उदात्तभावयुक्ता, हृदयस्पर्शिनी, ललिता च वाणी पुष्णाति स्तोत्रसौन्दर्यम्। आचार्याणां स्तोत्रेषु भावानां तथा अर्थस्य गाम्भीर्येण सह प्रसादस्य, श्रुतिमाधुर्यस्य, शब्दलालित्यस्य च गुम्फनं स्तोत्रस्य गरिमाणं वर्धयति, द्रावयति च चित्तं भक्तानाम्। आचार्यैः विरचिते 'गणेशपञ्चरत्नम्' इति स्तोत्रेऽपि तादृशी वाणी विलासयति भगवतः विघ्नराजेन्द्रस्य वैभवम्। यथा

मुदा करात्तमोदकं सदा विमुक्तिसाधकं
कलाधरावतंसकं विलासिलोकरक्षकम्।
अनायकैकनायकं विनाशितेभदैत्यकं
नताशुभाशुनाशकं नमामि तं विनायकम्॥

हस्ते आनन्देन मोदकं दधानं साधकेभ्यः मोक्षप्रदायिनं, मस्तके इन्दुकलां बिभ्राणं, भक्तिरसे विलीनानां रक्षकम्, अनाथानां नाथं, दैत्यसंहारकं, चरणे नतानाम् अशुभनाशकं तं रक्तपुष्पैः सुपूजितं, चतुर्हस्तं, भक्तानुकम्पिनं विनायकं नमामि। अत्रैव पुनः उक्तम्

अकिञ्चनार्तिमार्जनं चिरन्तनोक्तिभाजनं
पुरारिपूर्वनन्दनं सुरारिगर्वचर्वणम्।
प्रपञ्चनाशभीषणं धनञ्जयादिभूषणं
कपोलदानवारणं भजे पुराणवारणम्॥

निर्धनभक्तानाम् आर्तिनिवारकं, वेदवचनेन यत्स्वरूपं ज्ञायते तं, त्रिनेत्रस्य आद्यपुत्रं, दैत्यगर्वाऽपहारकं, देवतानां विभूषकं, आद्यतत्त्वं वक्रतुण्डं नौमि। पुनश्च उच्यते अत्रैव

कृपाकरं क्षमाकरं मुदाकरं यशस्करं
मनस्करं नमस्कृतां नमस्करोमि भास्वरम्॥

अर्थात् तत्त्वतः ब्रह्मस्वरूपं, दयाभावपूर्णं, क्षमावन्तं, प्रेमयुक्तं यशोदायकं, यद्वन्दनेन मनः शुध्यति तं तेजस्विविनायकं भजामि इति।

अत्र 'गणेशपञ्चरत्नम्' इति स्तोत्रे सर्वत्रापि साहित्ये विद्यमानात् श्रृङ्गारादिनवरसाद् भिन्नः ऐहिकपारत्रिकसाधकः, अध्यात्मक्षेत्रे अमलभक्तेः साधनरूपः भक्तिरसः आमूलाग्रतया आप्लावितः दृश्यते। भगवतः विनायकस्य गुणमाहात्म्यवर्णनपुरस्सरं साधकः अत्र गणाध्यक्षस्य स्वरूपं, तस्य गुणमहिमानं, तस्य लीलाः च वर्णयित्वा तस्य कृपायै, प्रसन्नतायै च प्रार्थनां करोति।

आचार्याणाम् अपरं गणेशभुजङ्गम् इति गणेशस्तोत्रं प्रसिद्धमस्ति। अस्मिन् स्तोत्रे तेषां ह्लादैकमयी अनन्यपरतन्त्रा वाक् शब्दलालित्येन सह सङ्गमयति भावसौन्दर्यम्। यथा

यमेकाक्षरं निर्मलं निर्विकल्पं
गुणातीतमानन्दमाकारशून्यम्।
परं पारमोङ्कारमाम्नायगर्भं
वदन्ति प्रगल्भं पुराणं तमीडे॥

तस्य वाचक प्रणवः[1] इत्यनुसारं ॐकारस्वरूपम् एकाक्षरं तं गौरीनन्दनम्, अविद्यामलरहितं, भेदशून्यत्वात् निर्विकल्पं, त्रिगुणातीतम्, आनन्दमयं, निराकारं, व्यापकं, पुराणकारसम्प्रदाये सुवर्णितं, प्रौढं पुरातनञ्च गजेश्वरं स्तौमि इति। एवमेव

चिदानन्दसान्द्राय शान्ताय तुभ्यं
नमो विश्वकर्त्रे च हर्त्रे च तुभ्यम्।
नमोऽनन्तलीलाय कैवल्यभासे
नमो विश्वबीज प्रसीदेशसूनो॥

अर्थात् सद्घनं, चिद्घनं तथा आनन्दघनं, शान्तं, विश्वोत्पत्तिविनाशकारकं त्वां

[1]यो.सू.

नमामि। तव लीलाया जालं न केनापि ज्ञायते, मोक्षः, त्वत्स्वरूपे एव प्रत्यवभासते, विश्वस्य बीजरूपः त्वमसि, तुभ्यं शिवनन्दनाय नमः, प्रसीद त्वम्, प्रसन्नो भव इति।

अत्र स्तोत्रे दार्शनिकसिद्धान्तानां, भावानाञ्च प्राचुर्यं दृश्यते। त्वत्त एव सर्वं तस्मात् तव दर्शनेन, कृपाकटाक्षेण, अनुकम्पया च मां भवसागरात् तारय इति साधकः कातरो भूत्वा भक्तवत्सलं तम् अन्तकान्तकात्मजं प्रार्थयति। अर्थगभीरतया, लालित्येन च साधनोपयोगि उपदेशपरकं स्तोत्रम् इदम् अद्भुत-करुणरसाभ्यां सह भक्तिरसस्य प्रवाहं प्रसारयाति भक्तानां मनसि।

श्रीगणेशाष्टकम् इति नाम्ना प्रसिद्धमपरं स्तोत्रम्। स्तोत्रेऽस्मिन् अद्वैतस्य, दार्शनिकतत्त्वानां, भक्तेश्च अपूर्वः समुच्चयः प्रकाशितः। अत्यन्तं सरलया रीत्या रचितमिदं स्तोत्रं गणेशानस्य अनुपमताम्, अनन्वितां च प्रदर्शयति। यथा

यतोऽनन्तशक्तेरनन्ताश्च जीवा
यतो निर्गुणादप्रमेयो गुणास्ते।
यतो भाति सर्वं त्रिधा भेदभिन्नं
सदा तं गणेशं नमामो भजामः॥

एवम्

यतो बुद्धिरज्ञाननाशो मुमुक्षो-
र्यतः सम्पदो भक्तसन्तोषिकाः स्युः।
यतो विघ्ननाशो यतः कार्यसिद्धिः
सदा तं गणेशं नमामो भजामः॥

अपि च

यतो वेदवाचो विकुण्ठा मनोभिः
सदा नेति नेतीति यत्त्वा गृणन्ति।
परब्रह्मरूपं चिदानन्दभूतं
सदा तं गणशं नमामो भजामः॥

अस्मिन् स्तोत्रे अनन्तशक्तेः, निर्गुणस्य, अप्रमेयस्य, गजवक्त्रस्य विश्वव्यापकरूपं वर्णितं विद्यते। अस्माद् धूम्रवर्णादेव निखिलं जगद् आविर्भूतं, अस्मादेव बुद्धिः, अज्ञानस्य नाशः, अविद्याया निवारणपुरस्सरं मोक्षप्राप्तिः, अस्मात् च भक्तानां सन्तोषः। इत एव सङ्कटनाशः, कार्यसिद्धिः अतः तं गणेशं भजामः यतः अयं भालचन्द्र एव चिदानन्दस्य परब्रह्मरूपं तत्त्वं विद्यते, यतः वेदवाचः विकुण्ठा मनोभिः नित्यं नेति नेति इति गृणन्ति, तादृशाय गणनायकाय अत्र स्तोत्रे मुमुक्षुः कश्चित् साधकः स्वीयं सङ्कुचितबन्धनमयं, निःस्सारं जीवनमिदमिति विज्ञाय प्रपञ्चस्य क्षणिकसुखानां व्यर्थतां ज्ञात्वा, स्वकीयाम् असमर्थतां च जानन् व्याकुलतापूर्वकं भगवते कलाधरावतंसकाय विनायकाय मुक्तिं याचते। तव दर्शनेन नूनं मोक्षं लभेयेति सुष्ठु अवधार्य गणपतेः अनुकम्पाप्राप्तये, अहैतुककृपाप्राप्तये, च

तन्मयो भूत्वा वैराग्याद्याध्यात्मिकसम्पद्भिः स्वजीवनं धन्यं कर्तुं प्रार्थनां करोति। प्रसादगुणयुतं वैदर्भीशैलीमनुसृत्य रचितमिदं स्तोत्रम् अनायासेन भावानां प्रसारणं करोति।

श्रीगणपतिस्तोत्रम् इति नाम्ना प्रसिद्धे सुविशाले स्तोत्रे स्थुलतनोः महन्महत्त्वम्, आद्यत्वं, सर्वदेवभूषकत्वं, श्रेष्ठत्वं च वर्णितमस्ति। यथा

जेतुं यस्त्रिपुरं हरेण हरिणा व्याजाद्बलिं बद्ध्नता
स्त्रष्टुं वारिभवोद्भवेन भुवनं शेषेण धर्तुं धराम्।
पार्वत्या महिषासुरप्रमथने सिद्धाधिपैः सिद्धये
ध्यातः पञ्चशरेण विश्वजितये पायात्स नागाननः॥

त्रिपुरासुरं जेतुं शिवेन, बलिं व्याजेन बध्नता विष्णुना, सृष्टिः निर्मातुं धात्रा, धरिणीं वोढुं शेषेण, महिषासुरमारणाय पार्वत्या, सिद्धिप्राप्तये सनकादिभिः, संसारं जेतुं च मन्मथेन यस्य नागाननस्य गजाननस्य ध्यानं कृतं स शैलसुतासुतः अस्मान् पातु इति प्रार्थना अत्र कृता। एवमेव अपरस्मिन् श्लोके वर्णितं यथा

यं ब्रह्म वेदान्तिनो वदन्ति परं प्रधानं पुरूषं तथान्ये
विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशनाय।
विघ्नेश वीर्याणि विचित्रकाणि वन्दीजनैर्मागधकैः स्मृतानि
श्रुत्वा समुत्तिष्ठ गजानन त्वं ब्राह्मे जगन्मङ्गलकं कुरुष्व॥

वेदान्तविदः यं ब्रह्म इति संबोधयन्ति अपरे च यं प्रधानपुरुषः अथवा प्रपञ्चस्य सृष्टिकारणं वदन्ति, ईश्वरं कथयन्ति तं विघ्नविनाशकं नमामि। हे गजानन! बन्दीभिः गीयमानां स्तुतिं श्रुत्वा उत्तिष्ठ एवं जगतः कल्याणं विधेहि इति। अपि च

विश्वाधिभुतम् इति योगिनां वै प्रत्यक्षरूपेण विभान्तमेकम्।
सदा निरालम्बसमाधिगम्यं तमेकदन्तं शरणं व्रजामः॥

नाम यः विश्वस्य आद्यकारणं, योगिनां हृदये अद्वितीयरूपेण प्रकाशमानं, निरालम्बसमाधिमाध्यमेन ज्ञानगम्यं तमेकदन्तं शरणं व्रजामः इति।

अत्र स्तोत्रे त्रिभुवनस्य सर्वैरपि देवैः अस्य स्मरणं पूजनञ्च आद्यत्वेन क्रियते इति वर्णितम्। विघ्नध्वान्तनिवारणैकतरणिः अयं हिमसुतातनयः सर्वतोऽग्रे विद्यते अतः अस्यैव भक्तिं कुरु, अस्यैव भक्तिपन्थानं व्रज, तल्लीनः भूत्वा प्रार्थय भगवन्तं वरदहस्तं यः दुःखानि निवार्य जीवनं सफलं करोति, आनन्दयति च सर्वान् स्वीयाशीर्वादेन इति भावः प्रकाशितः। शोकार्ता दुःखार्ता भक्ताः कारुण्येन याचनां कुर्वन्ति कृपाप्रसादाय इति। एवमत्र केषाञ्चन स्तोत्राणां तत्रापि स्तोत्रेषु केषाञ्चन एव श्लोकानाम् उद्धरणं कृत्वा तदुक्तभावानां ग्रहणाय, सारग्रहणाय, स्तोत्राणां रसग्रहणाय च सुकुमारः प्रयासः कृतः वर्तते।

यं योगिनो योगबलेन साध्यं कुर्वन्ति तं कः स्तवनेन नौति।
अतः प्रमाणेन सुसिद्धिदोऽस्तु तमेकदन्तं शरणं व्रजामः॥

अर्थाद् यं योगिजना योगबलेन प्राप्तुं प्रयासं कुर्वन्ति, साध्यं च कुर्वन्ति, तादृशस्य

गणपतेः स्तुतिवर्णनं कर्तुं कः पारयति? अतः केवल तं विघ्नराजं गणेशं प्रणम्य एतावदेव प्रार्थयामि यदेष सिद्धिदो भवतु। यथोक्तमत्र यत् स्तोतुमेव सामर्थ्यं नास्ति चेत् रचितस्तोत्राणां रसग्रहणे अविकलं सामर्थ्यं कुतः स्यात् मादृशानां सामान्यानां तथापि ईषत् प्रयतितम्। अन्ते एतावदेव उच्यते

यदक्षरं पदं भ्रष्टं मात्राहीनं च यद्भवेत्।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर॥

✦✦✦

# काव्यं किं प्रकृतेरनुकरणम्

## (प्राच्यपाश्चात्त्ययोर्दृक्कोणतः)

शुभ्रजित्सेनः*

शिल्पानि शंसति देव शिल्पानि
एतेषां वै शिल्पानामनुकृतीह शिल्पानि अधिगम्यते...

इति ऐतरेयब्राह्मणोक्त्यनुसारं पृथिवीयं विश्वशिल्पिनः सृष्टिरिति शिल्पसाधनया शिल्पिनश्चात्मा भवति संस्कृतः- 'आत्मा संस्कृतिर्वाव शिल्पानि छन्दोमयं वा एतैर्यजमान आत्मानं संस्कुरुते' इति।[1] ननु एतद्यच्छिल्पं तत् किं स्वरूपम्? तत्स्वरूपावगुण्ठनतिरस्कारैः पुरस्कृतप्रयासैः बुधैः क्रियमाणानि विविधलक्षणानि पर्यालोच्य वक्तुं साम्प्रतं यद्यस्य विकाशो वा प्रकाशो मनुजनुषां बुद्धिवृत्त्या न केवलञ्चालितः, अपि च सुकुमारबोधेन नियन्त्रितः, तदेव शिल्पपदवाच्यम्। परं शिल्पिनो वास्तवजीवनाभिज्ञता सन्तानप्रक्रिया च विद्योततेतमां शिल्पे। तथाह्युच्यते- Art is the expression of hightended experience इति। हार्वार्टरिडपादेन तदीये The meaning of Art इत्याख्ये ग्रन्थे समीरितम्- Art is the most simple and most usually defiend as an attempt to create pleasing forms इति। प्राच्यपाश्चात्त्यविदुषां मध्ये मतविरोधसत्त्वेऽपि भास्कर्य-स्थापत्य-चित्र-सङ्गीत-नृत्य-साहित्यभेदादेव षड्प्रकारकं तावच्छिल्पमिति मतमविसंवादि सर्वजनग्राह्यञ्च। तेषु साहित्यन्तु श्रेष्ठमन्यतमञ्च शिल्पं, स्थापत्यादिशिल्पापेक्षया साहित्यस्योपादानानां सूक्ष्मत्वात् सूपयोगविषयाच्च। किञ्च, साहित्यं नाम भाषाशिल्पं भाषया व्यवहृतध्वनिशब्दादिभिश्च प्रकाश्यत्वात्।

ननु किं तावत्साहित्यपदप्रवृत्तिनिमित्तमिति चेदुच्यते 'गुणवचनब्रह्मणादिभ्यः'[2] इति सूत्रेण ष्यञ्प्रत्ययेन 'साहित्यस्य भावः' इति विग्रहे साहित्यमिति पदसिद्धिः। सहितस्य कर्म साहित्यं, यस्मादत्र एव कविकर्मणि काव्ये सर्वाः समाधीयन्ते विद्याः। तथाहि भामहेनोदितम्

'न स शब्दो न तद्वाच्यं न स न्यायो न सा कला।
जायते यन्न काव्याङ्गमहो भारो महान् कवेः॥' इति।[3]

किञ्च, अविविक्तयोर्मिथः सौन्दर्यहेतुभूतयोः शब्दार्थयोरविच्छेद्यसंहतिः साहित्यमित्यभिधीयते

'वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।

---

*अतिथि-अध्यापकः, संस्कृतविभागे, रामकृष्णमिशन्-विद्यामन्दिरे, पश्चिमवङ्गेषु

[1]ऐतरेयब्राह्मणम् ६.५.१

[2]अष्टाध्यायी ५/१/१२४

[3]काव्यालङ्कारः

जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥'[4] इत्युक्तं कविकुलललामभूतेन कालिदासेन। सन्दर्भेऽस्मिन् कविवरेण रवीन्द्रनाथेन वङ्गभाषायां सुष्ठूक्तं-' तोमार आपन सुर कखनो ध्वनिबे मन्त्ररवे, कखनो मञ्जुल गुञ्जरणे' इति।

शब्दार्थयोः सौहृद्येन साहित्यं तत्पदवाच्यतामश्नुते। तेन कुन्तकेन भणितम्

'साहित्यमनयोः शोभातिशालितां प्रति काप्यस्यौ।
अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः॥[5] इति।

काव्यतत्त्वविद्भिः साहित्यं काव्यमिति परामृश्यते। 'कविवाङ्निर्मितिः काव्यमिति' शब्दकौस्तुभकाराः। 'कवेः कर्म स्मृतं काव्यमिति' काव्यकौतुककृताऽवादि। जगन्नाथेनाप्यगादि- “रमणीयार्थप्रतिपादकः शब्दः काव्यमिति।” काव्यात्मभूतरमणीयतायाः स्वरूपं तावत् क्षणे क्षणे यन्नवतामुपैति तदेव। काव्यजीवातुभूता तावद्रमणीयता खलु आनन्दानुभूतिप्रयोजिका। अपि च काव्यं ह्यानन्दानुभूतिसाधनम्। अतो जगतीतलेऽस्मिन्नभिव्यक्तं लोकोत्तरानन्दं सम्पादयन्तीं कविकृतिं प्रशंसन्नाहाभिनवगुप्ताचार्यः

अपूर्वं यद्वस्तु प्रथयति विना कारणकलां
जगद्ग्रावप्रख्यं निजरसभरात्सारयति च।
क्रमात्प्रख्योपाख्यप्रसरसुभगं भासयति तत्
सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते॥

काव्यमिदमस्मज्जीवत्प्रकृतेरनुकरणं किमिति प्रश्ने विवदन्ते प्राच्यपाश्चात्त्ययोः काव्यसमालोचकाः। वस्तुतः काव्यं प्रकृतेरनुकरणमिति पदत्रयगतसार्थक्यं विद्यते नाम। प्रजापतिना ब्रह्मणा विनिर्मिता प्रकृतिरियं त्रिगुणात्मिका। परमाण्वाद्युपादान-कर्मादिसहकारिकारणपरतन्त्रा नियतिनियन्त्रिता चेति। परं काव्यतात्त्विका आमनन्ति यन्नहि प्रकृतिः केवलं बाह्यवस्तुनिचया सृष्टेर्नियमपरतन्त्रा अपि च, सर्जनशक्तिविशेषः सा खलु। किं नाम काव्यमिति आदावेवोपस्थापितम्।

अत्रेदं सम्प्रधार्यं यत् साहित्यं प्रकृतिं जीवनञ्चानुकरोति। अनुकरणं नाम पश्चात्सर्जनमुत्तरसृष्टिश्चेति। अनुकरणमित्यस्य सारूप्यम्- मूलस्य पुनः करणमित्यर्थः (Reproduction of the Original)। परन्तु अनुकरणविषये विदुषामस्ति विप्रतिपत्तिः। अनुकरणप्रक्रियामाधारीकृत्यानुकृतिवादः प्रतिष्ठापितोऽलङ्कारशास्त्रेतिहासे। विश्वसृष्टेरूषालग्नतोऽनुकरणप्रक्रिया प्रादुर्बभूव। परं शिल्पस्य मूलमस्त्यनुकरणमिति प्राथम्येन ग्रीग्देशीयैर्दार्शनिकैर्बुद्धम्। Art is imitation/mimesis। प्रतीच्यां प्लेटोपाद-एरिस्टटलमहाभागादिदार्शनिकप्रवरैरनुकरणमित्यनेन यान्त्रिकी उपस्थापना नावगम्यते, परमवबुध्यते केवलं नूतसर्जनाय मानसिकप्रक्रियाया उद्भावना। व्युचारमहाभागेन त्वनुकरणार्थे सर्जनशीलतेति (Creativity) अवहितम्। अनुकरणेन

---

[4]रघुवंशम् १.१

[5]वक्रोक्तिजीवितम् १.१७

रूपस्यानुरूपस्वरूपं भवति सृष्टं सूक्ष्मेक्षिकया। वस्तुतः, यस्मिन् कस्मिन्नपि शैल्पिक-प्रकाशेऽनुकरणमपरिहार्यतयापेक्ष्यते। ओयालटारपोटारवर्यैः विशिष्टशिल्पबोधेन सममनुकृति-रेकात्मतया तुलिता। तन्नयेऽनुकृतिवस्तु तावद्विशिष्टव्यक्तित्वस्य स्वरूपम् (Soul of specific personality)इति। वस्तुतोऽनुकृतिर्नामाक्षरिकप्रतिविन्बनमिति नहि तस्य मतिः। नवीनसृष्टेः स्पन्दनमेवानुकृतिशब्देनावबोध्यम्। इतालीयदार्शनिकेन क्रोचेमहाभागेनापि शिल्पानुकरणयोरङ्गाङ्गिभावः सम्बन्धः स्वीकृतः। Aesthetic इति ग्रन्थे उच्यते-'...art is the idealizing or idealizing imitation of nature इति। प्रकृतेरादर्शायितमनुकरणमेव शिल्पम्।

अनुकरणविषये प्लेटोमहाभागस्य मतेन सह एरिस्टटलपादस्य मतं साम्यं न बिभर्ति। प्लेटोमहाभागस्याशयोऽयं यद्वस्तुजगदिदमनुकुर्वन्ति कवयः। किञ्च, अनुकृतेरनुकृतिः सत्याद्दूरा दूरतरेति (Copy of copy twice removed from the truth) अर्थात् संसारेऽस्मिन् विद्यमानमस्ति शाश्वतसत्यं, तस्मादेवानुकरणं भवति प्राकृतिकवस्तुनिचयानाम्। परन्तु यत्र मानवः स्वत एव वास्तवपृथिव्यां किमपि सृजति, तत्र तद्दृष्ट्वा शिल्पी स्वकपोलकल्पनाया माधुरीं मेलयित्वा विरचयति काव्यम्। अतो, मानवीयाचरणस्यानुकरणे सति सत्याद् भित्तित्रयदूरावस्थितिर्भवति काव्यस्य। परं दार्शनिकदिशा, न तु काव्यिकदृष्ट्या शिल्पं विश्लेषितवान् सः। तैस्तु काव्यं प्रकृतेरनुकृतिः काव्यं विवेकवुद्धिं विनाशयति, मनसि कर्मविमुखतामानयति, मिथ्याभाषणे मानवान् प्रवर्तयति इत्यादिकं विचिन्तितम्। तेनातोऽवादि- All poetical imitations are ruins. The tragic poet is an imitator इति।

अपरदार्शनिकप्रवरः एरिस्टटलपादः केवलं वास्तवानुकृतिं साहित्यगतानन्दस्य स्वरूपत्वेन न मनुते। तन्नये कविना तु जीवनं स्वकं व्यक्तित्वमनुसृत्यैव तथा संलक्ष्यते तथैवोपस्थाप्यते काव्यरूपवाङ्माध्यमेन। तथाहि तेनोदितं- The poet represents life as seen through the medium of his own personality इति। अनुकरणस्य स्वभवजवासनातो जनिं लभते शिल्पमिति तु तस्य तत्त्वभावनायाः प्राथमिकं सूत्रम्। जन्मदात्रा सह सन्तानस्य सुसम्बन्धवत् शिल्पेऽपि शिल्पिन आदर्शबोधव्यक्तित्वहृदयानां संयोगो दरीदृश्यते। तथाहि, वास्तवनिष्ठानुकरणं न हि विवेच्यं, परं शिल्पिनः सचेतनाभिज्ञानमपि यथोचितं मूल्यं लभते इति तन्नयः। किन्तु घटमानविषयो न त्वनुकरणस्य विषयमूलं, परञ्च दृष्टान्तनिष्ठसम्भावनापि केवलं साहित्यस्य विषयतया ग्राह्या। आक्षरिकानुकरणं व्यतिरिच्य नास्ति किमपि सम्भवति शिल्पे इति प्लेटोमहाभागस्याशयमिमं निराकृत्य Poetics इति ग्रन्थकर्तुः वक्तव्यमेतदेव यत् शिल्पी वस्तुजगत आमूलचूडमनुकरोति, परं संसृजति केवलं प्रपञ्चस्योदाहरणानि संगृह्य स्वमौलिककल्पनया सर्जनशक्त्या च नूतनं किमपि। अर्थात् सर्जनात्मकेऽनुकरणे सर्जनशीलता प्रतिभाया दक्षता चेति अपेक्ष्येते।

अतोऽनुकरणं नाम जीवनस्य प्रतिरूपवर्णनम्- Imitation of an appearance इति। शिल्पी अत्र तदेव वर्णयति यत्सम्भवितुमर्हति, न तु यथास्थितस्य वर्णनं तेन कर्तव्यम्। अतः कवेः स्वकल्पितकल्पनायाः सुतरामेवावसरः। तथाहि तेनाभ्यधायि- The maker of the image of the imitator, we say, has no understanding of what is but only of what appears इति। तन्नये प्रतिनियतं वयं वस्तुजगदिदं विश्रृङ्खलत्वेनावयवहीनरूपेणासामञ्जस्यभावेन च प्रत्यक्षीकुर्मः। परं शिल्पी कवयिता वा सृष्टिकाले वस्तुप्रपञ्चस्योपरि स्वाधीनसत्तामारोपयति। तेन काव्यं नवरसभरितं रमणीयतरं विशिष्टमेकं रूपमादधाति। परन्तु एतदेव स्मर्तव्यं यद्वैयक्तिकभावावेगः कविभिरनुपकरणीयः। नूत्नसृष्ट्या एव तत्सार्वजनीनत्वमेति। शिल्पी तु वस्तुजगतोऽपूर्णतां दूरीकृत्य पूर्णतां मृगयति स्वकीयसृष्टौ।

प्राच्यदेशीयो नन्दनतात्त्विको रवीन्द्रनाथः कश्चनानुकरणवादीति तु स्पष्टतयाभिधातुं नालम्। परन्तु तन्नये रामस्य अयोध्यारूपस्थूलजन्मभूमेरपेक्षया कवेः मनोभूमिः सत्यम्, अथवा वङ्गभाषायाम्

आमारइ चेतनार रङ्गे पान्ना हल सबुज,
चुनि हये उठल राङ्गा...
गोलापेर दिके चेये बललुम 'सुन्दर'
सुन्दर हल से,
तुमि बलबे तत्त्वकथा कविर वाणी नय,
आमि बलब ताइ ए काव्य...[6] इति।

(संस्कृतरूपम्- ममैव चेतनानिकषस्पर्शेन मरकतमणिः हरिद्वर्णतामेति। किञ्च, पद्मरागः रक्तिमानमाप्नोति। पाटलपुष्पं प्रति दृक्पातं कृत्वा "सुन्दर"मिति वच्मि...ततश्च सुन्दरं जातम्।)

एभिर्वचनैः प्रमाणीभवति यत्तस्य सविधे वास्तवानुकृतिः नितरामेव तुच्छा। तथापि परिदृश्यमानं जगदिदं जीवनञ्चेति द्वयं साहित्यसृष्टौ अकिञ्चित्करमित्यपि न मन्यते। जगज्जीवनञ्च व्यतिरिच्य न सम्पद्यते साहित्यम्। गुरुवर्यस्याभिमतं तावत्- 'प्रकृतौ विद्यमानं प्रत्येकमेव वयं सदा साक्षात्कर्तुं, साहित्ये ललितकलायाञ्चाप्रत्यक्षमस्मत्सविधे प्रतीयते' इति। अप्रत्यक्षताभावस्यास्य परिपूर्तये कविः स्वकल्पनानुसारि वृत्तजातं संयोजयति। वास्तवसत्यमाश्रित्यैवाखण्डे सत्ये उपगम्यते। अतः साहित्यस्य प्रकृतविषयस्तन्मूल्यञ्च वास्तवसत्यापेक्षयान्यूनाविति।

संस्कृतालङ्कारशास्त्रेऽपि अनुकरणमुपजीव्य कोटिद्वयं समस्ति। प्रथमपक्षस्याशयोऽयं यदनुकरणात्मकं काव्यं पाठकान् ध्वंसमार्गं नयति। तेन काव्यश्रवणं मननं रचनञ्चेति सर्वथा

---

[6]'आमि' इति कविता

वर्जनीयम्। अस्मद्देशीया अपि नैके आमनन्ति- 'काव्येन हन्यते शास्त्रम्', 'काव्यालापांश्च वर्जयेत्', 'शास्त्रेषु हीनाः कवयो भवन्ति' इत्यादीनि। शिशुपालवधाख्यमहाकाव्यस्य प्रथमे सर्गे मल्लिनाथेन सर्वं विचार्य तट्टीकाया आरम्भे टीकितम्-

> "काव्यस्यानेकश्रेयस्साधनतां काव्यालापांश्च वर्जयेत् इति निषेधस्यासत्काव्यविषयतां च पश्यन् शिशुपालवधाख्यं काव्यं चिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणसाधनत्वादाशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् इत्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च काव्यफलं शिशुपालवधबीजभूतं भगवतः श्रीकृष्णस्य नारददर्शनरूपं वस्तु आदौ श्रीशब्दपूर्वकं निर्दिशन् कथामुपक्षिपति श्रियः" इति

ऋग्वेदे अप्याम्नातं 'यदीदं शृणोत्यलकं शृणोति' इति। अपि च, ऋग्वेदभाष्योपक्रमणिकायामुक्तं 'यद्यप्यसौ काव्यनाटकं शृणोति तथापि निरर्थकमेव तच्छ्रवणं तेन सुकृतमार्गज्ञानाभावात्' इति।

काव्यविषयका एतेऽभियोगा नितान्तमेवाज्ञानपरका हेयाश्च। युक्त्यनुभवाभ्यां ज्ञायते यत्काव्यन्तु चतुर्वर्गावाप्तिसाधनं ब्रह्मानन्दसहोदरं रसमास्वाद्यतया जनयद्गौरवमादधाति। तथाहि श्रुतिः-'रसो वै सः- रसं ह्येवायं लघ्वानन्दीभवती'ति। न केवलं श्रुतौ, अपि च भारतीयालङ्कारशास्त्रीयग्रन्थेषु काव्यस्य प्राधान्यं स्वीकृत्यानुकरणविषयकचिन्ताया अवकाशः परिप्राप्यते।

दशरूपके धनञ्जयेन काव्यलक्षणनिरूपणावसरे भणितम्-'अवस्थानुकृतिर्नाट्यम्' इति। अर्थात् काव्योपनिबद्धधीरोदात्ताद्यवस्थानुकारश्चतुर्विधाभिनयेन तादात्म्यापत्तिर्नाट्यम्। अत्रानुकरणमित्यस्यार्थस्तावदाचरणवेशभूषादिभिः कविवर्णितपात्राणां प्रत्येकमवस्थाया एवं यथायथमवस्थानं, येन नटे रामाद्यवस्थारोपेण तादात्म्यबोधो जायते। यथा दुष्यन्तस्याचरणादीनामेवमनुकरणं नटैः कर्तव्यं, यत्र सामाजिकानां दृष्टौ नट एव दुष्यन्तत्वेन प्रतीयते। नटदुष्यन्तयोरभेदप्रतिपत्तेर्नामावस्थाया यथार्थानुकृतिः। अवस्थाया यथार्थानुकृतिरेव नाट्यमिति। आचार्यैर्भरतैः त्रिलोकस्य भावानामनुकरणं हि नाट्यमित्युक्तम्-'त्रैलोकस्यास्य सर्वस्य नाट्यम भावानुकीर्तनम्' इति[7]।

---

[7]तथाहि अभिनवगुप्तपादेन अभिनवभारत्यामुक्तम्-
नन्वेवं तावता नियतानुकारो मा भूत्। अनुकारेण तु किमपराद्धम्। न किञ्चिदसम्भवाद्दृते। अनुकार इति हि सदृशकरणम्। तत्कस्य? न तावद्रामादेः। तस्याननुकार्यत्वात्। एतेन प्रमदादिविभावानामनुकरणं पराकृतम्।...न हि नटो रामसदृशं स्वात्मनः शोकं करोति।...भावे वा अननुकरणत्वात्। न चान्यद्वस्त्वस्ति यच्छोकेन सदृशं स्यात्। अनुभावांस्तु करोति। किन्तु सजातीयानेव। न तु तत्सदृशान्। साधारणरूपस्य कः केन सादृश्यार्थः। त्रैलोक्यवर्तिनः सदृशत्वं तु न विशेषात्मना यौगपद्येनोत्पद्यते। कदाचित्क्रमेण नियत एवानुकृतः स्यात्। सामान्यात्मकत्वे कोऽनुकारार्थः। तस्मादनियतानुकारो नाट्यमित्यपि न भ्रमितव्यम्। अस्मदुपाध्यायकृते काव्यकौतुकेऽप्ययमेवाभिप्रायो मन्तव्यः। न त्वनियतानुकारोऽपि।...

किञ्च 'लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम्' इत्युक्त्वा भरताचार्येण मनुष्याणां प्रकृतेरनुकरणं नाट्यमित्यभिधीयते। यस्माल्लोकवृत्त्यानुसारेण करणं प्रयोगरूपं 'नाट्यं मया कृतम्' एतदित्येतस्मात् कारणाद्धर्मप्रवृत्तानां रामयुधिष्ठिरादीनां सम्बन्धित्वेन धर्म उक्तः। नाट्यशास्त्रे 'सप्तद्वीपानुकरणं नाट्यमेतद्भविष्यति' इत्यपि समुल्लिखितम्। सप्तद्वीपगतभावानुकीर्तनरूपेण नाट्ये दृश्यमाने यन्न दृश्यते न हृदयगोचरमेति तादृग्ज्ञानादिकं नास्तीति शेषः। अतः अवस्थादेशकालप्रकृतिविशेषसमुचितभावानुकीर्तनमात्रमेव कर्तव्यम्। 'विष्णुधर्मोत्तरग्रन्थे' नृत्यचित्रयोः प्रसङ्गे 'त्रैलोक्यानुकृतिः' इत्यपि उच्यते।

अस्य निहितार्थोऽयं यदनुकरणेन वस्तुनः प्रत्यक्षमूर्तेः चित्रणमेव नहि शिल्पपद-वाच्यम्, परं तस्यान्तःस्थितभावमूर्तिः परिष्कर्तव्या शिल्पिना। अत्रेदम् उल्लेखार्हं यदनुकरणं काव्यशिल्पस्य प्राथमिकसत्यमिति परञ्च शिल्पिनो दृक्कोणमानसिकतयोः भूमिका भारतीयालङ्कारशास्त्रे नितरामुल्लेखार्हा। किञ्च भरतस्य रससूत्रकारशङ्करस्यानुमितिवादोऽ-नुकरणतत्त्वमुपजीव्यैव प्रतिष्ठापित इति मामकी मतिः।[8]

भारतीयालङ्कारिकास्तु परिदृश्यमानयोर्जगज्जीवनयोरनुकरणमेव काव्यस्य स्वरूपलक्षणत्वेनाभिहितवन्तः। काव्यस्यात्मनो ध्वनेः रसध्वनेर्वा मूल्यं वस्तुमूल्येन नहि भवतीति निरूपितम्। परमेतच्चिन्त्यं यद्वस्तुनो वास्तवज्ञानस्य वा वर्जनं न खलु तेषामभिप्रायः। रसवादिनो विभावानुभावादीनां ज्ञानं दृश्यमानजगतोऽभिज्ञतां व्यतिरिच्य न सम्भवपरम्। कविभिः यन्मायाजगद्विरच्यते, वस्तुविश्वेन समं तस्यानुरूप्याभावे पाठकस्य मनसि वस्तुजगतः प्रतिभासर्जनमपि न कदापि सम्भवति। तथापि अनुकरणप्रक्रियाया गुरुत्वमभ्युपगतं प्राचीनालङ्कारिकैः श्रद्धया। यद्वा भवतु नाम, नह्यस्ति केवलमनुकरणेऽभिनवत्वम्। वस्तुसत्यसृष्टिधर्मितयोः समन्वयेन कविरद्भुतामोदचमत्कारं विधास्यति- 'येन द्वितयमप्येतत्तत्त्वनिर्मितलक्षणम्' इति कुन्तकाचार्यैरुक्तम्[9]। तन्नयेऽपि काव्यं न हि केवलं प्रकृतेरनुकृतिः, ततोऽप्यस्ति कवेर्मानसकल्पनमिति।

अर्थात् कविः पौर्वापर्यसहितामनुपुङ्खतया प्रकृतिं नानुकरोति। कवेः सहृदयहृदयदर्पणे प्रतिविम्बिता प्रकृतिः कल्पनाया आतिशय्येनानुरञ्जिता, रसानुगुणशब्दार्थादिभिश्चाभिव्यक्ता सती काव्यरूपतामश्नुते। काव्यं तावन्मनुष्यजीवनस्य सामान्यसत्यमेवाभिव्यनक्ति विशेषाश्रयेण। अपारे काव्यजगति कविरेव प्रजापतिः। स यथैव वस्तुतत्त्वं निर्मातुमीहते, तथा

---

[8]शङ्कुकनये इदमपि स्पष्टं बोध्यं यदनुकार्येत्यनेन काव्यनिबद्धरामादेर्बोधो भवति ऐतिहासिकरामादिस्तु कवेरनुकार्यः। नटानुकार्यस्तु कविनिबद्धरामादिरस्ति। शङ्कुकः सम्यग्-मिथ्या-संशय-सादृश्यादि-विलक्षणा चित्रतुरगन्यायेन नाट्यप्रतीतिरस्तीति स्वीकरोति, या प्रतीतिरुपयुक्ता वर्तते।

प्रेक्षको विभावादिभी रसस्यानुमानं करोति, अतस्तद्दृष्ट्या रसस्यानुमितिर्भवति। निष्कर्षतः शङ्कुकदिशा नटस्थितिः प्रधाना भवति, अतो मुख्यतो रसस्यानुकृतिर्भवति। अनुमितिस्तु मतस्यास्य गौणोऽर्थो भवति। अभिनवस्य गुरुर्भट्टतौतः शङ्कुकस्यानुकरणं खण्डयतीति।

[9]वक्रोक्तिजीवितम् १.५

निर्मातुं प्रभवति। अत एव मम्मटेन काव्यप्रकाशे विधातुः सृष्टेरपि कविसृष्टेर्महत्त्वं प्रतिपाद्यते। यत्कवेर्भारती सर्वथा स्वतन्त्रा, आनन्दस्वरूपा, विधिनियमैरनिगडिता, नवरसरुचिरा चेति

'नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारतीकवेर्जयति॥' इति[10]।

सर्वप्रथममग्निपुराणे प्रोच्यते

'अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथास्मै रोचते विश्वं तथैतत्परिवर्तते॥' इति[11]।

संसाररजोऽवकीर्णे जगति कविस्तु सहृदयगतं वचनजालं गीतरसधाराभिरभिषिञ्चन् नवनवीनमानन्दलोकं विरचत्येव। यदस्ति पृथिव्यां तदेव नवीनतया भाति कविकर्मणि। यथोक्तं ध्वनिकृता- 'सर्वे नवा इव भान्ति मधुमास इव द्रुमाः' इति। कविः स्वेच्छया यद्वस्तु यथा निधित्सति, तथैव निदधाति। ऐरावतो यथा अङ्कुशहतः संश्चलति, न तथा कविः। स स्वत एव सानन्दं प्रचलति, यथा चलति निर्झरिणीधारा। श्रृङ्गारी कविः सर्वं वर्णनं रसमयं विधत्ते, नीरसश्च नीरसम्। स चेतनमचेतनवद्, अचेतनं चेतनवच्च वर्णयितुं प्रभवति। 'कर्तुमकर्तुमन्यथाकर्तुं च यः प्रभवति स प्रभुरि'ति लक्षणोक्तदिशा कवेः प्रभुत्वे न संशीतिलेशोऽपि। उक्तञ्च ध्वन्यालोके

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथास्मै रोचते विश्वं तथैदं परिवर्तते॥
श्रृङ्गारी चेत् कविः काव्ये जातं रसमयं जगत्।
स च वीतरागश्चेन्नीरसं सर्वमेव तत्॥
भावानचेतनानापि चेतनावच्चेतनानचेतनवत्।
व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया॥' इति[12]।

कवेः स्वातन्त्र्यमुद्दिश्यैव 'निरङ्कुशा वै कवय' इति भण्यते। न केवलं चेतनाचेतनयोर्धर्मपरिवर्तने एव कविः प्रभवति, अपि तु स मानवं देवं, देवञ्च दानवं कर्तुं क्षमते। कवेः स्वतन्त्रतामभिलक्ष्य विह्लणेन 'विक्रमाङ्कदेवचरिते' उक्तम्

लङ्कापतेः सङ्कुचितं यशो यद्यत्कीर्तिपात्रं रघुराजपुत्रः।
स सर्व एवादिकवेः प्रभावो न कोपनीयाः कवयः क्षितीन्द्रैः॥' इति।

प्राकरणिकतयास्माभिः कालिदासकृतयोरुत्तरमेघान्तर्गतयोः श्लोकयोः समुद्धरणं विधीयते

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायाम्।
आत्मानं ते चरणपतितं यावदिच्छामि कर्तुम्॥
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे।

[10]काव्यप्रकाशः १.१

[11]अग्निपुराणम् ३३९

[12]ध्वन्यालोकः ३.११६

क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः॥' इति।[13]

किञ्च-

भित्त्वा सद्यः किशलयपुटान् देवदारुद्रुमाणां
ये तत्क्षीरस्तुतिसुरभयो दक्षिणेन प्रवृत्ताः।
आलिङ्ग्यन्ते गुणवति मया तस्य तुषाराद्रिवाताः।
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति॥' इति।[14]

अत्र पूर्वस्मिन् श्लोके विरहिजनस्य चित्रार्पितनायिकया सह क्षणमिलनमपि विधातुरनभिप्रेतमिति कृतान्त इति पदेन सोऽभिधीयते। उत्तरभाविनि श्लोके तु विरहिणा यक्षेण 'तुषाराद्रिवाता आलिङ्ग्यन्ते' यदि तव प्रियायाः स्पर्शः स्यादिति चिन्तयता। उभयत्रैव कविकृतिः हि वास्तवानुकृतिमतिशय्य स्वे महिम्नि प्रतिष्ठिता।

सर्वं विचार्य उपसंहृतौ वक्तुं साम्प्रतं यदनुकरणव्यापारः शिल्पस्य मूलीभूतो विषयः। सृष्टेरादिलग्नत एकविंशशताब्द्या विज्ञानप्रयुक्तिपरिस्फूर्तिकमनुजसभ्यतां यावत् सर्वदा सर्वत्रैव च अनुकरणतत्त्वं सर्वजनविदितम्। शिल्पमाश्रित्य पृथिव्यामस्यां यत्किमप्यालोचनं भवतु नाम तदवश्यमेवानुकरणमुपरि सुप्रतिष्ठितम्। परं काव्यमनुकृतत्वाद्यदि हेयपदवाच्यतां लभते तर्हि 'सरस्वती स्वादु तदर्थवस्तु निष्पन्दमाना महतां कवीनमि'ति[15] आनन्दवर्धनवचनमपि परमार्थभूतं न स्यादिति। अतः कविकृतिः प्रकृतेरनुकृतिरिति निश्चप्रचमभिधातुं न शक्यमिति सर्वं चतुरस्रम्।

✦✦✦

---

[13]उत्तरमेघे-४४

[14]उत्तरमेघे-४६

[15]ध्वन्यालोकः-४/४

# वेदभाष्यभूमिकासु सायणकृतासु मीमांसाविचारावतरणस्यावश्यकता

सौमित्रः अधिकारी*

## १. भूमिका

पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्।
अशक्यं चाप्रमेयञ्च वेदशास्त्रमिति स्थितिः॥
चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक्।
भूतं भव्यं भविष्यञ्च सर्वं वेदात् प्रसिध्यति॥

जननमरणरूपतप्ततैलावर्तें संसारकटाहे सततमावर्तमानानां प्राणभृतां रक्षणाय भगवान् स्वयमेव वेदस्वरूपमादाय जगत्याविर्भूतः। परमार्थसाधनभूतोऽयं वेदः जगतामैहिकामुष्मिकमङ्गलसाधनायाविर्भूय धर्मस्वरूपेणास्माकं सविधे ज्ञानमार्गस्योन्मेषमकरोत्। न केवलमस्माकमपि तु देवपितृणामपि वेद एव सनातनं चक्षुः। चतुर्वर्णानां, लोकत्रयाणाम्, आश्रमचतुष्टयानां, भूतस्य, वर्तमानस्य, भविष्यतश्च सर्वेषामेवाधारभूतोऽयं वेदः। तस्मादेव वेदात्सर्वं प्रसिध्यति। तस्मात् मनुनैव यदुक्तमादौ तस्मिन् विषये कः खलु सचेताः सन्दिग्धे? वेदशास्त्रं विहायान्यत् किमपि नास्ति यत् खलु परमार्थभूतां मोक्षपदवीमुपदर्शति। तस्मादेव मनुना साधूक्तम्-

बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनम्।
तस्मादेतत् परं मन्ये यज्जन्तोरस्य साधनम्॥

अदादिगणीयज्ञानार्थकाद्विद्धातोः घञि प्रत्यये कृते वेदशब्दो निष्पद्यते। 'विद सत्तायाम्' इत्यस्माद्धातोरपि वेदशब्दस्य सिद्धिर्भवति। अत एव ह्युच्यते ज्ञानराशिर्हि वेद इति। भगवता मनुना वेदानां महत्त्वमसकृदुक्तम्। तथाहि- वेदोऽखिलधर्ममूलम् [1] इति वाक्ये मनुः वेदानामखिलधर्ममूलत्त्वं प्रतिपादयति। वेदानां सर्वज्ञानमयत्त्वं प्रतिपादयता मनुनोक्तं-

यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः॥ [2] इति।

वेदार्थपर्यालोचनपरायणा वैदिका विद्वांसः प्रतिपादयन्ति यद्वेदा विविधप्रकाराणां ज्ञानानां विज्ञानानां वा मूलाधाराः सन्ति। प्रत्यक्षानुमानोपमानैः येषां विषयाणां

---

*अतिथिः अध्यापकः, संस्कृतविभागे, हावडामण्डलस्य जगद्वल्लभपुरस्थे शोभारानीमेमोरियलमहाविद्यालये

[1]मनु.२/६

[2]मनु.२/७

निश्चयोऽसम्भवो वर्तते तेषामप्यर्थानां निश्चयसाधनं वेदा एव सन्ति। तथाहि उक्तं कविना-

प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।
एतं विदन्ति वेदेन तस्माद्वेदस्य वेदता॥ इति।

अपि तु यस्मिन् ग्रन्थे इष्टप्राप्त्यनिष्टपरिहाराय चोपाया निर्दिष्टाः स एव वेदः। परन्तु इष्टप्राप्तिरनिष्टपरिहारश्च केनापि लौकिकेनोपायेन प्रत्यक्षेणानुमित्या वा भवितुं नार्हति। अलौकिकेनोपायेनैव भवति। अतोऽलौकिकोपायः कस्माल्लब्धुं शक्यते? वेदात्। तथाहि सायणाचार्येणोक्तं तैत्तिरीयसंहिताभाष्यभूमिकायाम्- “इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेद” इति।

पूर्वमेवास्माभिरभिहितं यद्वेदो ह्यखिलधर्ममूलमिति। धारणार्थकाद् धृधातोः मनिनि प्रत्यये कृते धर्मशब्दस्य निष्पत्तिर्भवति। तस्माद्धर्म इत्युक्ते यो धारयति स धर्म इति। धारकः खलु कस्येति जिज्ञासायामुच्यते- चराचरात्मकजगतः। न केवलं धारकोऽपि तूद्धारकोऽपि धर्मः। दुःखानलसन्तप्तेऽस्मिन् संसारकटाहे सततमावर्तमानानां प्राणभृता-मुद्धारकोऽपि धर्मः। तादृशस्यैव धर्मस्य मूलभूता हि वेदाः। अतस्तादृशस्य धर्ममूलभूतवेदस्य स्वरूपप्रकाशनमस्मादृशानां मनुजनूनां सविधे कष्टसाध्यमेव।

“अपौरुषेयं वाक्यं वेद” इति सायणाचर्यकृतं वेदस्य लक्षणान्तरम्। तस्माद्वेदस्तु वाक्यात्मकः। वाक्यात्मकः सन्नप्यपौरुषेयः। न पौरूषेयमपौरूषेयम्। तर्हि समुदितेयं जिज्ञासा यत् केन प्रकारेणापौरुषेयमिदं वाक्यं पुरुषभूतानामृषीणां सविधे प्रकटितं जातमिति। तस्यैव समाधानं प्रददाति देवगुरुर्बृहस्पतिः-

उत त्वः पश्यन्न ददर्श वाचम्
उत त्वः श्रृण्वन्न श्रृणोत्येनाम्।
उतो त्वस्मै तन्वं वि सस्त्रे
जायेव पत्य उशती सुवासाः॥ इति।

सुवासा पत्नी यथा पत्युः सविधे आत्मानं प्रकाशयति, तद्वद्ब्रह्मैकात्मभूतानामृषीणां सविधे वेदमाता आत्मानं प्रकाशितवती।

तादृशस्य वेदस्य पुनर्भागद्वयमस्ति। मन्त्रो ब्राह्मणश्चेति। तथाहि आपस्तम्बेनोक्तं परिभाषासूत्रे “मन्त्रब्राह्मणयोर्वेदनामधेयम् ” इति। मन्त्रस्तु वेदस्य संहिताभागः। “मननात् मन्त्र” इति निरुक्तकारस्य यास्कस्य मतम्। यत्र देवाह्वानं देवस्तुतिरभीष्टवस्तुलाभाय प्रार्थ्यते। तथाहि जैमिनेः सूत्रं- “तच्चोदकेषु मन्त्राख्या” इति। “शेषे ब्राह्मणशब्दः”[3] इत्यादिना सूत्रेण जैमिनिनाचार्येण ब्राह्मणभागस्वरूपं परिकल्पितम्। मन्त्रभागान्व्यतिरिच्य आरण्यकम् उपनिषच्चेत्यादयो ये वर्तन्ते त एव ब्राह्मणम्।

गच्छता कालेन सह मनुजनुषां धीशक्तिरपि क्रमशो ह्रासं गच्छतीति पश्यन्नाचार्यवादरायणवेदव्यासो वेदस्य चतुरो भागानकार्षीत्- ऋग्वेदः, सामवेदो, यजुर्वेदः,

[3]जै.सू.२/१/३३

अथर्ववेदश्चेति। तत्र सर्वेषामेव वेदानामंशद्वयं वर्तते। मन्त्रो ब्राह्मणश्च।

ऐतरेयब्राह्मणं शाङ्खायनब्राह्मणञ्चेति ऋग्वेदस्य ब्राह्मणद्वयम्। सामविधानब्राह्मणस्य भाष्यभूमिकायामाचार्यसायणेन सामवेदस्याष्टौ ब्राह्मणानि निवेदितानि। तद्यथा-

अष्टौ हि ब्राह्मणग्रन्थाः प्रौढं ब्राह्मणमादिमम्।
षड्विंशाख्यं द्वितीयं स्यात्ततः सामविधिर्भवेत्॥
आर्षेयं दैवतञ्चैव मन्त्रं वोपनिषत्ततः।
संहितोपनिषद्वंशो ग्रन्था अष्टावितीरिताः॥ इति।

यजुर्वेदस्तु भागद्वयेन विभक्तः। कृष्णः शुक्लश्चेति। तत्रापि वेदद्वये पृथक् पृथग्ब्राह्मणं वर्तते। तद्यथा कृष्णयजुर्वेदे तैत्तिरीयब्राह्मणं, शुक्लयजुर्वेदे शतपथब्राह्मणञ्चेति। प्रत्येकस्य वेदस्य पुनः बहव उपनिषदः सन्ति। सन्ति तावदष्टादशविद्यास्थानानि। तानि यथा विष्णुपुराणे कथितानि।

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश।
आयुर्वेदो धनुर्वेदो गान्धर्ववेदश्चेति ते त्रयः।
अर्थशास्त्रं चतुर्थश्च विद्या ह्यष्टादशैव ताः॥ इति।

वेदार्थज्ञानाय तत्त्वज्ञानाय फललाभाय च वेदस्थितपदवाक्यानाम् अर्थज्ञान-मावश्यकम्। परन्तु अस्मादृशानां मन्दमतीनां सविधे वेदस्तु क्रमशो दुर्बोध्यः सञ्जातः। परन्तु नायं स्थाणोरपराधः पुरुषदोष एव हि सः। कारणं वेदार्थज्ञानाय चतुर्दश विद्यास्थानानि सन्ति। शिक्षा, कल्पो, व्याकरणं, निरुक्तं, छन्दो, धर्मशास्त्रं, पुराणम्, अर्थशास्त्रं, मीमांसा, न्यायः, आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदश्चेति। तेषां विषये यद्यस्माकं ज्ञानं स्यात् तर्हि वेदार्थावबोधे असौविध्यं किमपि न स्यात्। विद्यास्थानेषु एषु आदौ यत् षड्वेदाङ्गानि सन्ति तेषां ज्ञानमत्यावश्यकम्। तानि ह्यङ्गानि न केवलमङ्गानि अपि तु वेदपुरुषस्यैवाङ्गानि। यैः सम्पूर्णवेदपुरुषो भवति प्रकाशितः। तथाहि उक्तं-

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते। इति।

अतो वेदो यदि पुरुषतुल्यस्तर्हि पादतुल्यं तु छन्दः, कल्पस्तु हस्तकल्पः, ज्योतिषं नेत्रज्योतिः, निरुक्तं श्रोत्रभूतं, घ्राणं तु शिक्षा, व्याकरणञ्च मुखं वेदस्येति।

## २. वेदव्याख्यानं सायणश्च

"इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेद" इति, "अपौरुषेयं वाक्यं वेद" इति च सायणकृताल्लक्षणद्वयादेतदेव प्रतीयते यद् वेदो हि ग्रन्थस्वरूपः, सोऽयं ग्रन्थो वाक्यात्मक इति, वाक्यं खलु पदात्मकं, पदञ्च प्रकृतिप्रत्ययसहयोगेन भवितुमर्हति।

अयमाशयो यद् अपौरुषेयमपि तद्वाक्यं, वाक्यात्मकत्वाद् वेदो हि व्याख्यानयोग्यः। ततः प्राचीनकालत एव बहवो विद्वांसो वेदव्याख्याने प्रवृत्ताः।

जगतां कल्याणपरम्परासिद्धये आविर्भूतानामलौकिकोपायप्रतिपादकानां वेदानां प्रौढानि व्याख्यानान्यासन् प्रत्याख्यातानि प्राचीनकाले। परन्तु देशेऽस्मिन् येषां प्राधान्यम् अस्वीकृतं जातं तेषां व्याख्याभूतं साम्प्रतं पाश्चात्त्यदेशेषु सविशेषम् अधीयमानस्य भाषाविज्ञानस्य मूलभूतं ग्रन्थरत्नं महर्षिणा यास्काचार्येण प्रणीतं निरुक्ताख्यं वेदस्यार्थविचारणायां प्राधान्यं प्राथम्यञ्च दधदिवाधुनापि समुपलभ्यमानं विराजतेतराम्। तत्र प्रदर्शिता वेदतत्त्वपरिशीलनपद्धतिरेव ज्यायसीति विषये को नाम विपश्चित् सन्देहदोलायमानचेता भवेत्। तस्मात् कालादेवाचार्ययास्केन स्वरचिते निरुक्तग्रन्थे पदवाक्यात्मकवेदस्य व्याख्यानं कृतम्। ततः प्रभृति यास्कनिर्दिष्टां शैलीमनुसृत्यैव परवर्तिनि काले बहव एवाचार्या वेदव्याख्याने प्रयुक्ताः। स्कन्दस्वाम्यादिभिरनेकैराचार्यैः ऋग्वेदस्य भाष्यं विरचितम्, उव्वटाचार्यादिभिः शुक्लयजुर्वेदस्य, भवस्वामि-गुहवादिभिः तैत्तिरीयसंहितायाः, माधवभरतस्वाम्यादिभिः सामवेदस्य च प्रामाणिकानि व्याख्यानानि सायणाचार्यात् प्रागेव विरचितान्यासन्। एषामाचार्याणां मध्ये अनेकेषां व्याख्यातृणां व्याख्यानग्रन्थो नोपलभ्यते। किन्तु नामानि सायणभाष्येष्वेवोपलभ्यन्ते। स्कन्दस्वामिविरचितम् ऋग्वेदभाष्यं, गुणविष्णुना निबद्धं कतिपयसामवेदीयमन्त्राणां व्याख्यानमपि, अन्यानि च कानिचिद्व्याख्यानानि साम्प्रतं मुद्रितानि, मुद्र्यमाणानि च सन्ति। परन्तु विरलप्रचाराणि बहूनि नामशेषतां गतानीति निर्विवादम्।

न केवलमेतदेव, अपि तु आधुनिकाः केचन प्राच्याः पाश्चात्त्याश्च विद्वांसः स्वेषां विचारप्रदर्शनाय प्राचीनव्याख्यारीतिमुत्खात्य स्वकपोलकल्पनया वेदस्य व्याख्यानं कृतवन्तः। तेषां मध्ये प्राच्येषु ऋषिररविन्दः, महामहोपाध्यायः सीतारामशास्त्री, दयानन्दसरस्वती इत्यादयो विद्वांसः अस्माकं नयनपदवीं स्पृशन्ति। पुनरपि पाश्चात्त्यानां मध्ये मैक्समूलर-अल्फ्रेड-लुडभिग्-पिशेल-गिल्डनार-रुडलफरथ-ओल्डेनबर्गमहोदया अपि सन्ति आधुनिकपाश्चात्त्यव्याख्याकारेषु।

सर्वमेतद्विचार्य एतदेव वक्तुं शक्यते यत्, सायणो हि वेदव्याख्याकारेषु स्वस्थानमेतादृशमुपकल्पितवान्- "यथा शिखा मयूराणां नागानां मणयो यथा"- तथैव। अन्ये सर्वे एव विद्वांसो व्याख्याकारो वा वेदस्य कियन्तमेवांशं व्याख्यातवन्तः। परन्तु सायणो हि व्यतिक्रमः। मन्त्रब्राह्मणात्मकस्य सम्पूर्णस्य हि वेदस्य व्याख्यानं भाष्यं वा तेन कृतम्। न केनाप्यन्येन। श्रीमता सायणाचार्येण विरचितं यदिदं वेदभाष्यं तदेवाधुना कार्त्स्न्येनोपलभ्यते वेदार्थजिज्ञासुना। इत्थं वेदमन्त्राणां या खलु पारम्पर्येणोपगता व्याख्यानपद्धतिरासीत् तयैव रीत्या मन्त्रार्था निर्दिष्टा वेदभाष्येषु। वेदानामर्थनिर्धारणे सायणाचार्यो यास्काचार्यमेव बहुशोऽनुसरति। निरुक्ते निर्दिष्टानि प्रायः सर्वाण्येव व्याख्यानानि स्वभाष्यग्रन्थे नामनिर्देशपूर्वकं समुद्धरति सायणाचार्यः। एवं नाममात्रतामुपगते निखिलवेदव्याख्यानवाङ्मये

सायणीयवेदभाष्यादेव वयं वेदमन्त्राणां तात्त्विकं प्राचीनाचार्याणामभिमतं च व्याख्यानमवगन्तुं पारयाम इति जागर्ति एव सायणभाष्याणां कियद् गौरवास्पदं माहात्म्यम्, विद्यते एव वेदानुशीलनरतानां कृते तेषां प्रकामं साहाय्यम्।

परन्तु कोऽयं सायणः, को वा तस्य सामान्यपरिचयः, किं वा तस्य माहात्म्यमित्यादयः प्रश्नाः सुतरामेव समुद्भासन्ते। तेषां निराकरणाय यज्ञतत्त्वसुधानिधौ उक्तमाचार्येण स्वयमेव-

तस्या(सङ्गमस्या)ऽभूदन्वयगुरुस्तत्त्वसिद्धान्तदर्शकः।
सर्वज्ञः सायणाचार्यो मायणार्थतनूद्भवः॥
उपेन्द्रस्यैव यस्यासीदिन्द्रः सुमनसां प्रियः।
महाक्रतूनामाहर्ता माधवार्यः सहोदरः॥
अधीताः सकला वेदास्ते च दृष्टार्थगौरवा।
तत्प्रणीतेन तद्भाष्यप्रदीपेन प्रथीयसा॥

इत्यदिना श्लोकेन ज्ञायते यत्तत्र सायणस्य जनको मायनो नाम जननी च श्रीमतीनाम्नी। गोत्रेण स भारद्वाजो बभूव। कृष्णेजुर्वेदस्य तैत्तिरीयशाखा बौधायनसूत्रं च तस्य स्वीये आस्ताम्। तस्य द्वौ भ्रातरौ वेदशास्त्रसम्पन्नौ बृहस्पतिशुक्रसदृशावास्ताम्। अन्येषां विदुषामिव स्वपरिचयप्रदाने तस्य कार्पण्यं नासीत्। तस्मात् सुभाषितसुधानिधावपि उक्तं-

भरद्वाजान्वयभुजा तेन सायणमन्त्रिणा।
व्यरच्यत विशिष्टार्थः सुभाषितसुधानिधिः॥ इति।

आसीन्माधवाचार्यः सायणाचार्यस्य ज्यायान् भ्राता। निखिलेषु पारमार्थिकेषु व्यावहारिकेषु च विषयेष्वस्य शेमुषी नितान्तं सुप्रसरा आसीदिति प्राचीनेतिहासजुषां केषाञ्चन विदुषां नावगतम्। पूर्वोत्तरमीमांसयोर्विस्ताराय धर्मशास्त्रस्य च प्रचुरप्रचाराय बहून् ग्रन्थान् प्रणिनाय श्रीमन्माधवाचार्यः। मीमांसादर्शनोपरि तस्य ज्ञानमासीदगाधवारिधिवत्। तस्य प्रमाणं तु तद्विरच्यते जैमिनीयन्यायमालाविस्ताराख्ये ग्रन्थे एव प्राप्यते।

श्रीसायणाचार्यस्यानुजो भोगनाथोऽभवत्। सङ्गमनरपतेः सचिवश्चासीत्। प्रशस्ति-लेखकस्य भोगनाथस्य आसीदलौकिकी प्रतिभा असाधारणं च नैपुण्यं कविकर्मणीति तु निश्चप्रचं वक्तुं शक्नुमः। परन्तु तद्विरचितसरसकाव्यानामलाभोऽस्माकं नितरां परिखेदस्थानमासीत्।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥

इत्यादिना श्लोकेनाचार्यसायणेन स्वगुरोः परिचयप्रदानं कृतम्। यैरेव वेदैरखिलं जगन्निर्मितं, त एव वेदा यस्य निःश्वासभूता आसन्, स्वयं यो महेश्वरसदृश आसीत् तादृशी विद्यातीर्थाचार्यो हि सायणाचार्यस्य तथा तद्भ्रात्रोश्च गुरुरासीत्।

परमविदुषां विदुषः सोऽयं सायणाचार्यो हि पण्डिताग्रगण्य आसीदिति नास्ति विप्रतिपत्तिः।

यद्वा भवतु सायणाचार्येण वेदचतुष्टयस्य संहिताभागस्य भाष्यरचनात्पूर्वं

भूमिकांशोऽपि रचितः। तत्र यजुर्वेदो द्विविधोऽस्ति- कृष्णयजुर्वेदः शुक्लयजुर्वेदश्च। तस्मात् साकल्येन भाष्यभूमिकापञ्चकं तेन रचितम्। सामान्यतः संहिताभागेषु अभीष्टदेवमुद्दिश्य, अभीष्टफललाभाय स्वकल्याणाय च मन्त्राः सन्निविष्टा वर्तन्ते। तेषामपि मन्त्राणां किं तात्पर्यं भवितुमर्हति येन भाष्यभूमिकया प्रयोजनमस्ति? प्रश्नस्यास्य समाधानमिष्यते चेद् भाष्यभूमिकासु के विषया आलोचिताः तेषां विषये सविशदं ज्ञानमावश्यकमिति कृत्वा भूमिकास्थितविषयाणामालोचनमधस्तात्क्रियते।

## २.१ तैत्तिरीयसंहिताभाष्यभूमिका

सामान्यतो भाष्यभूमिकासु विषयोऽयं सामान्येन विचारितमाचार्येण यत्- किं नाम वेदलक्षणं, किं तावद्वेदस्वरूपं, किं तावद्वेदस्य प्रामाण्यं वेति। अत्रापि आलोच्यमानविषयेषु अस्य व्यतिक्रमो न दृश्यते। ततः चतुर्विधिकर्मणामालोचनम्। द्विविधमुक्तेरालोचनम्। पूर्वकाण्डस्थितदर्शपूर्णमासयागविषयकं सविशदमालोचनं तत्र सरलया गिरा आचार्येण कृतं वर्तते।

## २.२ ऋग्वेदसंहिताभाष्यभूमिका

तत्रादौ ऋग्वेदस्य प्राधान्यमुल्लङ्घ्य कथं यजुर्वेदस्य भाष्यमादावेव कृतमिति विषयेऽस्मिन् सायणाचार्येण स्वमतमुपस्थापितम्। ततो वेदलक्षणादिविषये चर्चा। वेदस्थित-मन्त्राणामर्थवादानां विधिवाक्यानां प्रामाण्यप्रतिष्ठापनाय जैमिनेराचार्यस्य सूत्राणामालोचनम्। मन्त्राणां त्रैविध्यं, वेदस्य वेदत्वं, वेदस्य विषयप्रयोजनाद्यनुबन्धचतुष्टयस्य निरूपणमपि आचार्येण भूमिकांशे एव कृतम्। ततः अपरविद्यारूपाणां वेदस्य शिक्षा-कल्प-व्याकरण-निरुक्त-च्छन्दो-ज्योतिषरूपाणां षडङ्गानां समुद्देशः। पुराणन्यायादिचतुर्दशविद्यास्थानानां वेदार्थज्ञानोपयोगित्वं तथा वेदविद्याग्रहणेऽधिकारिविषयेऽपि तेनान्तिमे आलोचितं विशदेन।

## २.३ सामवेदसंहिताभाष्यावतरणिका

मन्त्रब्राह्मणयोर्लक्षणविचारस्तु सामवेदसंहिताभाष्यभूमिकायामादावेवालोचितम्। सामशब्दस्य गानमात्रवाचित्वप्रतिपादितम्, अक्षरवर्णनं, वर्णवर्णनं, मन्त्राणां स्वरविधानम्, ऊहग्रन्थस्य पौरुषेयत्वापौरुषेयत्वविचारः गायत्र्यादीनां छन्दसां स्वरनिर्णयः, साम्नां विभागः, मन्त्रार्थनिर्णयः, यागेषु गानव्यवस्था, उद्गातृनामकस्य ऋत्विजः कार्यनिर्णयः, संवादसूक्तेषु मन्त्रपाठव्यवस्था, मन्त्रैरर्थानुस्मरणविषये गुरुमतविवेचनमित्यादयो विषयास्तत्र समालोचिताः सविशदम्।

## २.४ काण्वसंहिताभाष्यभूमिका

भाष्यभूमिकायामस्यामादावेव शुक्लयजुर्वेदस्य शाखात्वेन काण्वसंहितायाः

परिचयः, “स्वाध्यायोऽध्येतव्यः” इत्यध्ययनविधेरस्यार्थनिर्णयावसरे प्राभाकरमतं, शङ्करमतं, भाट्टगुरुमतम् इत्यादिमतमुपन्यस्य त्रिविधमन्त्राणां लक्षणनिर्देशः, कर्मकाण्डस्य योग्यताविचारः, दर्शपूर्णमासेष्टिनिरूपणं, मन्त्रार्थज्ञाने ऋषिच्छन्दोदेवताज्ञानस्यावश्यकता इत्यादयो विषया आलोचिताः।

## २.५ अथर्ववेदभाष्यभूमिका

वेदभाष्यभूमिकासु अथर्ववेदभाष्यभूमिका एव प्राथम्येन स्थापिता सायणाचार्येण। क्रत्वपेक्षस्य क्रियाकलापस्य ऋग्यजुःसामवेदैरेव सिद्धत्वाद् अथर्ववेदस्य नास्त्येव आकाङ्क्षेति पूर्वपक्षमतमुत्तरपक्षमुखेन खण्डयति अस्यां भूमिकायाम्। तथा च, अथर्ववेदस्य वेदत्वप्रतिपादनं, “स्वाध्यायोध्येतव्य” इत्यध्ययनविधेः फलनिर्णयावसरे भावनाविषयिणी आलोचना, वेदस्य स्वतःप्रामाण्यप्रतिष्ठायै मीमांसकानां मतं, प्रामाण्यविषये साङ्ख्यानां, सौगतानां, तार्किकाणां च मतानि तथा मीमांसासूत्रैस्तेषां मतानां खण्डनं, शब्दविषये शाब्दिकमतनिरसनं, कर्मणां परिचय इत्यादयः अंशा अपि अस्यां भाष्यभूमिकायां समालोचिताः।

## ३. मीमांसादर्शनम्

कर्मकाण्डमाश्रित्य पूर्वमीमांसादर्शनस्योद्गाता तावद् महर्षिर्जैमिनिः। कर्मकाण्ड-सारोद्घोषकरूपेण तस्याविर्भावकालोऽद्यावधिर्विद्वत्तल्लजानामज्ञातः। मीमांसाया लक्ष्यं धर्मविषयप्रतिपादनमेव। अतो हि मीमांसकाः कर्मवादिनः। ते खलु कर्मैव फलप्रदातृ मन्यन्ते। अत्र हि वेदेषु तद्व्याख्याभूतब्राह्मणभागेषु तदङ्गभूतसूत्रग्रन्थेषु च यान्येव वचनानि याज्ञिकप्रक्रियादृष्ट्या अस्पष्टानि सन्दिग्धानि च तेषां शङ्कासमाधानपूर्वकं स्पष्टीकरणं कृतमस्ति। तथैवात्र याः खलु कर्मकाण्डानुचितरूढयः प्रचलिता आसन् तासां न्याय्यस्वरूपस्य च प्रतिपादनं कृतमस्ति। एतद्धि वैदिककर्मकाण्डसमर्थकमतिप्राचीनं दर्शनम्। एतदनुसारेण कर्मणैव हि अभ्युदयनिःश्रेयसप्राप्तिः कर्मजनितमपूर्वमेव कर्मफलप्रदम्। तदुक्तं-

धर्मे प्रतीयमाने तु वेदेन कारणात्मना।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति॥ इति।

तस्मादेव तादृशस्य दर्शनस्य नामकरणं कथं मीमांसेति जातमिति जिज्ञासायामुच्यते जिज्ञासार्थे मान-धातोः “मानवधदानशाम्भ्यो दीर्घश्चाभ्यासस्य” इति सनि सिद्धान्मीमांसाशब्दो विचारार्थे प्रयुक्तः। शब्दोऽयमस्मिन्नेवार्थे संहिताब्राह्मणादावपि प्रयुक्तः। तेनैवैतत् परीक्षाशास्त्रं न त्वनुशासनम्। शास्त्रं हि प्रवृत्तिनिवृत्त्यन्यतरपरम्। एतच्च स्पष्टमुद्घोषितम्-

कर्तव्यं श्रुतितो विदन्ति मनुजाः कृत्वा लभन्ते फलम्।
निर्दुष्टा श्रुतिरेव मानमपरं तत्सम्मतं मन्यते॥
सूक्तौ साधनमिष्टकामरहितं कर्माग्निहोत्रादिकम्।

नो ईशो न च चित्तवृत्तिरमला ज्ञानं न मीमांसकः॥ इति।

तदिदं कर्मविवेचनापरं वेदोक्तं मीमांसाशास्त्रमपि संहितावदनादिकालादेव प्रवृत्तम्। तथाहि मीमांसाशब्दार्थप्रकाशनायाह "पूजितविचारवचनो मीमांसाशब्द" इति। तथा च, तत्र तत्र संहितासु ब्राह्मणग्रन्थेषु च मीमांसाशब्दस्यासकृत्प्रयोगो दृश्यते। यथा तैत्तिरीयाणाम् "उत्सृज्यां नोत्सृज्यामिति मीमांसन्ते ब्रह्मवादिनः" इति। तथैव ताण्ड्ये "ब्राह्मणं पात्रे न मीमांसन्ते" इति। तथैव कौषीतकीब्राह्मणे "उदिते होतव्यमनुदिते होतव्यमिति मीमांसन्ते", तथा च शतपथे "सैषा मीमांसैवेतरं त्वेव क्रियते" इत्यादि।

एतत्सर्वं विचार्यापि काचिज्जिज्ञासा समुदेति यद्भाष्यभूमिकायां सायणाचार्येण प्रायः सर्वत्रैव जैमिनिप्रणीतपूर्वमीमांसादर्शनस्य सूत्राण्याधारीकृत्य विषयविवेचनं विहितं, कथमिति। तत्र सामान्यतो ज्ञायते यद् "अपौरुषेयं वाक्यं वेद" इति। तस्माद्वाक्यत्वादस्य व्याख्यानयोग्यताऽपि सिद्धा। कारणं तत्र वाक्यं खलु पदात्मकम्। पदञ्च प्रकृतिप्रत्ययाभ्यां सिध्यति। अत्रायं विचारो यत्, प्रकृतिप्रत्ययानां ज्ञानं खलु व्याकरणद्वारेणैव सिध्यति। प्रकृत्या सह प्रत्ययस्य योगेन पदस्य निष्पत्तिर्भवति। तस्मात् पदार्थज्ञानं तु व्याकरणाश्रितम्। पदार्थज्ञाने जाते तु वाक्यार्थज्ञानेऽपि काठिन्यं किमपि नागच्छेत्। ततोऽपि यदि कुत्राप्यसौविध्यं भवेत् तर्हि यास्काचार्येण यन्निरुक्तं प्रणीतं तत्रैव पदानामर्थविवेचनविषये सविशदमालोचितम्। यत्र व्याकरणद्वारा पदार्थनिर्णयो भवितुं नार्हति तत्र निरुक्तद्वारा तस्य समाधानं कर्तुं युज्यते। तर्हि कथं पुनर्वेदस्थितवाक्यानां यथार्थज्ञानाय मीमांसया प्रयोजनमस्ति? कथं वा सायणाचार्येण स्वकृतेषु भाष्यभूमिकासु मीमांसावचनावतरणं विहितम्? वेदार्थप्रकाशनाय कस्तावदुपयोगो मीमांसायाः? इत्येषां सर्वेषां समाधानमधः संक्षेपेण क्रियते।

## ४. वेदभाष्यभूमिकायां मीमांसादर्शनस्योपयोगः

सम्पूर्णो हि वेदवाङ्मयो विविधैर्वाक्यैः परिपूर्णः। सर्वोऽपि वाग्व्यवहार उच्चारणरूपो लेखरूपश्च वाक्यात्मक एव। वाक्यार्थश्च उद्देश्यविधेयभावादिविचारं विना न ज्ञातुं पार्यते। वाक्यार्थनिर्णयश्च विना मीमांसां न सिध्यति। ततश्च निर्णीतं, वाक्यार्थज्ञानाय वेदानुसारिणां मीमांसैवोपयुज्यते। तदुदाहरणं यथा "स्वाध्यायोऽध्येतव्य" इति विधिवाक्यस्यार्थो भवति स्वाध्यायस्याध्ययनं कर्तव्यमस्तीति। परन्तु एतद्व्यतिरिच्य अध्ययनेन कुर्यादित्यपि कश्चनार्थो भवितुमर्हति। यथा च पचतीत्यस्य पाकं करोति, पाकेन करोतीति अर्थद्वयं भवति। तस्मादेवात्र मीमांसाविचारो यदेकस्य अर्थस्याविर्भावो व्याकरणादिशास्त्रेण भवितुमर्हति किन्तु अपरार्थस्य निर्णयस्तु मीमांसया एव कर्तुं शक्यते। अतो मीमांसायाः प्रयोजनमस्त्येव।

ग्रन्थात्मकेऽस्मिन् वेदवाङ्मये एतादृशानि कानिचन वाक्यानि सन्ति येषां वाक्यानामर्थो न परिस्फुट इति पूर्वपक्षिणां मतम्। तत्रोदाहरणत्वेन ते वदन्ति यत् "अक्ता

शर्करा उपदधाति" इति। अत्रायं प्रश्नो यत्, शर्कराया अञ्जनं केन भविष्यति जलेन, घृतेन, तैलेन वा। प्रश्नस्यास्य समाधानं न प्राप्यते इति कृत्वा ते वदन्ति यद् वेदवाक्यानां कोऽप्यर्थो नास्तीति। परन्तु विषयेऽस्मिन् मीमांसावचनमनुसन्धेयम्। मीमांसका आमनन्ति यदत्र वाक्यशेषस्याश्रयो ग्रहणीयः। तस्मात्कोऽयं वाक्यशेष इति जिज्ञासायामुच्यते "प्रकृतवाक्यातिरिक्ते वाक्ये प्रकृतवाक्यार्थोपयोगी पदकदम्बोऽर्थवादाद्यात्मको वाक्यशेष" इति। तस्माद् घृतेनैवाञ्जनं कर्तव्यमिति मीमांसकानां मतम्।

कर्मकाण्डस्थितवेदवाक्यानां मध्ये मन्त्रवाक्यानां किमपि प्रामाण्यं नास्ति। वाक्यश्रवणेनैव सन्देहो जायते, अर्थावबोधस्तु न भवति, बोधे व्याघातोऽनुभूयते। विपरीतार्थबोधेऽपि जायते वेदवाक्यानाम्। "अधस्विदासी३दुपरि स्विदासी३त् "[4] इत्यस्मान्मन्त्राद् अयं स्थाणुर्वा पुरुषो वेति यथा तथा सन्देहो जायते। पुनरपि "ओषधे त्रायस्वैनम् "[5] इत्यत्र ओषधिः, "स्वधिते मैनं हिंसीः"[6] इत्यत्र क्षुरविशेषः, "शृणोत ग्रावाणः"[7] इत्यत्र पाषाण इत्यादयः अचेतनाः पदार्थाः कथं चेतनरूपेण परिगणिता भवितुमर्हन्ति।

पुनः "एक एव रुद्रो न द्वितीयाय तस्थे"[8] तथा "सहस्राणि सहस्रशो ये रुद्रा अधिभूम्याम् "[9] इत्यनयोस्तु मन्त्रयोः व्याघातबोधकत्वादप्रामाण्यमिति विरोधिपक्षस्य मतम्।

तन्मतं निरसयितुमाचार्यसायणेन पुनर्मीमांसायाः साहाय्यं गृहीतम्। तद्यथा "ओषधे त्रायस्वैनम् " इत्यादौ ये दोषाः प्रदर्शिताः पूर्वपक्षिणा तत्र दोषस्यावकाश एव नास्ति। "शास्त्रयोनित्वाद्" इत्यादिना सूत्रेण आचार्येण जैमिनिना प्रणीतं यत्, शास्त्रं हि योनिर्येषां ते शास्त्रयोनयः। तस्माद् ब्रह्मस्वरूपात्मकेऽस्मिन् शास्त्रे ये खलु सम्बोधिताः, ते सर्वे एव ब्रह्मवच्चेतनभूताः।

व्याहतार्थबोधकस्योदाहरणं यदिदमुक्तं पूर्वपक्षिभिस्तदप्यसाधुरेव। "गुणादविप्रतिषेधः स्यात्।"[10] इत्यादिना सूत्रेण आचार्येण प्रतिपादितं यद्यथा "त्वमेव माता च पिता त्वमेव" इत्यत्र गौणप्रयोगाद् अविरोधस्तथैव एकरुद्रदेवत्ये कर्मणि एको रुद्रः शतरुद्रदेवत्ये शतं रुद्रा अविरोधेनेति। तस्मात् मीमांसकमतमाश्रित्यैव आचार्यसायणेन मन्त्राणां विरोधस्य खण्डनं विहितम्।

पुनरपि ग्रन्थात्मकेऽस्मिन् वेदे बहूनि वाक्यानि सन्ति- विधिवाक्यमर्थवादवाक्यं निषेधवाक्यमित्यादीनि। परन्तु तेषां प्रामाण्येनार्थावगतिस्तु व्याकरणादिशास्त्रैर्न

[4]ऋ.सं.१०/१२९/५

[5]तै.सं.१/२/१/१

[6]तै.सं १/२/१/१

[7]१/२/१३/४

[8]तै.सं १/८/६/८

[9]तै.सं.४/५/११/१

[10]जै.१/२/४७

भवति। अतस्तेषां प्रामाण्यप्रतिष्ठापनाय अर्थपरिष्करणाय तु मीमांसया प्रयोजनमस्ति। तस्मादेवाचार्येण सायणेन वेदभाष्यभूमिकासु मीमांसावचनानां विचारः कृतः। तत्र वेदे कानिचन मन्त्रवाक्यानि सन्ति येषां प्रामाण्यं नास्तीति अनेकेषां मतिः। "अनधिगतार्थगन्तृ प्रमाणम्" इति प्रमाणलक्षणद्वारा एतद्भवति प्रतिपादितं यत् पदस्य यथार्थज्ञानं यः कारयति तत्प्रमाणमिति। परन्तु मन्त्रवाक्यस्य प्रामाण्यं नास्ति। तद्यथा "अम्यक्सा त इन्द्र ऋष्टिः" इत्यस्य मन्त्रस्य कोऽप्यर्थो नास्ति। परन्तु न तथा, यास्केन निरुक्तग्रन्थे मन्त्राणामर्थोऽवबोधितः। तस्मात् परिचयरहितानामनवबोधो न मन्त्राणां दोषमावहति। अत एवात्र लौकिकं न्यायमुदाहरन्ति "नैष स्थाणोरपराधो यदेतमन्धो न पश्यति, पुरुषापराधः स भवति।"

पुनरपि "ऊरु प्रथस्व" इति मन्त्रेण पुरोडाशप्रथनमभिधीयते "पुरोडाशं प्रथयति" इति ब्राह्मणेनापि तदेवाभिधीयते। तथा सति मन्त्रेणैव प्रतीतत्वात् तदर्थबोधनाय प्रवृत्तं ब्राह्मणमनर्थकं स्यादिति प्रश्नः। अस्यैव समाधानं निगदता आचार्यजैमिनिना सूत्रितं "अर्थवादो वा" इति। अत्र सूत्रस्थितो वाशब्दो वैयर्थ्यं वारयति। अस्त्यत्र अर्थवादः "यज्ञपतिमेव तत् प्रथयति" इति। तेन अर्थवादेन सम्बन्धाय ब्राह्मणे विधिः पठ्यते। ननु प्रथयति इत्यनेन विधिशब्देन प्रथनमनूद्य "यज्ञपतिमेव" इत्यादिना अर्थवादेन स्तोतव्यम्। तदेव तु प्रथनं कुतः प्राप्तमित्याशङ्क्योत्तरं सूत्रयति "मन्त्राभिधानाद्" इति। अध्वर्युः पुरोडाशमुद्दिश्य मन्त्रे प्रथस्व इत्येवमभिधत्ते। तस्मादभिधानादध्वर्युकर्तृकं प्रथनं प्राप्तम्। यथा, लोके यः कुरु इति ब्रूते स कारयत्येव, तथा अत्रापि यः प्रथस्व इति ब्रूते स प्रथयति इत्यर्थो भवति। अयमेव तावन्मीमांसासिद्धान्तः।

पुनरपि

चत्वारि श्रृङ्गा त्रयो अस्य पादा
द्वे शीर्षे सप्त हस्तासो अस्य।

इति मन्त्र आम्नायते। परन्तु यदि दृश्यते यन्मन्त्रस्यास्य विधिसम्मतः कोऽप्यर्थो नास्ति। न खलु चतुःश्रृङ्गाद्युपेतं किञ्चिद्यज्ञसाधनं विद्यते यन्मन्त्रपाठेनानुस्मर्येत। तथापि यद्यस्माभिः कल्प्यते यच्चतुःश्रृङ्गाद्युपेतः कश्चिद्देवोऽस्तीति तदपि भवितुं नार्हति। कारणं हि न तस्य किञ्चिद्यज्ञसाधनता विद्यते यन्मन्त्रपाठेनानुस्मर्येत। परन्तु मतमिदं न समर्थनयोग्यमिति कथयति मीमांसा। तथाहि सूत्रितमाचार्येण जैमिनिना "अभिधानेऽर्थवाद" इति। असतोऽर्थस्य अभिधायके वाक्ये गौणस्यार्थस्योक्तिर्द्रष्टव्या। तद्यथा- "चत्वारो होत्रध्वर्यूद्गातृब्रह्माणोऽस्य कर्मणः श्रृङ्गाणि, प्रातःसवनादयस्त्रयः अस्य पादाः, पत्नीयजमानौ द्वे शीर्षे, गायत्र्यादीनि सप्तच्छन्दांसि हस्ताः, ऋगादिभिस्त्रिभिर्वेदैस्त्रेधा बन्धनम्। कामान् वर्षतीति वृषभः, रोरवीति इति स्तोत्रशास्त्रादिशब्दान् पुनः पुनः करोति, महो देवः सोऽयं प्रौढो यज्ञरूपो देवो मर्त्यान् आविवेश" इति मनुष्या एव मन्त्राधिकारिणः। एवमेव "ओषधे त्रायस्व" "श्रृण्वन्ति ग्रावाण" इत्याद्यचेतनसम्बोधनानि स्तुतिपरत्वेन योजनीयानि। यस्मिन् वपने ओषधिरपि त्रायते तत्र

वपनकर्ता त्रायत इति वक्तव्यम्। तथा ग्रावाणोऽपि प्रातरनुवाकं शृण्वन्ति किमुत विद्वांसो ब्राह्मणा इतीत्थम् आमन्त्रणाभिप्रायः।

न केवलमेतदेवापि तु बहुत्रैव मन्त्रभागस्य प्रामाण्यप्रतिष्ठापनाय, अर्थनिर्णयाय च मीमांसायाः साहाय्यं सायणाचार्येण गृहीतमेव। यदि मन्त्राणां स्वार्थे प्रामाण्यं न स्वीक्रियते तर्हि तस्य लक्षणया अर्थस्वीकारः कर्तव्य इति मीमांसकीयमतम्। तथाह्युक्तं जैमिनीयन्यायमालाविस्तरे-

मन्त्रा ऊरु प्रथस्वेति किमदृष्टैकहेतवः।
यागेषूत पुरोडाशप्रथनादस्य भासकाः॥
ब्राह्मणेनापि तद्भानान्मन्त्राः पुण्यैकहेतवः।
न तद्भानस्य दृष्टत्वाद् दृष्टं वरमदृष्टतः॥ इति।

अन्यत्र पुनरपि वेदवाक्यस्थितेषु अर्थवादवाक्येष्वपि कानिचन वाक्यानि सन्ति येषां प्रामाण्यं नास्तीति सामान्यतः प्रतीयते। परन्तु तथा भवितुं नार्हति इति मीमांसकानां राद्धान्तः। अर्थवादस्य भागत्रयमस्ति- गुणवादः, अनुवादः, भूतार्थवादश्च। तत्र अर्थवादवाक्यानां नाम गुणवादवाक्यानामनुवादवाक्यानां स्वार्थे प्रामाण्यं यद्यपि नास्ति तथापि भूतार्थवादस्य स्वार्थे प्रामाण्यमस्त्येव। तस्माद् गुणानुवादानां स्वार्थे प्रामाण्यं न स्वीक्रियते चेन्नास्ति हानिः, लक्षणया तेषां स्वार्थे प्रामाण्यं स्वीकर्तुं युज्यते इति मीमांसकमतम्।

अन्येषु केषुचिदर्थवादेषु मानान्तरविरोधदर्शनादप्रामाण्ये सति तद्दृष्टान्तेन सर्वेषामपि अर्थवादानामप्रामाण्यमिति। तद्यथा "स्तेनं मनोऽनृतवादिनी वाग्" इत्यत्र श्रूयमाणं मानसं चौर्यं वाचिकमनृतवदनं च प्रतिषेधशास्त्रेण विरुद्धम्। "तस्माद् धूम एव अग्नेर्दिवा ददृशे नार्चितस्तस्मादर्चिरेवाग्नेर्नक्तं ददृशे धूमः" इत्यत्र दृष्टविरोधः। तथा न "चैतद्विद्मो वयं ब्राह्मणा वा स्मोऽब्राह्मणा वा" इत्यत्रापि प्रत्यक्षविरोधः। "को हि तद्वेद यद्यमुष्मिन् लोकेऽस्ति वा न वा" इत्यत्र शास्त्रदृष्टविरोधः। तस्माद् विरोधादर्थवादानामप्रामाण्यं भवतीति सिद्धम्।

अर्थवादवाक्यं नाम प्राशस्त्यवाक्यम्। यदि कस्यापि प्रशंसा श्रूयते तर्हि तस्मिन्नेव कर्मणि मनुष्याः प्रवृत्ता भवन्ति। कारणं हि प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति वाक्याज् ज्ञायते यत् प्रयोजनहीने न कश्चन मूर्खोऽपि कर्मणि प्रवर्तते। तस्यैव कर्मणो यदि प्रशंसा क्रियते तर्हि तस्मिन् कर्मणि मनुष्याः प्रवर्तेरन्निति तादृशस्यैवार्थवादवाक्यस्य यदि प्रामाण्यं न स्यात्तर्हि वेदवर्णिते यागकर्मणि कोऽपि न प्रवृत्तो भवेत्। तस्यैव अर्थवादवाक्यस्य प्रामाण्यप्रतिष्ठापनाय सततं यतमाना मीमांसका विरोधानामपाकरणाय सूत्राण्यपि रचयामासुः।

ननु शास्त्रदृष्टविरोधाच्च इत्येवमर्थवादेषु या अनुपपत्तिरुक्ता तस्या अपाकरणाय सूत्रितं जैमिनिना "अप्राप्ता चानुपपत्तिः, प्रयोगे हि विरोधः स्याच्छब्दार्थस्त्वप्रयोगभूतस्तस्मादुपपद्येत" इति। तस्मात् "स्तेनं मनोऽनृतवादिनी वाग्" इत्यादौ शास्त्रविरोधरूपो यो दोषः प्रदर्शितस्स तु अर्थवादवाक्यस्य नापतति। कारणं तत्र वेदवाक्यस्यास्य मुख्यार्थत्वं न

स्वीकर्तव्यम्। वाक्यस्यास्य मुख्यार्थस्य तात्पर्यं खलु स्तुतिरूपे लक्ष्यार्थे एव वर्तते। तस्मात् स्तुत्यर्थप्रकाशनमेवार्थवादवाक्यस्य प्रधानवैशिष्ट्यम्। अतो न कथमपि शास्त्रविरोधः सङ्गच्छते। सूत्रस्यास्य भाष्ये शबरस्वामिना तदेव स्पष्टीकृतं "प्रयोगे हि स्तेयादीनामुच्यमाने विरोधः स्यात् शब्दार्थस्त्वप्रयोगभूतः। तस्मादुपपद्यते स्तेनं मनोऽनृतवादिनी वागिति" इति।

इत्येवं प्रकारेण वेदस्थितानां मन्त्राणामर्थवादवाक्यानां किमपि प्रामाण्यं कोऽपि अर्थो वा नास्तीति यदुक्तं पूर्वपक्षिभिस्तेषां यवनानां नास्तिकानां मतानि सर्वाण्येव मीमांसायां खण्डितानि। तस्मादेवाचार्येण सायणेन वेदभाष्यभूमिकासु वेदस्थितानां वाक्यानां पदानां वाऽर्थनिर्णये मीमांसावचनस्य सहायतां स्वीकृतवान्।

न केवलमेतदेव अपि तु विधिवाक्यानामेव प्रामाण्यं नास्तीति केषाञ्चन नास्तिकानां राद्धान्तः। ते उदाहरणपुरःसरं विधिवाक्यानामप्रामाण्यप्रतिष्ठापनाय तथा आनर्थक्यप्रतिपादनाय कथयति यत् "जर्तिलयवाग्वा वा जुहुयाद् गवीधुकयवाग्वा वा" इति कर्मकाण्डगतानां विधीनां नास्ति प्रामाण्यम्। कथमिति जिज्ञासायामुच्यते प्रवृत्त्ययोग्यद्रव्यविधानेन सम्यगनुभवसाधनत्वाभावादिति। अपि तु "अतिरात्रे षोडशिनं गृह्णाति" इति विधिः "नातिरात्रे षोडशिनं गृह्णाति" इति निषेधेन बाध्यते।

परन्तु एषां विधिवाक्यानां प्रामाण्यमस्त्येव। विषयेऽस्मिन् यद्यपि सायणाचार्येण सविशदं किमपि नोल्लिखितं तथापि जैमिनिना धर्मलक्षणाधिकरणे नाम "चोदनालक्षणोऽर्थो धर्म" इति सूत्रे तथा चोदनाप्रामाण्याधिकरणे "औपपत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वाद्" इत्यादिषु औपपत्तिकसूत्रेषु तत्प्रामाण्यं समर्थयामास। पुनः "शास्त्रयोनित्वाद्" इत्यस्मिन् सूत्रे वेदान्तानां ब्रह्मणि प्रामाण्यं प्रतिज्ञाय, "तत्तु समन्वयाद्" इत्यादिसूत्रैः समर्थयामास। तस्माद् अमीमांसकस्य तव पूर्वोक्तस्थाण्वन्धन्यायो दुष्परिहरः। अतो विधिभागस्य प्रामाण्यं सुस्थितम्।

एतावत्पर्यन्तमस्माभिर्यदेवालोचितं तत्समीक्ष्य वक्तुं शक्यते यद् वेदभाष्यकारेषु आचार्यसायणो हि अग्रगण्यः। तद्विरचितेषु वेदभाष्येषु ब्राह्मणात्मकेषु या खलु भाषा तेन समाश्रिता तत्र काठिन्यं नोपलभ्यते। सरलया गिरा तेन सर्व एव प्रतिपादितो वर्तते मन्त्राणामर्थः। अत्र भाष्यविरचनात् पूर्वमाचार्येण येयं भाष्यभूमिका विरचिता तस्यापि माहात्म्यं किमप्यस्तीति स्वीकर्तव्यमेव। कारणं भूमिकासु एव विषयवस्तुनो मूलभावोऽधृतो भवति। ग्रन्थात्मकेऽस्मिन् वेदे सहस्रशो मन्त्राः सन्ति। तेषां वाक्यत्वमपि भवति सिद्धम्। वाक्यत्वात्तेषां व्याख्यानयोग्यता अस्त्येव। अतो व्याख्यानवेलायामाचार्येण सायणेन दृष्टं यद् वेदस्थितानां वाक्यानां मध्ये कानिचन विरोधात्मकानि वाक्यानि सन्ति। परन्तु वेदवाक्येष्वेव यदि विरोधो दृश्यते तर्हि महती विप्रतिपत्तिः समापतेत्। वेदस्य प्रामाण्यमेव नोपस्थापयितुं शक्यते। तस्मादाचार्येण मीमांसायाः साहाय्यं गृहीतम्। वाक्यगतानां पदानामर्थप्रतिपादनविधौ वेदाङ्गषट्कस्योपयोगो वर्तते एव। पदशास्त्रं तावद्व्याकरणं, पदार्थशास्त्रं

तावन्निरुक्तं, तथापि ताभ्यां वेदार्थज्ञानं स्पष्टतया न भवति। दृष्टविरोधः शास्त्रविरोधः प्रत्यक्षविरोधः इत्येतादृशा विरोधा अत्र समापतन्ति। तस्य निराकरणं खलु न व्याकरणेन नापि निरुक्तेन भवितुमर्हति। तस्मात्तन्निराकरणेनाचार्यसायणेन मीमांसायाः सहायता गृहीता। मीमांसामाध्यमेनैव सर्वेषां विरोधानां निराकरणं भवति। तस्माद् अन्ते एतदेव वक्तुं शक्यते यत्, सायणाचार्यविरचितासु भाष्यभूमिकासु मीमांसावचनविचारस्य अपेक्षा अस्त्येवेति शिवम्।

✦✦✦

## परिशीलितग्रन्थसूची


1. वेदभाष्यभूमिकासङ्ग्रहः, सायणाचार्यविरचितः, सम्पादकः- पण्डितबलदेवउपाध्यायः, प्रकाशकः- चौखम्बा संस्कृत सीरिज ऑफिस, वाराणसी- १, १९५८
2. शाबरभाष्यम्, श्रीमच्छबरस्वामिप्रणीतम्, व्याख्याकारः- म.म.डॉ गजाननशास्त्री मुसलगाँवकर, प्रकाशकः- चौखम्बा संस्कृत सीरिज ऑफिस, वाराणसी- १, २००४
3. र.तङ्गस्वामिशर्मा, मीमांसामञ्जरी, भारतदार्शनिकानुसन्धानपरिषत्प्रकाशिका, १९९६
4. भट्टाचार्य सुखमय, पूर्वमीमांसा दर्शन, पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, १९८३(वङ्गभाषायाम्)
5. मीमांसाश्लोकवार्तिकम्- भट्टकुमारविरचितं, व्याख्याकारः- पण्डितदुर्गाधरझा, कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः, दरभङ्गा, १९७९
6. मीमांसादर्शनम्,सम्पा. भूतनाथसप्ततीर्थः, वसुमतीसाहित्यमन्दिरम् (वङ्गभाषायाम्)
7. जैमिनीयन्यायमालाविस्तरः, श्रीमाधवाचार्यविरचितः, सम्पादकः- जीवानन्दविद्यासागरभट्टाचार्यः, कृष्णदास अकादमी, वाराणसी, १९८९
8. दाहालः लोकमणिः, संस्कृतसाहित्येतिहासः, भारतीय- विद्याप्रकाशनम्

# शिक्षणे सम्प्रेषणस्य प्रभावः

(संस्कृतदृष्टिकोणतः)

शिवरामभट्टः*

## १. शिक्षणम्

मानवः परिवारविद्यालयकार्यालयसमाजवातावरणादिभ्यः सर्वदा यत्किमपि शिक्षमाणो भवति। अतः शिक्षणं निरन्तरं प्रवर्तमाना काचन सामाजिकप्रक्रिया विद्यते। गृहे परिवारमाध्यमेन विद्यालये शिक्षकमाध्यमेन समाजे समाजमाध्यमेन वातावरणे परिसरमाध्यमेन च विषयाणामधिगमार्थं शिक्षणं मानवान् प्रेरयति। एवं जन्मतः आरभ्य मृत्युपर्यन्तं येन केनापि प्रकारेण यत्किमपि शिक्षते तत् शिक्षणमित्युच्यते सारांशरूपेण। एतादृशशिक्षणं सम्प्रेषणं विना न सम्भवत्येव। अतः विषयाणामधिगमे शिक्षणप्राप्तौ वा सम्प्रेषणस्य महती आवश्यकता वरीवर्ति। तर्हि किं नाम सम्प्रेषणमित्यग्रे विचार्यते।

## २. सम्प्रेषणम्

विचाराणां सूचनानां वा आदानं प्रदानञ्च भवति सम्प्रेषणम्। संदेशवह्यमित्यपि वर्ततेऽस्य नामान्तरम्। शिक्षणाधिगमप्रक्रियायां सम्प्रेषणं माध्यमरूपेण कार्यं निर्वहति। विचाराणां सूचनानां वा सम्प्रेषणेनैव परस्परावगमनं परस्परसम्बन्धस्थापनञ्च भवति। सम्प्रेषणं विना शिक्षणस्य कल्पनाऽपि कर्तुं न शक्यते। अतः शिक्षणक्षेत्रे सम्प्रेषणस्य महन्महत्त्वं वरिवर्ति। एवं च सम्प्रेषणं तादृशः कश्चन माध्यमः येन समुचितरीत्या या काऽपि वा सूचना प्रदातुं शक्यते। सम्प्रेषणकौशलस्य पञ्च मुख्याङ्गानि सन्ति। यथा- श्रवणं भाषणं पठनं लेखनम् अशाब्दिकसङ्केतश्चेति। सम्प्रेषणं यदि उत्तमं कौशलयुतं स्यात्तर्हि अधिगमः शिक्षणं वा प्रभावि भवति। अतः परस्परोत्तमसम्बन्धस्थापने सम्प्रेषणकौशलमपि स्वकीयं स्थानमावहति।

### २.१ सम्प्रेषणस्य परिभाषाः

### २.१.१ लीगन्समहोदयः

सम्प्रेषणं काचन प्रक्रिया भवति यया द्वौ द्व्यधिका वा जना विचाराणां तथ्यानां भावनादीनाञ्च परस्परविनिमयं कुर्वन्ति येन सर्वे प्राप्तसन्देशान् अवगच्छन्ति। सम्प्रेषणे सन्देशदातुः सन्देशग्रहीतुश्च मध्ये सन्देशमाध्यमेन समन्वयः संस्थाप्यते इति।

*सहायकाचार्यः, कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य, महाराष्ट्रेषु रामटेकस्थस्य

## २.१.२ लूईस ए. ऐलनमहोदयः

स्वकीयविचारधारा व्यक्तेः व्यक्तिद्वयस्य वा मस्तिष्कं प्रापयितुं सम्प्रेषकः येषां साधनानामुपयोगं करोति तानि एव सम्प्रेषणपदवाच्यानि भवन्ति इति।

## २.१.३ लूगीसवीगलमहोदयौ

येन सामाजिकव्यवस्थायां विद्यमानसूचनाभिः निर्देशैः निर्णयैः च जनानां विचारेषु मतेषु अभिवृत्तिषु च परिवर्तनं सम्पादयितुं शक्यते तत् सम्प्रेषणम् इति।

## २.२ सम्प्रेषणतत्त्वानि

- ☛ सम्प्रेषकः (Sender)- यः सूचनाः विचारांश्च सम्प्रेषयति सः।
- ☛ प्राप्तिकर्ता (Receiver)- यः सूचनाः विचारांश्च प्राप्नोति सः।
- ☛ विषयः (Subject)- प्रेषयितुं योग्यः कश्चन विचार एव।
- ☛ चिह्नम् (Symbol)- सम्प्रेषकः विषयं प्रेषयितुं याः शब्दनेत्रादिमुद्राः प्रयुङ्क्ते ताः।
- ☛ शृङ्खला (Channel)- या विषयस्य आदानप्रदानार्थं भिन्नभिन्नविभागेषु व्यक्तिषु वा उपयुज्यते सा।
- ☛ प्रतिक्रिया (Reaction)- विषयं सम्प्राप्य प्रत्युत्तरम्।

## २.३ सम्प्रेषणस्य प्रकाराः

शाब्दिकम् अशाब्दिकं शाब्दिकाशाब्दिकम् इति त्रिविधम्। तत्राशाब्दिकं मौखिकं लिखितं पठनचेति त्रिविधम्। अशाब्दिकं नेत्रादिमुखमुद्रकं, स्पर्शसम्पर्कः, इति द्विविधम्। तृतीयं श्रवणम्।

## २.४ शिक्षणे सम्प्रेषणस्य प्रभावः

शिक्षणक्षेत्रे सम्प्रेषणं छात्राध्यापकयोः उत्तमं सम्बन्धं स्थापयति। शैक्षिकोद्देश्यानां प्राप्तये सम्प्रेषणमत्यन्तं सहायकं च भवति। शिक्षणे शिक्षकः सन्देशदाता छात्रश्च सन्देशग्रहीता च भवति। अत्र सन्देशो नाम पाठ्यक्रमः पाठ्यसहगामिनी क्रिया वा भवति। शिक्षकश्छात्रेषु विषयवस्तु स्पष्टयितुं शैक्षिकसम्प्रेषणे शाब्दिकाशाब्दिकयोः द्वयोरपि सम्प्रेषणयोः प्रयोगं प्रभाविरूपेण कर्तुं प्रयतते। एतेन तस्य शिक्षणं सफलं प्रभावि च जायते। प्रभाविशिक्षणार्थं प्रभाविशैक्षिकसम्प्रेषणम् अनिवार्यं भवति।

कुशलः शिक्षकः छात्रेभ्यः भिन्नभिन्नप्रकारान् आदेशान् निर्देशांश्च प्रददत् भवति। अकुशलः शिक्षक उत्तमं सम्प्रेषणं कर्तुं न शक्नोति। यदि सम्प्रेषणम् उत्तमं न भवति तर्हि शिक्षणं सम्यक् न भवति। तेन च्छात्राणामादानप्रदानसामर्थ्यं कुण्ठितं भवति। अतः सम्यक्

सम्प्रेषणमेव सम्यगध्यापनं शिक्षणं च। एवं कुशलोऽध्यापकः सम्प्रेषको भवति। इत्थम् उत्तमं सम्प्रेषणं छात्रान् सङ्घटितुम् अधमं सम्प्रेषणं छात्रान् विघटितुं च शक्नोति। तत्र सम्प्रेषक एव निदानम्।

शिक्षकः सम्प्रेषणानां प्रयोगं कृत्वा छात्रान् विषयवस्तु अवगमय्य साफल्यप्राप्तये प्रयतते। यावत्पर्यन्तं शिक्षकः सम्प्रेषणकलायां निपुणो न भवति तावत्पर्यन्तं स स्वीयशिक्षणं सक्रियं कर्तुं न शक्नोति। अतः शिक्षकः सम्प्रेषणकलायां निपुणः स्यात्। तथा सति च्छात्राः शिक्षकस्य पुरतः स्वसन्देहान् प्रस्तूय समाधानं प्राप्नुवन्ति। कठिनानवगम्यविषयाणां स्पष्टतां प्राप्तुं समर्था भवन्ति च्छात्राः। शिक्षकोऽपि सम्प्रेषणमाध्यमेन स्वशिक्षणस्य प्रतिपुष्टिं प्राप्नोति। स्वशिक्षणं प्रभावि कर्तुं च शक्नोति। एवं शिक्षणक्षेत्रे सम्प्रेषणस्य महान् प्रभावो वरीवर्ति।

# ३. संस्कृतशिक्षणे सम्प्रेषणम्

संस्कृतवाङ्मये संस्कृतशिक्षणं भिन्नभिन्नसम्प्रेषणमाध्यमेन विहितं वर्तते। वेदाः, शास्त्राणि, पुराणानि, साहित्यादीनि च विभिन्नसम्प्रेषणानि आवहन्ति। यतः शब्दार्थावगमने किञ्चन सम्प्रेषणं भिन्नम्। केवलं शब्दानां पठने सम्प्रेषणं भिन्नम्। कालावगमने व्युत्पत्तिशिक्षणे च भिन्नं भिन्नं सम्प्रेषणं प्रयुक्तं वर्तते। यथा- कश्चन शब्दार्थसम्बद्धः विषयः व्युत्पत्तिकपूर्वकः अवगन्तव्यः चेत् सूत्रसम्प्रेषणमूलकं बोध्यते। स एव विषयः प्रश्नोत्तरमाध्यमेन बोद्धव्यश्चेत् वाकोवाक्यसम्प्रेषणमूलकं प्रतिपाद्यते। एवमेव कश्चन विषयः रसभरितः चमत्काररूपेण वर्णनीयश्चेत् श्लोकरूपसम्प्रेषणेन बोध्यते। यदि वेदानां केवलं पठनसम्प्रेषणं कर्तव्यं तर्हि संहितापदक्रमजटादिभिः अनेकैः पाठैः क्रियते। एवं प्राचीनैः महर्षिभिः विषयबोधनाय स्वबुद्धिचातुर्यमुपयुज्य अनेकानि सम्प्रेषणानि प्रयुक्तानि सन्ति। तैः विषयज्ञानं दृढं शाश्वतञ्च भवति।

# ४. निष्कर्षः

आधुनिकसंस्कृतशिक्षणक्षेत्रे समुचितसरलप्रभाविसम्प्रेषणस्य महती आवश्यकता वर्तते। यद्यपि प्राचीनैः महर्षिभिः अनेकानि सम्प्रेषणानि आविष्कृतानि सन्ति। परन्तु कालानुगुणं तेषां सरलीकरणं परिवर्तनं च अपेक्ष्यते। तेन संस्कृतशिक्षणक्षेत्रे तन्मूलकमितरशिक्षणक्षेत्रे च महान् प्रभावः स्यात्। अधीयानाः छात्राः सुसंकृता नूतनाविष्करणसमर्था दक्षाः प्रभावशालिनश्च स्युरिति विचिन्त्यते। एवं शिक्षणक्षेत्रे सम्प्रेषणस्य महान् प्रभावो वरीवृत्यते इति शम्।

✦✦✦

# परिशीलितग्रन्थाः

1. Sharma A.R., Education Technology
2. Yadav R.S., Advanced Educational Technology
3. मिश्रः रमाकान्तः, शैक्षिक प्रविधिः, चौखम्बा सुरभरती प्रकाशन, वाराणसी, २००६
4. माथुर एस्.एस्., शैक्षिक तकनीकी, आग्रा प्रकाशन
5. मित्तल सन्तोष, शैक्षिक तकनीकी, हिन्दी अकादमी, जयपुर
6. शर्मा बी.एल् तथा सक्सेना आर्.एन्.,सूर्या यु.जी.सी. शिक्षाशास्त्र, आर.लाल बुक डेपो, मेरठ, २००७

# Contemporary Relevance Of *ADVAITA VEDĀNTA*

Satheesha K S*

*Advaita Vedānta* or Absolute Non-dualism is an idealist system of monastic thought that identifies the Supreme soul with the individual soul, expounded by *Śaṅkara,* the great Indian philosopher. It constitutes an integral part of the rich heritage of India. It has been the pregnant philosophy of Indian sub-continent for the last two millennia.

The central theme of *Advaita Vedānta* may be summarized this way – *Brahman* alone is real; everything else is unreal, *Mithyā*, super imposed in the *Brahman; Jīva* in his essential nature is no other than *Brahman*. The world is not real since it is a projection of unreal *Māyā*. It is however real enough for practical purposes.

*Advaita Vedānta* provides an answer to the major problems which confronts today. One of the major problems of today is the problem of caste distinction and religious harmony in a pluralistic society.

Usually religion does not lead to religious disharmony. Forces outside religion exploit the ignorance and of the common man generate communal hatred. *Advaita Vedānta* always teaches unity in diversity. India has a unique heritage which looked at the entire humanity as one spiritual entity. This all comprehensiveness had its foundation on *Advaita Vedānta*. There is scope for a perfectly human ethics in *Advaita Vedānta*. It says that there are only four kinds of bodies born out of womb, egg, moisture and soil. So in the ideological realign there is little scope are caste distinction.

At the religious level *Advaita* holds the view that *Ekaṃ sadviprā bahudhā vadanti* indicating only one *Īśvara* has many forms. In his commentary on the *Brahmasūtra, Śaṅkara* observes that *Brahman* is known in two ways- *saguṇa* and *nirguṇa* – one which is associated with attributes and the other without any attributes. The *saguṇa* will accommodate the different forms like *Śiva, Viṣnu* and so on, and worshiped by the followers of different sects. There is no place for quarrel between the followers of two different sects, because both of them according to *Śaṅkara* worship the same

*Assistant Professor, Dept. of *Advaita Vedānta*, SLBSRS Vidyapeeth, Qutub institutional area, New Delhi-16

God. The implication here is that the logic the logic which holds good in respect of the different sects of Hinduism also holds well with regard to the different religions like Islam, Christianity, and so on. Therefore there is no place for disharmony.

Besides *Advaita Vedānta* advocates mental control by practicing *śama, dama* etc. It will enable one to lead a harmonious social life. So the *Advaita Vedānta* is an effective weapon against social evils such as castism, untouchability and religious intolerance. *Śaṅkara* in his *Manīṣā Pañcaka* states that a *Caṇḍāla* and a *Brāhmaṇa* are same for him.

At the theistic level, which is called *pāramārthika avasthā* the God has no name and form. As stated by *Gauḍapādācārya* that supreme *Brahman* is described by the *śruti* as *saguṇa* for easy understanding.

Since all religions, being the pathways to God, are equally valid, there is no question of superiority or inferiority among them. Hence, the *Advaita Vedāntic* view can solve the problem of disharmony.

Another problem of today is the problem of Alienation from oneself. Alienation from oneself is the greatest tragedy of man. Absorbed in the things of the world and overwhelmed by a busy schedule of daily life, the modern man is forgetful of the self which is not only closest to him, but also his essence. The human being is a complex entity consisting of the self and the material adjunct. Under the spell of ignorance, not only does he not know the self, but also thinks of the net-self as the self, identifies himself with it, and carries on his daily life as the subject of knowledge, the agent of action, and the enjoyer of the consequences of his action. Never inquiring in to the 'I' which points to the self, he identifies the 'I' with the body when he says, 'I am stout', and so on; with the senses when he says, 'I am blind', and so on; and with the mind when he says, 'I am happy', and so on. Not only does he say so, but also acts on that basis. The self for which the 'I' stands remains untouched by stoutness, blindness and happiness which are the qualities respectively of the body, the sense organ, and the mind. Ignorance of the self leads to alienation from the self, which in its turn is the cause of the manifold suffering. To overcome this alienation it is first of all necessary to know that the self is different from the mind-sense-body complex. This initial preparation recommended by *Advaita Vedānta* is called *nityānitya-vastu-*

*viveka* and this discriminative awareness is the first step towards sanity. Intellectual conviction about the self arising from its mediate knowledge is not enough to regain the self. Mediate knowledge must be transformed in to immediate knowledge through spiritual discipline in order to regain the self. It will, indeed, be a transition from philosophy to non-philosophy, from the sphere of reason to the realm of intuition.

*Śaṅkara's Advaita Vedānta* can also be a solution for the problem of national integration. In reality, *Śaṅkara's* teachings are relevant to National Integration and indeed for the integration of the whole world. Many languages are spoken in our country and yet our country is one. *Śaṅkara* strove for unity of the country not merely from the physical or geographical point of view but also in the spiritual dimension. He has also shown that our country is one and the parts cannot remain separated. Though he hailed from Kerala, we have the *Śaṅkaracārya* Hills in Kashmir which shows that Kashmir is part of India and will remain a part of India. He went to Kashmir just to emphasize the unity of the Country. A Namboodiri from Kerala was made the priest at the *Badrinātha* Shrine. A Priest from Maharastra was given some responsibility at *Rameśvaram*. Karnataka priests were appointed for the *Paśupatinātha* temple in Nepal. *Sureśvarācārya*, a north Indian was made the Pontiff of the *Śṛngerī Maṭha*, situated in the south. *Toṭakācārya* who hailed from the south was made the head of *Jyotir Maṭha* in the North. All these show how farsighted *Ādi Śaṅkara* was in his attempts to integrate India He is called the repository of *Śruti, Smṛti* and the *Purāṇas*. Being the source of National Integration, he has done a lot for protecting and preserving the unity of our country. There are people belonging to different religions in our country. Yet it is one country. If there is any country in the world where people belonging to different religions can live together, it is only India. It was *Adi Śaṅkara* who had shown the very seeds of *Vedānta* for this unity. Service to society is another hallmark of *Advaita Vedānta*. Ours is a very ancient civilization. We have always believed in the concept of *Vasudhaiva Kutumbakam* and *Svadeśo bhuvanatrayam*. So the whole world is one for us. Therefore, if this philosophy could be propagated, it will conduce to peace and happiness in the whole world.

These days, our country is beset with a major problem, namely the

problem of terrorism. *Ādi Śaṅkara's* teaching can go a long way finding a solution to these problems by giving us the proper guidance. His teachings will provide us with a sound basis for peace and friendship not only among the people of India but also peoples of the whole world.

Therefore the *Advaita Vedānta* is very much relevant today.

✦✦✦

# Phrase Structure Analysis in Sanskrit

(With Reference to the First Verse of किरातार्जुनीयम् and Issues Emerging Thereof)

Dipesh Katira*

## 1. Introduction

It is well known that the प्रातिशाख्य s are considered to be the earliest instances of linguistic activity. It was then that a systematic analysis of a particular aspect of a language was attempted for the first time. Thus linguistics that aims to study human language in general draws its inspiration from the Sanskrit tradition. Since its establishment as an independent discipline (for not more than one and a half century) the field of linguistics has given rise to many new avenues to the study of a language. Many Linguists and Sanskritists today feel that a study of Sanskrit through the framework of linguistics rather than through the framework developed in its own tradition can give fresh insights and lead to further development of both the disciplines- Sanskrit as well as Linguistics.

The study of Sanskrit language mostly involves the study of the rules of grammar that have already been laid down by the grammarians and the way in which they succeed in generating the words and sentences in Sanskrit. Alternatively, it may involve a study of techniques and meta-language used by grammarians for making an exhaustive description of Sanskrit. This work attempts to start with the actual Sanskrit sentences rather than rules. We wish to analyze Sanskrit sentences. For the purpose of this, we have chosen a single sample of a reasonably complex sentence in form of the prose order of the first verse of the किरातार्जुनीयम्, an epic poem written by a celebrated poet भारवि. Our tool for analysis is 'Constituency analysis,' a technique of linguistic analysis developed by Bloomfield, Zlling Harris and others. We have customized the method of analysis to some extent to suit the nature of Sanskrit language and the purpose of analysis. On the bases of such an analysis we try to make

*Research Scholar, IIT, Mumbai.

some comments and generalizations about the syntax of the language. It would be too impulsive to make concrete propositions about the syntax of Sanskrit language from the investigation of just one sentence. So, the syntactic facts emerging out of this analysis are rather to be considered as hypothesis that need a much wider survey and analysis of Sanskrit sentences for getting established as syntactic facts. This work thus raises more questions that need to be addressed in future rather than offering findings.

We start off with the basic idea of a Phrase, its types, and the concept of constituency analyses. This is followed by the analysis of the prose order of the verses. For more clarity, a tree diagram of the analysis of the verse has also been presented. The analysis is followed by a detailed discussion of various issues, insights and observations that emerge from it. The last section discusses possible applications of such a study and future works.

# 2. A Phrase

It is an expression consisting of one or more words forming a grammatical constituent of a sentence. An expression whose meaning cannot be inferred from the meanings of the words that make it up is also called as a phrase. However the former definition is only relevant to the current discussion. It is generally a group of words functioning as a single unit in the syntax of a sentence. In context of Immediate constituent analysis, the sentence is conceived to have been composed of various successive layers or components. Often the layers prior to single words are termed as phrases. For example 'The cunning fox ran away' can be divided into two phrases namely- 'the cunning fox' and 'ran away'.

The phrases may be further divided into several types based on the most important word in the phrase or the head of the phrase like Ad-positional phrase, Noun Phrase, Verb Phrase etc.

# 3. Immediate Constituency Analysis

Leonard Bloomfield in his book 'Language' published in 1933 was the first one to explore the basic idea behind immediate constituency analysis. This was further enhanced and refined by his successors Bernard

